**नीच**–पुं–९३२–पामर, नीच, असंस्कारी.
द्र० इतरशब्दः।
* निम्नमञ्चति नीचः।

**नीच**–न.–१४२९–नीचुं,ठींगु.
द्र० कुब्जशब्दः।

* निम्नमञ्चति नीचम्। नीचैरस्त्यस्य वा अभ्रादित्वात् अप्रत्यये 'प्रायोऽव्ययस्य' ।७।४।६५॥ इत्यन्त्यस्वरादिलोपः।

**नीच**–पुं–३५८–(शे.९४)–निर्धन, हीन.
द्र० अकिञ्चनशब्दः।

**नीचैस्**–अ.–१५४१–नीचुं, अल्प, नानुं.
* न्यञ्चति नीचैः। 'न्युदभ्यामञ्चः–' (उणा–१००३)॥ इति कैसि साधुः। यथा–' नीचैर्वाति समीरणः'।

**नीड**–त्रि.–१३१९–पक्षीनो माळो.
☐ कुलाय।
* नीयते नीडः, त्रिलिङ्गः, 'कुगुहुनी–' (उणा–१७०)। इति कित् डः।

**नीडज**–पुं–१३१७–पक्षी.
द्र० अगौकस्शब्दः।
* नीडादण्डाच्च जातो नीडजः।

**'नीडोद्भव'**–पुं–१३१७–पक्षी.
द्र० अगौकस्शब्दः।

**नीति**–स्त्री ७४३–(शि. ६४)–न्याय.
द्र० अभ्रेषशब्दः।

**नीप**–पुं–११३८–कदंब वृक्ष.
द्र०–कदम्बशब्दः।
* नयति सुखं नीपः 'नियो वा' (उणा–३०२) इति कित् पः।

**नीर**–न.–१०६९–पाणी.
द्र० अप्शब्दः।
* नीयते नयति वा नीरम्। 'ऋज्यजि–' (उणा–३८८) इति किद् रः।

**नीरद**–पुं–१८– (प.)वादळ, मेघ.

**नीरन्ध्र**–न.–१४४७–घट्ट, निरंतर.
द्र० अविरलशब्दः।
* निर्गतं रन्ध्रमत्र नीरन्ध्रम्।

**(नीराजन)**–न०–७८९–युद्ध यात्रानी पहेला राजाओनुं शस्त्रपूजा–विधान.
☐ लोहाभिसार, (नीराजनाविधि)।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

* नीरस्य-शान्त्युदकस्य अजनं क्षेपोऽत्र नीराजनम्, मन्त्रोक्त्या निःशेषवाहनादे राजनं वा ।

**नीराजनाविधि**-पुं-७८९-युद्ध यात्रानी पहेला राजाओनुं शस्त्रपूजा-विधान.

☐ लोहाभिसार, (नीराजन) ।

* नीरस्य-शान्त्युदकस्य अजनं क्षेपोऽत्र नीराजनम्, मन्योक्त्या निःशेषवाहनादे राजनं वा, तस्मात् परो विधिः । यद् दुर्गः

'लोहाभिसारस्तु विधिः परो नीराजनाद् नृपैः । दशम्यां दंशितैः कार्यः' इति **अमरस्तु**—

'लोहाभिसारोऽस्त्रभृतां राज्ञां नीराजनाविधिः' इति ब्रुवन्नीराजनामेव लोहाभिसारमाह ।

**नीरुज्**-पुं-४७४-नीरोगी.

☐ पटु, उल्लाघ, वार्त्त, कल्य ।

* नीष्क्रान्तो रोगाद् नीरुक् ।

**नील**-पुं-न. १९३-९निधि पैकी ८मो निधि.

* नीलवर्णत्वाद् नीलः ।

**नील**-पुं-न.-१३९७-श्याम वर्ण.

द्र० असितशब्दः ।

* नीलति नीलः । पुंक्लीबलिङ्गः ।

**नीलक**-पुं-१२३९-लीलो घोडो.

* नील एव निलकः ।

**नीलकण्ठ**-पुं-३-(प.)-शंकर.

नीलः कण्ठोऽस्य इति गुणप्राधान्याद् नीलकण्ठः शंकरः ।

**नीलकण्ठ**-पुं-१९५-शंकर.

द्र० अट्टहासिन्शब्दः ।

* नीलः कण्ठोऽस्य नीलकण्ठः ।

**नीलकण्ठ**-पुं-१३१९-मोर.

द्र० केकिन्शब्दः ।

* नीलः कण्ठोऽस्य नीलकण्ठः ।

**नीलङ्गु**-पुं-१२०२-शरीरनी अन्दर उत्पन्न थनार कृमि.

☐ 'नीलाङ्गु', कृमि ।

* शरीरस्यान्तर्भवः कृमिः, नीलति नीलङ्गुः, पुंलिङ्गः, "प्रीकैयै-' (उणा-७६१) इत्यङ्गुः ।

**नीलपङ्क**-पुं-१४६-(शे २१)-अंधकार.

**नीलमणि**-पुं-१०६५-नीलमणि.

☐ इन्द्रनील, [महानील शि-९५] ।

* नीलवर्णो मणिः नीलमणिः ।

**नीललोहित**-पुं-१९८-शंकर, महादेव

द्र० अट्टहासिन्शब्दः ।

* नीलः कण्ठे लोहितश्च केशेषु अतः नील-लोहित इति **पुराणम्** ।

**नीलवस्त्र**-पुं-२२५-बळदेव.

द्र० अच्युताग्रजशब्दः ।

* नीलं वस्त्रमस्य नीलवस्त्रः ।

**नीलवस्त्रा**-स्त्री-२०५-(शे-५७)-पार्वती.

द्र० अद्रिजाशब्दः ।

**नीलवासस्**-पुं-१२१-शनि.

द्र० असितशब्दः ।

* नीलं वासोऽस्य नीलवासाः ।

**नीला**-स्त्री-५८७-ग्रीवानी आगळ रहेल बन्ने नाडीओ.

* ग्रीवायाः प्राग्भागे धमन्यौ नाड्यौ नील-वर्णत्वात् नीले ।

**'नीलाङ्गु'**-पुं-१२०२-शरीरनी अंदर उत्पन्न थनार करमिया.

☐ नीलङ्गु, कृमि ।

**'नीलाम्बुजन्मन्'**-न.११६४-नीलकमळ, काळुं.

द्र० इन्दीवरशब्दः ।

**नीली**-स्त्री-११६७-सेवाळ.

द्र० जलनीलिकाशब्दः ।

* नीलति नीली, नीलीवर्णा वा ।

**नीलीराग**-पुं-४७६-गाढ स्नेही, स्थिर राग-वाळो.

☐ स्थिरसौहृद, (स्थिरप्रेमन) ।

* नील्या इव स्थिरो रागोऽस्य नीलीरागः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नीलोत्पल**–ન.–૪૮–૨૧ મા તીર્થંકરનું લાંછન.
**(नीलोत्पल)**–ન.–૨૨૯–કામદેવનું બાણ.
**(नीलोत्पललाञ्छन)**–પું–૧૩૦૮–વાસુકી નાગ, નીલોત્પલ જેવા વર્ણવાળો સફેદ નાગ.

☐ वासुकि, सर्पराज ।

* वसुकस्यापत्यं वासुकिः, सर्पाणां राजा सर्पराजः, श्वेतवर्णो नीलोत्पललाञ्छनश्चायम् ।

**नीवाक**–પું–૧૫૧૮–વચન માં સમાનતા, ક્રિયામાં આદર.

☐ प्रयाम ।

* नियतं वचनं नीवाकः, तुलाधृताऽनाधिक्यम्, क्रियादरो वा ।

**नीवार**–પું–૧૧૭૬–જંગલી ચોખા.

☐ वनव्रीहि ।

* नियतैर्व्रियते नीवारः । मुन्यन्नत्वात् 'नेवुः' ।५।३।७४।। इति घञ् ।

**(नीवि)**–સ્ત્રી–૮૬૯–મૂડી.

द्र० नीवीशब्दः ।

**नीवी**–સ્ત્રી–૬૭૩– (સ્ત્રીના) નીચેના વસ્ત્રની ગાંઠ.

☐ उच्चय ।

* नीयते जघन्यवस्त्रे नीविः । ''कृशृसृ'' (उणा–२९८) इति डिद्विः ङ्यां नीवी ।

**नीवी**–સ્ત્રી–૮૬૯–મૂલ ધન, પુંજી, મૂડી.

☐ मूलद्रव्य, परिपण, (नीवि) ।

* नीयते वृद्धिमसौ नीविः कया नीवी ।

**नीवृत्**–સ્ત્રી–૯૪૭–દેશ.

द्र० उपवर्त्तनशब्दः ।

* नियतं वर्तन्तेऽस्यां नीवृत् स्त्रीलिङ्गः, **अमरस्तु** पुंस्याह ।

**नीव**–ન.–૧૦૧૧–છાપરાનો આગલોભાગ, છાપરાના બન્ને છેડા.

☐ वलीक ।

* नीयते जलमन्नेन नीव्रम् । 'खुरक्षुर'–।। (उणा–३२६) ।। इति रे निपात्यते ।

**नीशार**–પું–૬૭૫–રજાઈ.

☐ हिमवातापहांशुक, [द्विखण्डक शे०–१३७, वरक शे. १३८] ।

* निशीर्यते शीताद्युपद्रवोऽनेन नीशारः । 'श्रो वायुवर्ण' ।५।३।२०।। इति घञ् । **यल्लक्ष्यम्**–'गौरिवाकृतनीशारः, प्रायेण शिशिरे कृशः' इति ।

**नीहार**–પું–૧૦૭૨–હિમ, ઝાકળ.

द्र० अवश्यायशब्दः ।

* निह्रियते नीहारः । 'घञ्युपसर्गस्य' ।३।२।८६।। इति दीर्घः ।

**नुति**–સ્ત્રી–૨૬૯–સ્તુતિ.

द्र० अर्थवादशब्दः ।

**नुत्त**–ન.–૧૪૮૨–પ્રેરેલું, કાઢી મુકેલું, ફેકેલું.

द्र० अस्तशब्दः ।

* नुद्यते स्म नुत्तम् ।

**नुन्न**–ન.–૧૪૮૨–પ્રેરેલું, કાઢી મુકેલું, ફેંકેલું.

द्र० अस्तशब्दः ।

* नुद्यते स्म नुन्नम् 'ऋह्रीघ्रा–।४।२।७६।। इति क्तस्य नत्वम् ।

**नूतन**–ન.–૧૪૪૮–નવું.

द्र० अभिनवशब्दः ।

* नवमेव नूतनम् । 'नवादीन–'। ७।२।१६० इति साधुः ।

**नूत्न**–ન.–૧૪૪૮–નવું.

द्र० अभिनवशब्दः ।

* नवमेव नूत्नम् ।

**नूनम्**–અ.–૧૫૪૦–નિશ્ચય.

☐ अवश्यम् ।

* नूनं 'नशिनूभ्यां नक्तनूनौ च' (उणा–९३५) इत्यम् यथा–'नूनं हन्ताऽस्मि रावणम् ।'

**नूपुर**–પું–ન.–૬૬૫–ઝાંઝર, કડલું.

द्र० अङ्गदशब्दः ।

* नुवति–स्तौतीव नूपुरम् । पुंक्लीबलिङ्गः। 'श्वशुर'–(उणा–४२६) इत्युरे निपात्यते ।

**नृ**–પું–૩૩૭–માણસ.

द्र० नरशब्दः ।

* नयतीति ना । 'नियो डित्' (उणा–८५४) इति ऋः ।

**नृचक्षस्**–પું–૧૮૭–રાક્ષસ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० असृक्पशब्दः ।

* नृन् चेष्टे नृचक्षाः । 'चक्षः शिद् वा' (उणा॰ ९६९) इत्यस् ।

**नृजल**–न.–६३३–મૂત્ર.

☐ मूत्र, वस्तिमल, मेह, प्रस्राव, स्रव ।

* नुः–नरस्य जलं नृजलम् ।

**नृत्त**–न.–२८०–નાચ.

द्र० ताण्डवशब्दः ।

* नर्तनं नृत्तम्, 'क्लीबेक्तः' ।५।३।१२३।। इति क्तः ।

**नृत्य**–न.–२८०–નાચ.

द्र० ताण्डवशब्दः ।

* नृत्यते नृत्यम्, 'ऋदुपान्त्या–' ।५।१।४१।। इति क्यप् ।

**नृत्यप्रिय**–पुं–१३२० (शे.१८०) મોર.

द्र० केकिन्शब्दः ।

**नृधर्मन्**–पुं–१८९–કુબેરદેવ.

द्र० इच्छावसुशब्दः ।

* नुः–मनुष्यस्येव धर्मः श्मश्रुलत्वादिरस्य नृधर्मा । 'द्विपदाद् धर्मादन्' ।७।३।१४१।। इत्यन् समासान्तः, एवं मनुष्यधर्माऽपि ।

**नृप**–पुं–६९०–રાજા.

☐ राजन्, राज्, पृथिवीशक्र, मध्यलोकेश, भूभृत्, महीक्षित्, पार्थिव, मूर्धाभिषिक्त, भूप, प्रजाप, (भूपाल, लोकपाल, नरपाल), [मूर्धावसिक्त शि.५९] ।

**नृपमन्दिर**–न.–९९२–રાજમહેલ.

☐ सौध ।

**नृपलक्ष्मन्**–न.–६१६(शे. १४१)–રાજાનું છત્ર.

☐ छत्र, आतपवारण, (आतपत्र, उष्णवारण) ।

**नृपासन**–न.–७१६–સિંહાસન.

☐ भद्रासन ।

**नृयज्ञ**–पुं–८२२–અતિથિની પૂજા તે મનુષ્ય યજ્ઞ.

☐ अतिथिपूजन ।

* नृभ्यो यजनं दानं नृयज्ञः ।

**नृवेष्टन**–पुं–२०० (शे.४५) શંકર.

द्र० अट्टहासिन्शब्दः ।

**नृशंस**–पुं–३७६–ક્રૂર, પાપી.

☐ क्रूर, निस्त्रिंश, पाप ।

* नृन् शंसति–हिनस्ति नृशंसः ।

**नृसिंहवपुष्**–पुं–२१८ (शे. ७०) વિષ્ણુ, કૃષ્ણ.

द्र० अच्युतशब्दः ।

**नेतृ**–पुं–४– (प.)–આ શબ્દ જોડવાથી સ્વામિવાચક શબ્દ બને છે.

**नेतृ**–पुं–३५८–સ્વામી, નાયક.

द्र० अधिपशब्दः ।

* नयति नियुङ्क्ते नेता ।

**नेत्र**–पुं–न.–५७५–આંખ.

द्र० अक्षिशब्दः ।

* नीयतेऽनेन दृश्यमिति नेत्रम्, पुंक्लीबलिङ्गः । 'नीदाम्ब्'–।५।२।८८।। इति त्रट् ।

**नेत्राम्बु**–न.–३०७–આંસુ.

द्र० अश्रुशब्दः ।

* नेत्रस्याम्बु नेत्राम्बु ।

**नेदिष्ठ**–न.–१४५२–અત્યંત નજીક.

☐ अन्तिकतम, [नेदीयस् शि. १३०] ।

* अतिशयेन अन्तिकं नेदिष्ठम् । 'बाढान्तिकयोः साधनेदौ' ।७।४।३७।। इति नेदादेशः, नेदीयोऽपि ।

**नेदीयस्**–न –(शि.१३०)१४५२–અત્યંત નજીક.

☐ अन्तिकतम, नेदिष्ठ ।

* अतिशयेन अन्तिकं नेदिष्ठम् । बाढान्तिकयोः साधनेदौ' ।७।४।३७।। इति नेदादेशः, नेदीयोऽपि ।

**नेपथ्य**–न.६४५–વસ્ત્ર, અલંકાર, માળા વિ. થી થતી અંગશોભા.

☐ वेष, आकल्प [वेश शि. ५०]

* नेत्रयोः पथ्यं नेपथ्यं, पृषोदरादित्वात् ।

**नेपाली**–स्त्री–१०६०–મણસીલ ધાતુ.

द्र० करवीराशब्दः ।

* नेपालदेशभवत्वाद् अभेदेन नेपाली, नैपाली अपि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नेम**–पुं–१४३४ઙ્કડો–અધોભાગ.

द्र० अर्धशब्दः ।

* नीयते नेमः । 'अर्त्तीरि'–(उणा-३३८)इति मः

**नेमि**-पुं–२८–२२મા તીર્થંકર.

☐ ।नेमिन् शि. २] ।

* धर्मचक्रस्य नेमिवन्नेमिः नेमीतीनन्तोऽपि दृश्यते यथा 'वन्दे सुव्रतनेमिनौ' इति ।

**नेमि**–पुं–३०–२२માતીર્થંકર.

☐ अरिष्टनेमि ।

**नेमि**–पुं–३५–હરિવંશમાં ઉત્પન્ન ભગવાન નેમિનાથ.

**नेमि**–स्त्री–७५६ પૈડાનો ગોળ ફરતો ભાગ.

☐ धारा, प्रधि ।

* नयति नेमिः स्त्रीलिङ्गः, 'नीसा-'(उणा–६८७) इति मिः ।

**नेमि**–पुं–१०५ (શે.१४)–ચન્દ્રમા.

द्र० अत्रिदृग्जशब्दः ।

**'नेमि'**–पुं–१०९१–ગરગડી.

☐ नेमी, तन्त्रिका ।

**(नेमि)**–पुं–११४२–તણુછ.

द्र० तिनिशशब्दः ।

**नेमिन्**–पुं–२८–२२મા તીર્થંકર.

☐ नेमि, अरिष्टनेमि ।

**'नेमिन्'**–पुं–११४२–તણછ.

द्र० तिनिशशब्दः ।

**नेमी**–स्त्री -१०९१–ગરગડી.

☐ 'नेमि' तन्त्रिका ।

* नीयते जलमनया नेमीः स्त्रीलिङ्गः ।

**नेरिन्**–पुं -१७४–(શે.३१)–ઇન્દ્ર.

द्र० अच्युताग्रजशब्दः ।

**नैकभेद**–न.–१४४९–અનેક પ્રકાર.

☐ उच्चावच, (नानाप्रकार) ।

* न एको नैकः, निरनुबन्धोऽत्र नः, 'नाम नाम्नैकार्थ्ये' ।३।१।१८।। इति समासः, नैकोभेदोऽस्य नैकभेदं नानाप्रकारमित्यर्थः ।

**(नैकसेय)** पुं–१८७–રાક્ષસ.

द्र० असृक्पशब्दः ।

**नैगम**–पु–८६७–વેપારી.

द्र० आपणिकशब्दः ।

* निगमे–पुरे मार्गे वा भवो नैगमः ।

**नैचिक**–न.–१२६४ બળદનું માથું.

☐ [नैचिकी शि.११२ ।

* नीचैश्चरति नैचिकम् । 'नैचिकी' इत्यन्ये ।

**नैचिकिन्**–पुं–(શિ११२)-१२६४ બળદનું માથું.

☐ नैचिक ।

**नैचिकी**–स्त्री–१२७०–ઉત્તમગાય.

* नीचैश्चरति नैचिकी । 'चरति' ।६।४।११।। इतीकण्, 'प्रायोऽव्ययस्य' ।७।४।६५।। इत्यन्त्यस्वरादिलोपः ।

**नैपाली**–स्त्री–१०६० (શિ.९३) મણશીલ ધાતુ.

द्र० करवीराशब्दः ।

**नैमित्त**–पुं–४८२ (શિ. ३६) દેવજ્ઞ, જ્યોતિષી.

द्र० आदेशिनशब्दः ।

**नैमित्तिक**–पुं–४८२–(શિ. ३६) દેવજ્ઞ, જ્યોતિષી.

द्र० आदेशिन्शब्दः ।

**नैमेय**–पुं–८६९–ફેરફાર કરવો, સાટું–અદલો–બદલો કરવો.

द्र० निमयशब्दः ।

* निमेये–परिवर्तनीये भवो नैमेयः ।

**नैयायिक**–पुं–८६२– નૈયાયિક તર્ક શાસ્ત્રનો વિદ્વાન અથવા અભ્યાસી.

☐ आक्षपाद, यौग ।

* न्यायः–पञ्चावयववाक्यादिः, तं वेत्ति अधीते वा नैयायिकः, न्यायादित्वात् इकण्, 'य्वः पदान्तात्-' ।७।४।५।। इत्यैकारागमः ।

**नैरयिक**–पुं–१३५८–(શિ०-१२२)–નારકી.

द्र० अतिवाहिकशब्दः ।

**नैर्ऋत**–पुं–१६९–નૈઋત દિશાનો સ્વામી.

**नैर्ऋत**–पुं–१८८–રાક્ષસ.

द्र० असृक्पशब्दः ।

* निर्ऋतेर्दिक्पालस्य अपत्यं नैर्ऋतः ।

**(नैर्ऋती)**–स्त्री–१६९– નૈઋત દિશા.

**नैश्रिन्त्य**–न.-७५–(શે०-२)–મોક્ષ.

द्र० अक्षरशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नैष्किक**-पुं-७२३-दीनार रूपा नाणानो अधिकारी.

☐ रूपाध्यक्ष, [टङ्कपति शि०६२] ।

* निष्के-दीनारादौ नियुक्तो नैष्किकः, टङ्कपतिरपि ।

**(नैसर्प)**-पुं-१९३-नव निधि पैकी पहेलो निधि.

* जैनसमये तु नैसर्पाद्या निधयः, यदवोचाम **त्रिषष्टिशलाकापुरुषचरिते**-

'नैसर्पः पाण्डुकश्चाथ, पिङ्गलः सर्वरत्नकः । महापद्मः कालमहाकालौ माणवशङ्खकौ ॥१॥ तेषामेवाभिधानैस्तु, तदधिष्ठायकाः सुराः । पल्योपमायुषो नागकुमारास्तत्रवासिनः ॥२॥

**नैस्त्रिंशिक**-पुं-७७१- तलवारवाळो.

* निस्त्रिंशः प्रहरणमस्य नैस्त्रिंशिकः । 'प्रहरणम् ।६।४।६२॥ इतीकण् ।

**नो**-अ.-१५३९- नहि,अभाव, निषेध.

☐ अ, न, नहि ।

* नयति नो, बाहुलकात् डो । यथा-'नो जानीमः किमत्र विधास्यति ।'

**नौ**-स्त्री-८७६- नाव, वहाण.

द्र० तरणीशब्दः ।

* नुद्यते कर्णधारैर्नौः, स्त्रीलिङ्गः । 'ग्लानुदिभ्यां डौः' (उणा-८६८) ।

**नौकादण्ड**-पुं-८७७-हलेसुं, नाव चलावनारनो दंड.

द्र० क्षेपणीशब्दः ।

* येन नौर्वाह्यतेऽसौ नौकादण्डः ।

**न्यक्कार**-पुं-४४१-तिरस्कार, पराभव.

द्र० अत्याकारशब्दः ।

* न्यक्करणं न्यक्कारः ।

**न्यक्कृत**-पुं-४४०-धिक्कारायेलो.

☐ अपध्वस्त, धिक्कृत ।

* न्यक्क्रियते स्म न्यक्कृतः ।

**न्यक्ष**-पुं-१४३३-समस्त, बधुं.

द्र० अखण्डशब्दः ।

* न्यक्ष्णोति-व्याप्नोति न्यक्षः, निष्क्रान्तमक्षादिति वा ।

**न्यग्रोध**-पुं-६००- वाम, बन्ने हाथ आडा लांबाकरे एटली लंबाई.

☐ व्याम, व्यायाम [वियाम, बाहुचाप, तनूतल शे०-१२५] ।

* न्यग् रुणद्धि न्यग्रोधः ।

**न्यग्रोध**-पुं-११३२-वड.

☐ बहुपात्, वट, वैश्रवणालय ।

* न्यग् रोहति न्यग्रोधः, 'वीरुन्न्यग्रोधौ' ।४।१ २१॥ इति धत्वे साधुः, न्यक्-तिर्यग् मार्ग मूलै रुणद्धि वा ।

**न्यङ्कु**-पुं-१२९३-हरणनी एक जात.

* न्यञ्चति न्यङ्कुः, त्रिकेण विपुलोन्नतः शम्बराकृतिः, 'नेरञ्चेः' (उणा-७२४) इत्युः न्यक्वादित्वात् कत्वम् ।

**न्यञ्च**-पुं-१४२९-ठींगुं, नीचुं.

द्र० कुब्जशब्दः ।

* नियतमञ्चति न्यग् ।

**न्यञ्चित** न.-१४८२-नीचे फेंकेलुं.

☐ अधःक्षिप्त ।

* न्यच्यते स्म न्यञ्चितम् ।

**न्याद**-पुं-४२३- भोजन, खावुं ते.

द्र० अदनशब्दः ।

* न्यादनं न्यादः । 'न्यादो नवा' ।५।३।२४॥ इत्यलि निपात्यते ।

**न्याय**-पुं-७४२-न्याय, नीति.

द्र० अभ्रेषशब्दः ।

* नियतमीयतेऽनेन न्यायः, 'न्यायावाया'- ।५।३।१३४॥ इति घञि निपात्यते ।

**न्यायद्रष्टृ**-पुं-७१९-(शे०-१४१) न्यायाधीश.

☐ प्राड्विवाक, अक्षदर्शक ।

[स्थेय शे. १४१] ।

**न्याय्य**-न.-७४३- न्याययुक्त, व्याजबी.

द्र० अभिनीतशब्दः ।

* न्यायादनपेतं न्याय्यम्, 'न्यायार्थादनपेते' ।७। ।१।१३॥ इति यः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**न्यास**-पुं-८७०-थापणु.

☐ निक्षेप, उपनिधि ।

* न्यस्यते-निक्षिप्यते न्यासः ।

**(न्यास)**-पुं-२५६ કઠિન પદોને સ્પષ્ટ કરી અર્થ કરવો તે.

☐ पञ्जिका, (पदभञ्जिका) ।

**न्यासार्पण**-न.-(८७०)-थापणु पाछी आपवी

☐ प्रतिदान, [परिदान शि. ७७]

**न्युज**-पुं-४५३-(शि०.३२)-कुबडो.

☐ कुब्ज, गडुल ।

**न्युब्ज**-पुं-४५७-(शि०-१०६)-नीचा मुख वाळो.

☐ अधोमुख, अवाच् ।

卐

## 'प'

**प**-पुं ७(प.)-આ શબ્દ લગાડવાથી ખાનાર વાચક શબ્દ બને છે.

**पक्व**-न.-४१२ પાકી ગયેલું, પાણીથી રાંધેલું અન્ન.

☐ राद्ध, सिद्ध ।

* पच्यते स्म पक्वम् ।

**पक्व**-न.-१४८५-પાકેલું.

☐ परिणत ।

* पच्यते स्म पक्वम् । 'क्षैशुषिपचो मकवम्' ।४।२।७८।। इति साधुः ।

**पक्वण**-पुं-न.-१००२-ભીલોનું રહેઠાણ.

☐ शबरावास ।

* पच्यतेऽस्मिन् पक्वणः, पुंक्लीबलिङ्गः, 'चिक्वण-' (उणा-१९०) इत्यणे निपात्यते ।

**पक्ष**-पुं-१४७- १५ दिवस, પખવાડિયું.

* पचति भूतानि पक्षः, 'मावावद्यमि-' (उणा-५६४) ।। इत्यादिना सः ।

**पक्ष**-पुं-७८१-બાણના પુંખ માં રહેલ ગીધ આદિનાં પીંછાં..

☐ वाज, (छदाऽऽवली, पत्रपाली) ।

* पच्यते इति पक्षः, गृध्रकङ्कपत्रादिः ।

**पक्ष**-पुं-१३१८-પક્ષીની ચાંચ.

द्र० गरुत्शब्दः ।

* पच्यते कालेन पक्षः, 'मावावदि-।।(उणा-५६४ ।। इति सः ।

**पक्षक**-पुं-१००७-ખડકીનું દ્વાર, ખડકી.

☐ पक्षद्वार । [खटक्किका-शि-८७] ।

* पक्षस्य तुल्यः पक्षकः, खटक्किकाऽपि ।

**पक्षति**-स्त्री-१४७- પડવો (तिथि).

☐ प्रतिपत् ।

* पक्षस्य मूलं-प्रारम्भः पक्षतिः, स्त्रीलिङ्गो, 'पक्षात्तिः' ।७।१।८९।। इति तिः ।

**पक्षति**-स्त्री-१३१८-પાંખનું મૂળ.

☐ पक्षमूल ।

* पक्षस्य मूलं पक्षतिः, स्त्रीलिङ्गः, 'पक्षात् तिः' ।७।१।८९ ।।

**पक्षद्वार**-न.-१००७- ખડકીનું દ્વાર.

☐ पक्षक [खटक्किका शि-८७] ।

*पक्षद्वारं-पार्श्वद्वारम् ।

**पक्षभाग**-पुं-१२२८-હાથીના પડખાનો ભાગ.

* पक्षयोर्भागः पक्षभागः, गजस्य पार्श्वप्रदेशः ।

**पक्षमूल**-न०-પાંખનું મૂળ.

☐ पक्षति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* पक्षस्य मूलं पक्षमूलम् ।

**पक्षान्त**- (द्वि. व)-पुं-१४८-પૂનમ, અમાસ (બ-ને).

☐ पञ्चदशी, यज्ञकाल, पर्वन् ।

* पक्षस्यान्तौ पक्षान्तौ ।

**पक्षिन्**-पुं-१३१६-પક્ષી.

द्र० अगौकस्शब्दः ।

* पक्षाः सन्ति अस्य पक्षी ।

**(पक्षिन्)**-पुं-१४४-બેરાત વચ્ચેનો દિવસ.

* निशयोर्मध्ये दिवसो पक्षीत्याहुः ।

**पक्षिणी**-स्त्री-१४४-વર્તમાન અને આગામી દિવસની વચલીરાત.

* पक्षौ विधेते अस्याः पक्षिणी, वर्तमानागामि-दिवसयो पक्षयोरिवमध्ये वर्तमानत्वात् ।

**पक्षिमृगगत्यनुहारक**-न.-१२४८-ઠેકડા મારતી ગતિ, પક્ષી અને મૃગના જેવી ગતિ.

☐ प्लुत, लङ्घन ।

* पक्षिणां मृगाणां मृगगत्यनुयायि पक्षि-मृगगत्यनुहारकम् ।

**पक्षिलस्वामिन्**-पुं-८५४-વાત્સ્યાયન મુનિ.

द्र० अङ्गुलशब्दः ।

* प्रशस्तौ पित्रोः पक्षावस्य स्तः पक्षिलः, स चासौ स्वामी पक्षिलस्वामी ।

**पक्षिसिंह**-पुं-२३१-(शे०-८०)- ગરુડ પક્ષી.

द्र० अरुणावरजशब्दः ।

**पक्षिस्वामिन्**-पुं-२३१-ગરુડ પક્ષી.

द्र० अरुणावरजशब्दः ।

* पक्षिणां स्वामी पक्षिस्वामी ।

**पक्ष्मन्**-पुं-न.-५८०-આંખની પાંપણ.

* पच्यते-विस्तीर्यते पक्ष्म, पुंक्लीबलिंगः, 'सात्यन्नात्मन्'-(उणा—९१६) ॥ इति मनि निपात्यते ।

**पङ्क**-पुं-न.-१०९०-કાદવ.

द्र० कर्दमशब्दः ।

* पञ्च्यते-विस्तार्यते जालेन पङ्कः, पुंक्लीब-लिङ्गश्चायं न्यङ्क्वादित्वात् कत्वम् ।

**पङ्क**-पुं-न.-१३८१-પાપ, દુષ્કૃત્ય.

द्र० अंहस्शब्दः ।

* पञ्च्यते पङ्कः, पुंक्लीबलिंगः ।

**पङ्कक्रीडनक**-पुं-११८८ (शे०-१८६) ભૂંડ.

द्र० आखनिकशब्दः ।

**पङ्कज**-न०-११६२-કમળ.

द्र० अरविन्दशब्दः ।

**पङ्कजन्मन्**-न.-११६२-કમળ.

द्र० अरविन्दशब्दः ।

**पङ्कजिनी**-स्त्री-११६०-કમળનો વેલો.

द्र० नलिनीशब्दः ।

* पङ्कजमस्ति अस्यां पङ्कजिनी, अब्जादित्वादिन् यौगिकत्वात् कमलिनीत्यादयः ।

**पङ्कप्रभा**-स्त्री-१३६०-૪થી નરકની પૃથ્વી.

* पङ्केन प्रभाति पङ्कप्रभा ।

**पङ्करुह्**-न.-११६२-કમળ

द्र० अरविन्दशब्दः ।

* पङ्के रोहति पङ्करुट् ।

**पङ्करुह**-न.-११६२-કમળ.

द्र० अरविन्दशब्दः ।

* पङ्के रोहति पङ्करुहम् ।

**पङ्क्ति**-स्त्री-१४२३- શ્રેણી, ઓળી.

द्र० आलिशब्दः ।

* पञ्च्यते पङ्क्तिः ।

**(पङ्क्ती)**-स्त्री-१४२३-ઓળી.

द्र० आलिशब्दः ।

**पङ्गु**-पुं-४५२-પાંગળો.

☐ श्रोण, [पङ्गुल, पीठसर्पिन् शे०-१०५] ।

* पायति-शुष्यति पादवैकल्यात् पङ्गुः ।

'प्रीकैनीलिः'-(उणा-७६१) इत्यङ्गुक् ।

**पङ्गु**-पुं-१२१-(शे०-१५-)શનિગ્રહ.

द्र० असितशब्दः ।

**पङ्गुल**-पु-११४३-સફેદકાચ જેવો ઘોડો.

* पङ्गून् लाति पङ्गुलः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पङ्गुल**-पुं-४५२-(शि०-१०५) -પાંગળો.

☐ पङ्गु, श्रोण । [पीठसर्पिन शि०-१०५]।

**पज्ज**-पुं-८९४-શુદ્ર.

द्र० अन्त्यवर्णशब्दः ।

* पद्भ्यां जातः पज्जः, यत् **श्रुतिः** 'पद्भ्यां शूद्रोऽजायत' इति ।

**पञ्चकृत्वस्**-अ.-१५४२-(शे. २०६)-પાંચવાર.

**पञ्चजन**-पुं-३३७-મનુષ્ય.

द्र० नरशब्दः ।

* पञ्चभिः-पृथिव्यादिभिः जायते पञ्चजनः ।

**पञ्चज्ञान**-पुं-२३३-બુદ્ધ, સુગત.

द्र० अद्वयशब्दः ।

* पञ्चानां विज्ञान-वेदना-संज्ञा-संस्कार-रूप-लक्षणानां स्कन्धानां ज्ञानमस्य पञ्चज्ञानः ।

**पञ्चत्व**-न०-३२४-મૃત્યુ.

द्र० अत्ययशब्दः ।

* देहस्तावत् पञ्चभूतारब्धो, मरणे त्वस्य पञ्चानां भावः पञ्चत्वम्, प्रत्येकं स्वांशसंक्रमात् ।

**पञ्चदशी**-(द्वि. व.)-स्त्री-१४८-પૂનમ-અમાસ (બન્ને).

द्र० पक्षान्तशब्दः ।

* पञ्चदशानां पूरण्यौ पञ्चदश्यौ ।

**'पञ्चनख'**-पुं-१२८५-સિંહ.

द्र० इभारिशब्दः ।

**(पञ्चबाण)**-पुं-२२९-કામદેવ.

द्र० अङ्गजशब्दः ।

**(पञ्चबाण)**-पुं-१६-(प.)-કામદેવ.

द्र० अङ्गजशब्दः ।

**पञ्चभद्र**-पुं-४३४-દ્યુતાદિકનો વ્યસની.

☐ विप्लुत, व्यसनिन् ।

* पञ्च भद्राणि-कल्याणानि अस्य पञ्चभद्रोऽभद्रः, विपरीतलक्षणया भद्रमुखवत् ।

**पञ्चभद्र**-पुं-१२३६-પંચકલ્યાણી ઘોડો.

* पञ्चहृदयादीनि (हृत्पृष्ठमुखपार्श्वानि) श्वेतानि भद्राणि कल्याणहेतवोऽस्य पञ्चभद्रः ।

**पञ्चम**-पुं-१४०१-સાત સ્વરોમાંનો પાંચમો સ્વર.

* पञ्चमस्थानभवत्वात् पञ्चमः । **यदाह**- 'वायुः समुत्थितो नाभेरुरोहृत्कण्ठमूर्धसु । विचरन् पञ्चमस्थानप्राप्त्या 'पञ्चम' उच्यते ॥५॥

**पञ्चमुख**-पुं-१९६-શંકર.

द्र० अट्टहासिन्शब्दः ।

* पञ्च मुखानि-सद्यो-जात वामदेवाऽघोरतत्पुरुषेशानलक्षणानि अस्य पञ्चमुखः ।

**पञ्चयज्ञपरिभ्रष्ट**-पुं-८५९-બ્રહ્મયજ્ઞ વગેરે પાંચ યજ્ઞથી ભ્રષ્ટ થયેલ.

☐ मलिम्लुच ।

* पञ्चभिर्ब्रह्मयज्ञादिभिः परिभ्रष्टः ।

**पञ्चलोह**-न.-१०५०-તાંબું વગેરે પાંચ ધાતુ.

☐ सौराष्ट्रक ।

* पञ्च ताम्र-रीति-त्रपु-सीसक-कालायस-लक्षणानि लोहानि अस्मिन् पञ्चलोहम् ।

**पञ्चशाख**-पुं-५९१-હાથનો પંજો.

द्र० करशब्दः ।

* पञ्च अङ्गुलिलक्षणाः शाखा अस्य पञ्चशाखः ।

**पञ्चशिख**-पुं-१२८४-સિંહ.

द्र० इभारिशब्दः ।

* पञ्च शिखा अस्य पञ्चशिखः, पचञ्भिः श्यति वा ।

**पञ्चाङ्गगुप्त**-पुं-११५३-કાચબો.

द्र० कच्छपशब्दः ।

* पञ्चाङ्गेन गुप्तः पञ्चाङ्गगुप्तः ।

**पञ्चाङ्गी**-स्त्री-१२५१-લગામ, ચોકડું.

द्र० कविकाशब्दः ।

* पञ्च अङ्गानि अवयवा यस्याः पञ्चाङ्गी ।

**पञ्चाङ्गुल**-पुं-११५०-એરંડો.

द्र० एरण्डशब्दः ।

* पञ्च अङ्गुलयोऽस्य पञ्चाङ्गुलः, अङ्गुलिसदृशपञ्चपत्रावयवत्वात् 'बहुव्रीहेः काष्ठे' ।७।३।१२४॥ इति । टः समासान्तः ।

**पञ्चार्चिष्**-पुं-११७-બુધ ગ્રહ.

द्र० ज्ञशब्दः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

* पञ्चार्चिर्षोऽस्य पञ्चार्चिः ।

**पञ्चास्य**-पुं-१२८४-सिंह.

द्र० इभारिशब्दः ।

* पञ्च आस्यानि-मुखानि, मुखेन पादैश्च योद्धृत्वात् अस्य पञ्चास्यः, पञ्च्यते पञ्चं विस्तारवदास्यमस्येति वा ।

**पञ्चेषु**-पुं-१६-(प.)-कामदेव.

**पञ्जिका**-स्त्री-२५६-कठिन पदोने स्पष्ट करी अर्थ करवो ते. (लघुटीका).

☐ पदभञ्जिका । (न्यास) ।

* पञ्चयन्ते-व्यक्तिक्रियन्ते पदार्था अनया पञ्चिका । 'नाम्नि' पुंसि च' ।५।३।१२१।। इति णकः, पृषोदरादित्वाद् जत्वे पञ्जिका । अर्थाद् विषमाण्येव पदानि भनक्ति पदभञ्जिका ।

**पट**-त्रि.-६६७-वस्त्र.

द्र० अंशुकशब्दः ।

* पटति-विस्तीर्यते पटः, त्रिलिङ्गः, 'सुचेलकः पटोऽस्त्री' **इत्यमरो** विशेषमाह ।

**'पट'**-पुं-११४२-चारोळीनुं झाड.

द्र० पियालशब्दः ।

**पटकुटी**-स्त्री-६८१-रावटी, वस्त्रनुं नानुं घर.

☐ केणिका, गुणलयनिका ।

* पटानां कुटी पटकुटी ।

**(पटचोर)**-पुं-३८१-चोर.

द्र० ऐकागारिकशब्दः ।

**पटच्चर**-न.-६७८-जीर्ण वस्त्र.

☐ जीर्णवस्त्र ।

* पट इवाचरत् पटत् 'भूतपूर्वे पटत् पटच्चरम् 'भूतपूर्वे ष्चरट्' ।७।२।७८।। पटच्चरः 'पटो जीर्णः' इति पुंसि **माला** ।

**पटल**-त्रि.-१०१०-छापरुं.

☐ छदिष् ।

* पटति-स्थगयति पटलं, त्रिलिङ्गः, 'मृदिकन्दि'-(उणा-४६५) इत्यलः, पटं लातीति वा ।

**पटल**-स्त्री-न.-१४११-समूह, समुदाय.

द्र० उत्करशब्दः ।

* पटति पटलः, स्त्रीक्लीबलिङ्गः, 'मृदिकन्दि'-(उणा-४६५) इत्यलप्रत्ययः ।

**पटवासक**-पुं-६३७-अबील, कुंकुम, केशर चूर्ण वि. सुगंधी चूर्ण.

☐ पिष्टात ।

* पटो वास्यतेऽनेन पटवासः, के पटवासकः ।

**पटह**-पुं-न.-२९४-नगारुं, दुंदुभि.

☐ भेरी, दुन्दुभि, आनक ।

* पटन्ति-हर्षं गच्छन्ति अत्र पटहः, पुंक्लीबलिङ्गः, 'कृपकटिपटि-' (उणा-५८९) इत्यहः, पटे हन्यते इति वा पटहः **केचिद्** द्वौ द्वौ भिन्नार्थौ आहुः, वाद्यविशेषः ।

**पटह**-पुं-न.-७९९-युद्धनो पटह, ढोल, युद्ध वाजित्रनो ध्वनि.

☐ आडम्बर ।

* पटे हन्यते स्म पटहो वाद्यविशेषः, यद् **वाचस्पतिः** 'महासमरतूर्ये तु, पटहाडम्बरावुभौ' पुंक्लीबलिङ्गावेतौ ।

**पटाका**-स्त्री-७५०-(शि.६४)-धजा.

द्र० केतनशब्दः ।

**पटु**-पुं-३४३-प्रवीण, होशियार.

द्र० अभिज्ञशब्दः ।

* पटति दाक्ष्यं पटुः 'भृमृतृत्सरि'-(उणा-७१६) इत्युः ।

**पटु**-पुं-३८४-दक्ष, कार्यकुशळ.

द्र० उष्णकशब्दः ।

* पटति पटुः ।

**पटु**-पुं-४७४ नीरोगी.

द्र० उल्लाघशब्दः ।

* पटति आरोग्यं पटुः ।

**पटु**-पुं-१३८५-अत्यंत गरम, उष्ण स्पर्श.

द्र० उष्णशब्दः ।

* पटति उष्णतां पटुः ।

**पटोलिका**-स्त्री-११८८-पटोळ.

☐ कोशातकी ।

* पटति पटोलि, 'कटिपटि-' (उणा-४९३) इत्योलः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पट्ट**–न.–१०४१–(शे.१६०)–સીસું.

द्र० गण्डूपदभवशब्दः ।

**पट्टन**–न.–९७२–(शि.८५)–નગર.

द्र० अधिष्ठानशब्दः ।

**पट्टिस**–पुं–७८७–શસ્ત્રનો એક પ્રકાર.

द्र० चक्रशब्दः ।

* पटति आरातीन् पट्टिसः, 'पटिविम्याम्–' (उणा–५७९) इति टिसः, अयं तालव्य इत्यन्ये ।

**(पट्टिश)**–पुं–७८७–શસ્ત્રનો એક પ્રકાર.

द्र० चक्रशब्दः ।

**पण**–पुं–३६२–પગાર, મૂલ્ય, મજૂરી,

द्र० कर्मण्याशब्दः ।

* पण्यते–आभाष्यते पणः । 'पणेर्मानः' ।५।३।३२।। इत्यल् ।

**पण**–पुं–४८६–જુગાર.

द्र० अक्षवतीशब्दः ।

* पण्यते पणो बन्धकः ।

**पणव**–पुं–२९४ (शे.–८४) ઢોલ, વાદ્યવિશેષ.

☐ किङ्कण ।

**पणाङ्गना**–स्त्री–५३२–ગણિકા, વેશ્યા.

द्र० गणिकाशब्दः ।

* पण्येन पणेन अङ्गना पणाङ्गना ।

**पणास्थिक**–पुं–१२०६–કોડી.

द्र० कपर्दशब्दः ।

* पणाय–व्यवहाराय अस्थि अस्य पणास्थिकः ।

**पणितव्य**–न.–८७१–ખરીદવા યોગ્ય.

☐ विक्रेय, पण्य ।

* पण्यते पणितव्यम् ।

**पण्ड**–पुं–५६२–નપુંસક.

द्र० क्लीबशब्दः ।

* पण्डते–गच्छति उभयव्यञ्जनतां पण्डः । पनायति स्त्रीपुंसाविति वा 'पञ्चमाड्डः' (उणा–१६८) ।। पण्डुरपि ।

**पण्डा**–स्त्री–३१०–તત્ત્વને અનુસરનારી બુદ્ધિ.

* तत्त्वानुगामिनी मतिः, पण्यते–स्तूयते पण्डा, 'पञ्चमाड्डः' (उणा–१६८) इति डः ।

**पण्डित**–पुं–३४१–વિદ્વાન.

द्र० अभिरूपशब्दः ।

* पण्डते–जानाति इति पण्डितः, पण्डा बुद्धिः सञ्जाता अस्य इति वा तारकादित्वादितः ।

**पण्डु**–पुं–५६२–(शि.४५)–નપુંસક.

द्र० क्लीबशब्दः ।

**पण्य**–न.–८७१ ખરીદવા યોગ્ય.

☐ पणितव्य, विक्रेय ।

* पण्यते पण्यम्, 'वर्योपसर्या–' ।५।१।३२।। इति ये साधुः ।

**पण्यवीथिका**–स्त्री–९८८–(शि.८५)–બજાર.

द्र० वणिग्मार्गशब्द ।

**पण्यवीथी**–स्त्री–९८८–(शि.८५)–બજાર.

द्र० वणिग्मार्गशब्दः ।

**पण्यशाला**–स्त्री–१००२–હાટ, દુકાન.

द्र० अट्टशब्दः ।

* पण्यस्य शाला पण्यशाला ।

**पण्याङ्गना**–स्त्री–५३२–ગણિકા, વેશ્યા.

द्र० गणिकाशब्दः

* पण्येन अङ्गना पण्याङ्गना ।

**पण्याजीव**–पुं–८६७–વેપારી.

द्र० आपणिकशब्दः ।

* आपणायतीत्यापणिकः, 'आकः पणिपनि–' (उणा–३९) इति इक; आपणः प्रयोजनमस्येति वा, प्रापणिकोऽपि ।

**पनग**–पुं–१३१६–પક્ષી.

द्र० अगौकस्शब्दः ।

* पतति अनेन पतः–पक्षः, स्थादित्वात् कः, पतैर्गच्छति पतगः ।

**पतङ्ग**–पुं–९५–સૂર્ય.

द्र० अंशुशब्दः ।

* पतति–गच्छति व्योम्नीति पतङ्गः । 'पतितमि'–(उणा–९८) ।। इत्यादिना अङ्गः, पतः सन् गच्छतीति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा 'नाम्नो गमः खड्डौ च-' ।५।१।१३१।। इत्यादिना खड्ड ।

**पतङ्ग**—પું–૧૨૧૩– પતંગિયું, તીડ.

☐ शलभ ।

* पतो गच्छति पतङ्गः, 'नाम्नो गमः–' ।५।२। १३१।। इति खड्ड । पततीति वा 'पतितमि–(उणा– –९८) इत्यङ्गः ।

**पतङ्ग**–પું–૧૩૧૬–પક્ષી.

द्र० अगौकस्शब्दः ।

* 'पतितमि' इत्यङ्गे पतङ्गः, पतैः गच्छतीति वा । (उणा–७८) ।

**(पतङ्ग)**–ન.–૬૪૨–રક્ત ચંદન, રતાંજળી.

द्र० कुचन्दनशब्दः ।

* पत्रेषु अङ्गति पत्राङ्गं, पतङ्गं त्वेतदपभ्रंशः

**पतङ्गिका**–સ્ત્રી–૧૨૧૪–એક પતરા, પતંગિયાના જેવી નાની માખી.

☐ पुत्तिका ।

* पतङ्गप्रतिकृतिः पतङ्गिका, अपतं गच्छतीति वा, पृषोदरादित्वात् ।

**पतञ्जलि**–પું–૮૫૧–પતંજલિ ઋષિ, મહાભાષ્યકાર

☐ गोनर्दीय ।

* पतति पतः. पतोऽञ्जलेः पतञ्जलिः, पृषोदरादित्वात् ।

**पतत्**–પું–૧૩૧૬–પક્ષી.

द्र० अगौकस्शब्दः ।

* पततीति पतन् ।

**पतत्र**–ન.–૧૩૧૭–પક્ષીની પાંખ.

द्र० गरुत्शब्दः ।

* पतन्ति अनेन पतत्रं, 'वृगनक्षि' (उणा–४५६) इत्यत्रे पतत्रम्, पतन्तं त्रायते वा ।

**पतत्रि**–પું–૧૩૧૭–(શિ.૧૧૭) પક્ષી.

द्र० अगौकस्शब्दः ।

* पतति पतत्रिः इकारान्तोऽयं, 'पतेरत्रिः' (उणा-६९७) इत्यत्रिः ।

**पतत्रिन्**–પું–૧૩૧૭–પક્ષી.

द्र० अगौकस्शब्दः ।

* पतति पतत्री, 'पतेरत्रिन्' (उणा–८३०) । पतत्राणि सन्ति अस्य वा ।

**पतद्ग्रह**–પું–૬૮૩–પિકદાની, થૂંકવાનું પાત્ર.

☐ पाल, प्रतिग्रह [प्रतिग्रह, पतद्ग्राह शि ५७] ।

* गण्डूषादि पतत् गृह्णाति पतद्ग्रहः, पतद्ग्राहोऽपि ।

**पतद्ग्राह**—પું–૬૩૮– પિકદાની, થૂંકવાનું પાત્ર.

द्र० पतद्ग्रहशब्दः ।

**पतयालु**–પું–૪૪૫–પડનાર.

☐ पातुक ।

* पतयतीत्येवंशीलः पतयालुः ।

**पताका**–સ્ત્રી–૭૫૦–ધજા.

द्र० केतनशब्दः ।

* पतति धूयत पताका, 'शलिबलि–' (उणा–३४) इत्याकः, पटाकाऽपि ।

**पताकादण्ड**–પું–૭૫૦–(શિ० ૬૫)–ધ્વજ.

द्र० केतनशब्दः ।

* पताकादण्डो ध्वज **इत्येके** ।

**पताकिन्**–પું–૭૬૪–નિશાનવાળો, ધ્વજને ધારણ કરનાર.

☐ वैजयन्तिक ।

* पताकाऽस्ति अस्य पताकी-पताकाधरः, शिखादित्वादिन् ।

**पताकिनी**–સ્ત્રી–૭૪૬–લશ્કર.

द्र० अनीकशब्दः ।

* पताकाः सन्ति अस्यां पताकिनी, शिखादित्वादिन् ।

**पति**–પું–૪–(૫.)– આ શબ્દ લગાડવાથી સ્વામિવાચક શબ્દ બને છે.

☐ पाल, धन, भुज्, नेतृ, मत् ।

* यथा–भूपतिः ।

**पति**–પું–૩૫૯–સ્વામી, નાયક.

द्र० अधिपशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* पातीति पतिः 'पातेर्वा' (उणा-६५९) इति डतिः ।

**पति**-पुं-५१६-पति, वर.

द्र० कान्तशब्दः ।

* पातीति पतिः, 'पातेर्वा' (उणा-६५९) इति डतिः ।

**पतिवरा**-स्त्री-५१६- જાતે વરને પસંદ કરનાર સ્ત્રી.

☐ वर्या, स्वयंवरा ।

* पतिं वृणीते पतिंवरा, 'भृवृजि'-।५।१।११२ इति खः ।

**पतित**-पुं-८०६-પડેલો.

☐ प्रस्कन्न ।

* पतति स्म पतितः ।

**पतित**-न.-१४९०-પડી ગયેલું, ગળેલું.

द्र० गलितशब्दः ।

* पतितिस्म पतितम् ।

**पतिवत्नी**-સ્ત્રી-५३०-સધવા સ્ત્રી.

☐ जीवत्पति, [जीवत्पत्नी शि०४२] ।

* पतिरस्ति अस्याः पतिवत्नी 'पतिवत्यन्तर्वत्न्यौ भार्यागर्भिण्योः' ।२।४।४३।। इति ङ्यां साधुः ।

**पतिव्रता**-સ્ત્રી०-५२७-પતિવ્રતા સ્ત્રી.

☐ एकपत्नी, सुचरित्रा, साध्वी, सती ।

* पतिसेवैव व्रतमस्याः पतिव्रता, यत्**स्मृतिः** 'नास्ति स्त्रीणां पृथग् यज्ञो न व्रतमिति ।'

**पत्तन**-ન.-९७१-નગર, મુખ્ય શહેર.

द्र० अधिष्ठानशब्दः ।

* पतन्ति अस्मिन् पत्तनम्, 'चीपति-'(उणा-२९२) इति तनः पट्टनमपि ।

**(पत्तन)**-न.-९७२-५० ગામોમાં શ્રેષ્ઠ નગર.

☐ (पुटभेदन) ।

* **वाचस्पतिः**-

'स्यात् स्थानीयं त्वतिलम्बे, ग्रामो ग्रामोशताष्टके । तदर्द्धं तु द्रोणमुखं, तच्च कर्वटमस्त्रियाम् ।।१।। कर्वटार्द्धं कर्बुटिकं, स्यात्तदर्द्धं तु कार्वटम् । तदर्द्धं पत्तनं तच्च, पत्तनं पुटभेदनम् ।।२।।' इति विशेषमाह ।

**पत्ति**--पुं-४९८-પગે ચાલનાર, પાળો.

☐ पदाति, पद्ग, पदातिक, पादातिक, पादचारिन्, पादाजि, पदिक, [पादाल, पदग शे. १०८] ।

* पद्यते पत्तिः, 'प्लुञ्जायजि'-(उणा-६४६) ।। इति तिः ।

**पत्ति**-स्त्री-७४८-સેના વિશેષ-૧ હાથી, १ રથ, ૩ ઘોડા, ૫ પાયદળવાળું સૈન્ય.

* एकहस्त्यादियुक्ता सेना, पद्यतेऽस्यां पत्तिः । **यदाहुः** "एगो हत्थी एगोय रहवरो तिन्नि चेवयतुरंगा पंचेव य पाइक्का, एसा पत्ती मुणेयव्वा ।।१।।"

**पत्ति**-स्त्री-७५१-પદાતિ, પાળો.

**पत्नी**-સ્ત્રી-५१२-પરણેલી સ્ત્રી.

द्र० ऊढाशब्दः ।

* पत्नीति पतिशब्दात् 'ऊढायाम्' ।२।४।५१।। इति ङीः ऊकारश्चान्तादेशः ।

**पत्र**-पुं-न.-७५९-સર્વજાતનાં વાહન, રથ, હાથી, ઘોડા વગેરે.

द्र० घोरणशब्दः ।

* पतन्ति अनेन पत्त्रम्, पुंक्लीबलिङ्गः, 'नीदाम्व्' । ५।२।८८।। इति त्रट् ।

**पत्र**-पुं-न.-११२३-પાંદડું.

द्र० छदशब्दः ।

* पतति पत्रं, पुंक्लीबलिङ्गः 'हुयामा'-(उणा-४५१) ।। इति त्रः ।

**पत्र**-न.-११८३-(લીંબડા વગેરેનાં) પાન.

* पत्रं निम्बादेः ।

**पत्र**-न.-१३१७-પક્ષીની પાંખ.

द्र० गरुत्शब्दः ।

* पतन्ति अनेन पत्रम्, 'नीदाम्व्' ।५।२।८८।। इति । त्रट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पत्र**-न.-७८४-(शे०१४७)-छरो.

द्र० कृपाणिकाशब्दः ।

**पत्रणा**-स्त्री-७८१-पक्षनुं बाणु स्कंध उपर स्थापवुं ते.

* पत्रणं पत्रणा, तस्य पक्षस्य शरस्कन्धे न्यसनम् ।

**पत्रपरशु**-पुं-९२०- धातु के पांदडा कापवानी छीणी.

☐ व्रश्चन ।

* पत्रकारः पत्राणां वा छेदकः परशुः पत्रपरशुः ।

**पत्रपाल**-पुं-७८४-लांबो छरो.

☐ [हुलमातृका-शे० १४७-कुट्टन्ती, पत्रफला, शे०-१४८] ।

* पत्रेण वालयति रक्षति पत्रपालः ।

**शेष**श्चात्र-'पत्रपालेतु हुल्मातृका । कुट्टन्ती पत्रफला च ।'

**(पत्रपाली)**-स्त्री-७८१- बाणनां पुंखमां रहेला गीध वगेरेनां पींछां.

☐ पक्ष, वाज, (छदावली) ।

**पत्रपाश्या**-स्त्री-६५५- ललाटनुं आभूषण, दामणी.

☐ ललाटिका ।

* पत्रपाशानां समूहः पत्रपाश्या । 'पाशादेश्च ल्यः' ।६।२।२५।।

**पत्रफला**-स्त्री-७८४-(शे० १४८) लांबो छरो.

द्र० पत्रपालशब्दः ।

**(पत्रभङ्गि**-स्त्री-६५५- स्त्रीओनां गाल स्तन वगेरे उपर कस्तूरी आदिथी करेली वेल.

☐ पत्रलेखा, (पत्रभङ्गी), पत्रवल्लि, (पत्रवल्ली), पत्रलता, पत्राङ्गुली, [पत्रवल्लरीव, पत्रमंजरी शि-५३-] ।

* द्राविडकालिङ्गादिभेदेन पत्राकृतिर्भङ्गिः पत्रभङ्गिः स्त्रीणां कपोल स्तन मण्डलादिषु कस्तूरिका दिभिः पत्ररचन

**(पत्रभङ्गी)**-६५५-स्त्रीओनां गालस्तन वगेरे उपर कस्तूरी आदिथी करेली वेल.

द्र० पत्रभङ्गिशब्दः ।

**पत्रमंजरी**-स्त्री-६५५-(शि.-५३) स्त्रीओनां गालस्तन वगेरेउपर कस्तूरी आदिथी करेली वेल.

द्र० पत्रभङ्गिशब्दः ।

**पत्ररथ**-पुं-१३१६-पक्षी.

द्र० अगौकस्शब्दः ।

* पत्राणि पक्षा रथोऽस्य पत्ररथः ।

**पत्रल**-४०६-पातळुं दहीं, छास.

☐ द्रप्स, [द्रप्स्य शि.-२९] ।

* पत्रं लाति पत्रलम् । पत्रमस्यास्तीति वा, सिध्मादित्वाद् लः ।

**पत्रलता**-स्त्री-६५५-स्त्रीओनां गाल स्तन वगेरे उपर कस्तूरी आदिथी करेली रचना.

द्र० पत्रभङ्गिशब्दः ।

**पत्रलेखा**-स्त्री-६५४-स्त्रीओनां गाल स्तन वगेरे उपर कतुरी आदिथी रेली कररचना.

द्र० पत्रभङ्गिशब्दः ।

* द्राविड-कालिङ्गादिभेदेन पत्राकृतिर्लेखा पत्रलेखा स्त्रीणां कपोलस्तनमण्डलादिषु कस्तूरिकादिभिः पत्ररचना ।

**पत्रवल्लरी**-स्त्री-६५५-(शि.-५३)-स्त्रीओनां गालस्तन उपर कस्तूरी आदिथी करेली रचना.

द्र० पत्रभङ्गिशब्दः ।

**पत्रवल्लि**-स्त्री-६५५-स्त्रीओनां गालस्तन वगेरे उपर करेली रचना.

द्र० पत्रभङ्गिशब्दः ।

**(पत्रवल्ली)**-स्त्री-स्त्रीओना गलास्तन वगेरे उपर कस्तूरी आदिथी करेली रचना.

द्र० पत्रभङ्गिशब्दः ।

**पत्रवाह**-पुं-७७८-बाण.

द्र० अजिह्मगशब्दः ।

* पत्राणि वहति पत्रवाहः ।

**पत्राङ्ग**-न.-६४२-रक्त चंदन, रतांजळी.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० कुचन्दनशब्दः ।

* पत्रेषु अङ्गति पत्राङ्गम् ।

**(पत्राङ्गुलि)**–સ્ત્રી–૬૫૫–સ્ત્રીઓના ગાલ સ્તન ઉપર કસ્તૂરી વિ. થી કરેલી વેલની રચના.

द्र० पत्रभङ्गिशब्दः ।

**पत्राङ्गुली**–સ્ત્રી–૬૫૫–સ્ત્રીઓના ગાલ સ્તન ઉપર કસ્તૂરી વિ. થી કરેલી વેલની રચના.

द्र० पत्रभङ्गिशब्दः ।

**पत्रिन्**–પું–૭૭૮–બાણ.

द्र० अजिह्मगशब्दः ।

* पत्राणि अस्य सन्ति पत्री ।

**पत्रिन्**–પું–૧૩૩૪–શ્યેન પક્ષી, બાજ પક્ષી, સીંચાણો.

☐ श्येन, शशादन ।

* पत्री समान्योऽपि विशेषे वर्तते, यत् **शाश्वतः** 'श्येनाख्यो विहगः पत्री पत्त्रिणौ शरपक्षिणौ' इति ।

**पत्रिन्**–પું–૧૩૧૭–પક્ષી.

द्र० अगौकस्शब्दः ।

**पत्रोर्ण**–ન.–૬૬૭–કોશેટાની લાળનું વસ્ત્ર, રેશમી વસ્ત્ર.

☐ धौतकौशेय ।

* लकुच–वटादीनां पत्रेषु कृमिलालोर्णाकृतं पत्त्रोर्णं, पृषोदरादित्वात् ।

**'पथ'**–પું–૯૮૩–રસ્તો.

द्र० अध्वन्शब्दः ।

**पथिक**–પું–૪૯૩–મુસાફર.

द्र० अध्वन्शब्दः ।

* पन्थानं याति पथिकः, 'पथ इकट्' ।६।४ ८८।। अदूरविप्रकर्षादस्य पर्यायत्वम् ।

**(पथिकसार्थ)**–પું–૪૯૩–મુસાફરનો સમુદાય.

☐ हारि ।

* पथिकानां सार्थः– गणः ।

**पथिन्**–પું–૯૮૩–માર્ગ, રસ્તો.

द्र० अध्वनशब्दः ।

* पथन्ति अस्मिन् पन्थाः पुंलिङ्गः, 'पथिमथिभ्याम्' (उणा–९२६) इतीन् ।

**पथ्या**–સ્ત્રી–૧૧૪૬–હરડે

द्र० अभयाशब्दः ।

* पथि साधुः पथ्या हितेऽयर्थः ।

**पद्**–પું–૬૧૬–(શિ. ૪૮)–પગ.

द्र० अंह्रिशब्दः ।

**पद**–ન.–૨૪૨–પદ, સ્યાદિના અંતવાળો કોઈ પણ શબ્દ તે પદ કહેવાય છે.

* पद्यते–गम्यतेऽर्थो ऽनेनेति पदम् वर्षादित्वादल् ।

**पद**–પું ન.–૬૧૬–પગ.

द्र० अंह्रिशब्दः ।

* पद्यतेऽनेन पदः, पुंक्लीबलिङ्गः, वर्षादित्वादल्, पदवि, यद् **व्याडिः**–'पत्पादांह्रिश्चरणोऽस्त्री' इति ।

**पद**–ન.–૯૮૮–સ્થાન.

☐ स्थान, आस्पद ।

* पद्यतेऽस्मिन् पदम्, 'वर्षादयः क्लीबे' ।५।३।२९।। इत्यल् ।

**पदग**–પું–૪૯૮–(શે० ૧૦૮) પગે ચાલનાર, પાળો

द्र० पत्तिशब्दः ।

* **शेषश्चात्र** 'पादातपदगौ समौ'

**पदत्वरा**–સ્ત્રી–૬૧૫–(શે. ૧૫૫) પગરખાં, જોડા, બૂટ.

द्र० उपानत्शब्दः ।

**पदभञ्जन**–ન.–૨૫૪–પદોનો વિભાગ કરવો તે

☐ निरुक्त ।

* पदानि भज्यन्तेऽस्मिन्निति पदभञ्जनम् ।

**पदभञ्जिका**–**स्त्री**–૨૫૬ કઠિન પદોને સ્પષ્ટ કરી અર્થ કરવો તે

* पञ्जिका, (न्यास) ।

* विषमाण्येव पदानि भनक्ति पदभञ्जिका ।

**(पदवि)**–સ્ત્રી–૯૮૩–માર્ગ, રસ્તો.

द्र० अध्वनशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पदवी**-स्त्री-९८३-માર્ગ, રસ્તો.
द्र० अध्वनशब्दः ।
* पद्यन्तेऽनया पदविः, 'छविछिवि-' (उणा-७०६) ॥ इति वौ निपात्यते, ङ्यां पदवी ।

**(पदाजि)**-पुं-४९८-પગે ચાલનાર, પાળો.
द्र० पत्तिशब्दः ।

**पदाति**-पुं-४९७-પગે ચાલનાર, પાળો.
द्र० पत्तिशब्दः ।
* पादाभ्यामतति गच्छति पदातिः, 'पादाच्चात्यजिभ्याम्' (उणा-६२०) इति णिदिः 'पदः पादस्याः' । ३ । २ । ९५ ॥ इति पदादेशः ।

**पदातिक**-पुं-४९७-પગે ચાલનાર, પાળો.
द्र० पत्तिशब्दः ।
* पादाभ्यामतति-पदातिकः 'कुशिकहृदि'-(उणा-४५)॥ इति इके निपात्यते ।

**पदायता**-स्त्री-९१५-(शे. १५६) પગરખાં, જોડા.
द्र० उपानत्शब्दः ।

**पदासन**-न.-७१८-પગ મૂકવાનો બાજોઠ.
☐ पादपीठ ।
* पदयोरासनं पदासनम् ।

**पदिक**-पुं-४९८-પગે ચાલનાર, પાળો.
द्र० पत्तिशब्दः ।
* पादाभ्यां चरति पदिकः, 'पदिकः' ६ । ४ । १३ ॥ इतीकटि निपात्यते ।

**पदग**-पुं-४९७-પગે ચાલનાર, પાળો.
द्र० पत्तिशब्द :
* पादाभ्यां गच्छति पद्गः, 'हिमहति'- ।३। २।९६॥ इत्यत्र मतान्तराश्रयणात् गे पद्भावः ।

**पद्धति**-स्त्री-२५७-ग्रन्थनो અમુક ભાગ.
* अनवच्छिन्नक्रमत्वात् पद्धतिरिव पद्धतिः ।

**पद्धति**-स्त्री-९८३-માર્ગ, રસ્તો.
द्र० अध्वनशब्दः ।
* पादाभ्यां हन्यते पद्धतिः, 'हिमहति'- । ३ । २ । ९६ ॥ इति पदादेशः ।

**पद्म**-पुं-१९३-નવ નિધિ પૈકી બીજો નિધિ.
* पद्माकृतित्वात् पद्मः पुंसि, **वाचस्पतिस्तु**-'पद्मोऽस्त्रियामित्याह ।

**पद्म**-पुं-६९३-૯ મા ચક્રવર્તી.
☐ पद्मोत्तरात्मज ।
* पद्यते निधीनिति पद्मः । 'अर्त्तीरि-' ॥ (उणा-३३८) ॥ इति मः ।

**पद्म**-पुं-६९८-૮ મા બળદેવ.
द्र० अचलशब्दः ।
* पद्यते पद्मः ।

**पद्म**-पुं न.-११६०-કમળ.
द्र० अरविन्दशब्दः ।
* पद्यते पद्मम् । 'अर्त्तीरि-' (उणा-३३८) ॥ इति मः । एषः पुंक्लीबलिङ्गः ।

**पद्म**-न.-१२२९-હાથીના શરીર ઉપર જુવાનીમાં થતા રાતા બિંદુઓ.
☐ 'पद्मक ।
* पद्ममिव पद्मं रक्तत्वात् ।

**पद्म**-पुं-१५७-(शे. २६) ગ્રીષ્મ ઋતુ, જેઠ અને અષાઢ મહીનો.
द्र० उष्णशब्दः ।

**'पद्मक'**-न.-१२२९-હાથીના શરીર ઉપર જુવાનીમાં થતા રાતા બિંદુઓ.
☐ पद्म ।

**पद्मगर्भ**-पुं-२१९-(शे. ७३) વિષ્ણુ, કૃષ્ણ.
द्र० अच्युतशब्दः ।

**पद्मनाभ**-पुं-५३-આવતી ચોવીશીના પ્રથમ તીર્થંકર.
* पद्मं नाभावस्य पद्मनाभः । 'नाभेर्नाम्नि' । ७ । ३ । १३४ ॥ इति अप्समासान्तः ।

**पद्मनाभ**-पुं-२१५-વિષ્ણુ, કૃષ્ણ.
द्र० अच्युतशब्दः ।
* पद्मं नाभावस्य पद्मनाभः, 'नाभेर्नाम्नि' । ७ । ३ । १३४ ॥ इत्यप्समासान्तः ।

**पद्मनाल**-न.-११६५-કમળની નાળ.
द्र० तन्तुलशब्दः ।
* पद्मस्य नालं पद्मनालम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पद्मप्रभ**-पुं-२६-छठ्ठा तीर्थंकर श्रीपद्मप्रभ.

* निष्पङ्कतामङ्गीकृत्य पद्मस्येव प्रभाऽस्य पद्मप्रभः, यद्वा पद्मशयनदोहदो मातुः देवतया पूरित इति पद्मवर्णश्च भगवानिति वा पद्मप्रभः ।

**(पद्मपाणि)**-पुं-९६-सूर्य.

द्र० अंशुशब्दः ।

**(पद्मबन्धु)**-पुं-९६-सूर्य.

द्र० अंशुशब्दः ।

**पद्मभू**-पुं-२१३-ब्रह्मा.

द्र० अजशब्दः ।

* पद्माद् भवति पद्मभूः, यौगिकत्वात् कमलजन्माऽपि ।

**पद्मराग**-पुं-न.-१०६४-पद्मराग मणि, माणेक.

☐ लोहितक, लक्ष्मीपुष्प, अरुणोपल, [शोणरत्न शि. ६४] ।

* पद्मस्येव रागोऽस्य पद्मरागः, पुंक्लीबलिङ्गः ।

**पद्मवासा**-स्त्री-२२६-लक्ष्मी.

द्र० आशब्दः ।

* पद्मे वासोऽस्याः पद्मवासा ।

**पद्महास**-पुं-२१९-(शे. ७३)-विष्णु, कृष्ण.

द्र० अच्युतशब्दः ।

**पद्मा**-स्त्री-४०-वीश मां तीर्थंकरनी माताnुं नाम.

* पद्मेव पद्मा ।

**पद्मा**-स्त्री-२२६-लक्ष्मी.

द्र० आशब्दः ।

* पद्ममस्ति अस्याः पद्मा, अभ्रादित्वाद्, अः ।

**पद्माकर**-पुं-१०९४-तळाव.

द्र० कासारशब्दः ।

* पद्मानामाकरः पद्माकरः, योग्यत्वात् ।

**'पद्माट'**-पुं-११५८-कुंवाडियो.

द्र० एडगजशब्दः ।

**पद्मावती**-स्त्री-४६-श्री पार्श्वनाथजीनी शासन देवता

* पद्मं करेऽस्ति अस्याः पद्मावती । 'अनजिरादि'- ।३।२।७८।। इति मतौ दीर्घत्वम् ।

**पद्मिन्**-पुं-१२१८-(शे. १७५) हाथी.

द्र० अनेकपशब्दः ।

**'पद्मिनी'**-स्त्री-११६०-कमलनो वेलो.

द्र० नलिनीशब्दः ।

**(पद्मिनीश)**-पुं-९७-सूर्य.

द्र० अंशुशब्दः ।

**पद्मेशय**-पुं-२१५-विष्णु, कृष्ण.

द्र० अच्युतशब्दः ।

* पद्मे शेते पद्मेशयः, 'शयवासिवासेष्वकालात्' ।३।२।२५।। इति सप्तम्या अलुप् ।

**पद्मोत्तरात्मज**-पुं-६९३-९मां चक्रवर्ती.

☐ पद्म ।

* पद्मोत्तरस्य आत्मजः पुत्रः पद्मोत्तरात्मजः ।

**पद्य**-पुं-८९४-शूद्र.

द्र० अन्त्यवर्णशब्दः ।

*ब्रह्मणः पादयोर्भवः पद्यः, देहांशत्वाद् यः, 'हिमहति'-।३।२।९६।। इति पदादेशः ।

**पद्या**-स्त्री-९८३-मार्ग, रस्तो.

द्र० अध्वन्शब्दः ।

* पदमस्यां दृश्यं पद्या, 'हृद्यपद्य'-।७।१।११।। इति यः ।

**पन्न**-न.-१४९१-पडी गयेलुं, गळेलुं.

द्र० गलितशब्दः ।

* पद्यते स्म पन्नम् ।

**पन्नग**-पुं-१३०४-सर्प.

द्र० अहिशब्दः ।

* पद्भ्यां न गच्छति पन्नगः, नखादित्वात्, पन्नं गच्छतीति वा ।

**पन्नद्धा**-स्त्री-९१४-पगरखां, जोडा.

द्र० उपानत्शब्दः ।

* पदोर्नद्धा पन्नद्धा ।

**पपी**-पुं-९८-(शे.-६)-सूर्य.

द्र० अंशुशब्दः ।

**(पयःपयस्)**-पुं-१०७५-दूध सागर, क्षीर सागर.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पयस्**-न.-४०४-દૂધ.

द्र० ऊधस्यशब्दः ।

* पीयते पयः, 'पाह्कृभ्यां पयश्चौ च' (उणा-९५३) इत्यस् ।

**पयस्**-न.-१०६९- પાણી.

द्र० अप्शब्दः ।

* पयते गच्छति वा 'अस्' (उणा-९५२) इत्यस् ।

**पयस्य**-न.-४०५-ઘી, દહીં, માખણ વગેરે.

* पयसो विकारः पयस्यम्, 'पयोद्रोय':' ।६।२।३५।। इति यः, आदिशब्दान्नवनीतादि ।

**पयस्या**-स्त्री-८३१-ગરમ દૂધમાં નાખેલું દહીં.

☐ आमिक्षा, क्षीरशर ।

* पयसो विकारः पयस्या, 'पयोद्रोय':' ।६।२।३५।। इति यः ।

**पयोधर**-पुं-(द्वि. व.) ६०३-સ્તન.

द्र० उरोजशब्दः ।

* पयो दुग्धं धरतः पयोधरौ ।

**पर**-पुं-७२८-શત્રુ.

द्र० अभिमातिशब्दः ।

* प्रियते परः ।

**पर**-न,-१४३९-મુખ્ય, પ્રધાન.

द्र० अग्रशब्दः ।

* पिपर्ति परम् । वाच्यलिङ्गः ।

**पर**-न.-१४५२-દૂર.

☐ विप्रकृष्ट, दूर ।

* पिपर्ति परम् ।

**परःशत**-पुं-१४२५-સૌથી વધારે.

* येषां सङ्ख्येयानां शतात् परा-शतादूर्ध्वं सङ्ख्या ते शतात् परे परःशताः कुञ्जराः, 'परः शतादिः' ।३।१।७५।। इति पञ्चमीतत्पुरुषे साधुः । आदिग्रहणात् परःसहस्रा, परोलक्षा इत्यादयः ।

(**परःसहस्र**)-पुं-१४२५-હજારથી વધારે.

**परच्छन्द**-पुं-३५६-પરતંત્ર, પરાધીન.

द्र० गृह्यकशब्दः ।

* परस्य च्छन्दोऽस्य परच्छन्दः ।

**परजात**-पुं-३६१-ચાકર.

द्र० किङ्करशब्दः ।

* परेण जातः परजातः ।

**परञ्जन**-पुं-१८८-વરુણ દેવતા, જલ દેવતા.

द्र० अर्णवमन्दिरशब्दः ।

* परं जयति परञ्जनः, 'विदनगगन'- (उणा-२७५) इत्यादिशब्दान्निपात्यते ।

**परतन्त्र**-पुं-३५६-પરાધીન.

द्र० गृह्यकशब्दः ।

* परस्य तन्त्रमायत्तः परतन्त्रः ।

**परपिण्डाद्**-पुं-३६१-ચાકર.

द्र० किङ्करशब्दः ।

* परस्य पिण्डमत्ति परपिण्डादः ।

**परपुष्ट**-पुं-१३२१-(शे. ११७) કોયલ.

द्र० कलकण्ठशब्दः ।

* (परेण पुष्यते परपुष्टः, काकीपुष्टत्वात् ।)

**परमब्रह्मचारिणी**-स्त्री-२०५-(शे. ५०) પાર્વતી.

द्र० अद्रिजाशब्दः ।

**परभाग**-पुं-१३७५-ગુણોનું ઉત્કૃષ્ટપણું, ઉત્કર્ષ.

☐ गुणोत्कर्ष ।

* परस्य भजनं परभागः ।

'**परभृत**,-पुं-१३२२-કાગડો.

द्र० अन्यभृत्शब्दः ।

'**परभृत**'-पुं-१३२१-કોયલ.

द्र० कलकण्ठशब्दः ।

* परेण-अन्येन भ्रियते पुष्यते परभृतः, काकी पुष्टत्वात् । अन्यभृतपरपुष्टावपि ।

**परमद**-पुं-६४०-(शे. १३२) અગરુ, અગર.

द्र० अगरुशब्दः ।

**परमम्**-अ.-१५४०-હા, સ્વીકાર જણાવનાર અવ્યય.

☐ ओम, आम् ।

* परमं-विभक्त्यन्तप्रतिरूपकम् । यथा परमं तत्रावासम् ।

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

**परमरस**-पुं-४०९-(शे. १०१) પા ભાગના પાણી વાળું દહીં.

द्र० तक्रशब्दः ।

**परमान्न**-न.-४०६-દૂધપાક, ખીર.

☐ पायस, क्षैरेयी ।

※ परमं च तदन्नं च परमान्नम् ।

**परमार्हत**-पुं-७१२-કુમારપાળ રાજા.

द्र० कुमारपालशब्दः ।

※ अर्हन् देवताऽस्य आर्हतः, परमः क्षमादिगुणधारणात्, स चासौ आर्हतश्च परमार्हतः ।

**परमेष्ठिन्**-पुं-२४-અરિહંત, તીર્થંકર.

द्र० अधीश्वरशब्दः ।

※ परमे पदे तिष्ठतीति परमेष्ठी, 'परमात्स्थः कित्' (उणा-९२५) ॥ इति इनि प्रत्यये भीरुष्ठादित्वात् षत्वं सप्तम्या अलुप् च ।

**परमेष्ठिन्**-पुं-२११-બ્રહ્મા.

द्र० अजशब्दः ।

※ परमे पदे तिष्ठतीति परमेष्ठी, 'परमात्स्थः कित्' (उणा-९२५) ॥ इति इनि प्रत्यये भीरुष्ठानादित्वात् षत्वं सप्तम्या अलुप् च ।

**परम्पर**-पुं-५४४-પ્રપૌત્રનો પુત્ર.

※ परात्परतरः परम्परः, पृषोदरादित्वात् परम्पराऽस्यास्तीति वा ।

**परम्पराक**-न.-८३०-યજ્ઞમાં થતો પશુનો વધ.

☐ शसन, प्रोक्षण, [शमन शि. ७२] ।

※ परम्परामकति परम्पराकम् ।

**परलोकगम**-पुं-३२३-મૃત્યુ.

द्र० अत्ययशब्दः ।

※ परलोके गमनं परलोकगमः ।

**परवत्**-पुं-३५६-પરાધીન.

द्र० गृह्यकशब्दः ।

※ परो नियन्ताऽस्ति अस्य परवान् ।

**परवश**-पुं-३५६-પરાધીન.

द्र० गृह्यकशब्दः।

※ परस्य वशः परवशः ।

**परवाणि**-पुं-१५९-(शे. २७) વરસ.

द्र० अब्दशब्दः ।

**परशु**-पुं-७८६-કુહાડો.

द्र० कुठारशब्दः ।

※ परान् शृणाति परशुः, 'पराद्भ्यां शृखनिभ्यां डित्'-(उणा-७४२) ॥ इत्युः ।

(**परशुधर**)-पुं-२०७-ગણેશ, ગણપતિ.

द्र० आखुगशब्दः ।

**परशुराम**-पुं-८४८-(शे. ७४) પરશુરામ, જમદગ્નિનો પુત્ર.

द्र० जामदग्न्यशब्दः ।

**परश्वध**-पुं-७८६-પરશુ, કુહાડો.

द्र० कुठारशब्दः ।

※ परान् शृणाति परश्वधः, 'परात् श्रो डित्'-(उणा-२५५) ॥ इति वधः ।

**परश्वधायुध**-पुं-७७०-કુહાડીવાળો.

☐ पारश्वधिक, पारश्वध ।

※ परश्वधः आयुधम स्य परश्वधायुधः ।

**परश्वस्**-अ.-१५४२-(शे. २०२) આવતી કાલે, પરમ દિવસે.

**परस्पर**-न.-१४९९-પરસ્પર.

☐ अन्योन्य, इतरेतर । (मिथस्-अव्य.)

※ परस्परादयस्त्रयोऽपि स्वभावाद् एकत्वपुंस्त्ववृत्तयः कर्मव्यतिहारविषयाः 'परस्परान्योन्येतरेतरस्याम् स्यादेर्वा पुंसि' ।३।२।१॥ इति सूत्रनिर्देशात् परान्येतरशब्दानां सर्वनाम्नां द्विर्वचनादिनिपातनात् साधवः ।

**परस्वेहा**-स्त्री-४३१-પારકું ધન હરણ કરવાની ઇચ્છા.

☐ अभिध्या, (विषमस्पृहा, विषमप्रार्थना) ।

※ परस्वविषया स्पृहा परस्वेहा, परस्वे विषयस्पृहे त्येके । दोषचिन्तापूर्वं परस्वे लिप्सेत्यर्थः ।

**पराक्रम**-पुं-७३९-પરાક્રમ.

☐ पौरुष, विक्रम, शौर्य, शौण्डीर्य ।

※ पराक्रमणं पराक्रमः ।

**पराक्रम**-पुं-७९६-પરાક્રમ.

द्र० उज्जशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* पराक्रमन्तेऽनेन पराक्रमः।

**पराक्रम**-पुं-२१९-(शे. ७३) વિષ્ણુ, કૃષ્ણ.

द्र० अच्युतशब्दः।

**पराग** पुं-११२६-ફૂલની રજ.

* परागच्छति परागः, पुष्पाणां रजः।

**पराङ्मुख**-न.-१४३७-વિમુખ, અવળું.

☐ पराचीन।

* पराङ्मुखममस्य पराङ्मुखम्।

**पराचित**-पुं-३६०-ચાકર.

द्र० किङ्करशब्दः।

* परैराचीयते वध्यते पराचितः।

**पराचीन**-न.-१४३७-વિમુખ, અવળું.

☐ पराङ्मुख।

* पराञ्चति पराक्, परागेव पराचीनम्, 'अदिक् स्त्रियां वाञ्चः' ।७।१।१०७।। इति स्वार्थे ईनः।

**पराजय**-पुं-८०३-રણમાં હારવું તે.

* पराजयनं पराजयः।

**पराजित**-पुं-८०५-હારેલો.

द्र० अभिभूतशब्दः।

* पराजीयते स्म पराजितः।

**पराधीन**-पुं-३५६-પરાધીન, પરવશ.

द्र० गृह्यकशब्दः।

* परस्याधीनः पराधीनः।

**परान्न**-पुं-३६१-ચાકર.

द्र० किङ्करशब्दः।

* परस्याऽन्नमस्य परान्नः।

**पराभव**-पुं-४४१-પરાભવ, તિરસ્કાર.

द्र० अत्याकारशब्दः।

**पराभूत**-पुं-८०५-હારેલો.

द्र० अभिभूतशब्दः।

**परामर्श**-पुं-३२२-વિચારણા.

द्र० अध्याहारशब्दः।

* परामृश्यते परामर्शः।

**परायत्त**-पुं-३५६-પરાધીન.

द्र० गृह्यकशब्दः।

* परस्यायत्तः परायत्तः।

**परायण**-पुं-३८५-તત્પર, આસક્ત.

द्र० आसक्तशब्दः।

* परं कार्यं पारमयते परायणः।

**परारि**-अ.-१५४२-(शे. २०५) છેલ્લી સાલની આગલી, સાલ, પરાર.

**परार्द्ध**-न.-८७४-દશ મધ્ય પ્રમાણ, પરાર્ધ.

* दशमध्यानि परार्द्धम् 'विंशत्यादयः' ।६।४।१६३।। इति निपात्यते।

**परार्घ्य**-न.-१४३९-મુખ્ય, પ્રધાન.

द्र० अग्रशब्दः।

* परार्द्धे भवं परार्घ्यम्। 'परावरा'-।६।३।७३।। इति यः।

**परार्बुद**-पुं-१२१३-(शे. १७५) ખદ્યોત, આગીઓ.

☐ खद्योत ज्योतिरिङ्गण।

**परावर्त्त**-पुं-८७०-ફેરફાર કરવો, અદલો-બદલો કરવો તે.

द्र० निमयशब्दः।

* परावर्त्तनं परावर्त्तः।

**पराविद्ध**-पुं-२१९-(शे. ६७) વિષ્ણુ, કૃષ્ણ.

द्र० अच्युतशब्दः।

**परावृत्त**-न.-१२४५-ઘોડાનું જમીન ઉપર આળોટવું તે.

☐ अपावृत्त, लुठित, वेल्लित।

* परावर्त्तनं परावृत्तम्।

**परास**-न.-१०४२-(शे. १६१)-કલઈ, સીસું.

द्र० आलीनशब्दः।

**परासन**-न.-३७०-હિંસા.

द्र० अपासनशब्दः।

* परापूर्वस्य अस्यतेः परासनम्।

**परासु**-पुं-३७४-મૃત્યુ પામેલો.

द्र० उपगतशब्दः।

* परा गता असवः प्राणाः अस्य परासुः।

**परास्कन्दिन्**-पुं-३८२-ચોર.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० एकागारिकशब्दः ।

* परानास्कन्दति परास्कन्दी ।

**परिकर**-પું-૬૭૯-પલાંઠી.

द्र० अवसक्थिकाशब्दः ।

* परिक्रियते वपुरनेन परिकरः, 'पुन्नाम्नि'-।५।३।१३०॥ इति घः ।

**परिकर**-પું-૭૧૫-પરિવાર, નોકર, ચાકર.

द्र० उपकरणशब्दः ।

* परिकीर्यते, परिकरोति वा परिकरः ।

**परिकर्मन्**-ન.-૨૪૬-૧૨ મા દષ્ટિવાદ અંગના પાંચભેદ પૈકી પહેલોભેદ.

**परिकर्मन्** ન.-૬૩૫૬-સ્નાન, વિલેપન વગેરેથી, થતા સંસ્કાર.

☐ मण्डन, प्रसाधन ।

* प्रत्यङ्गं कर्म प्रतिकर्म ।

**परिकर्मिन्**-પું-૩૬૦-ચાકર.

द्र० किङ्करशब्दः ।

* परितः कर्माऽस्यास्ति परिकर्मी, शिखादित्वादिन् ।

**परिकूट**-પું ન.-૯૮૨-નગરના દરવાજા પાસે ચડવા ઊતરવાનો ઢાળ.

☐ हस्तिनख, नगरद्वारकूटक, (नगरद्वारकूट) ।

* परितः कूट्यते परिकूटम् पुंक्लीबलिङ्गः ।

**परिक्रम**-પું-૧૫૦૦-વિહાર, પગે ચાલવું તે.

☐ गति, वीङ्खा, विहार, ईर्या, परिसर्प ।

* परिक्रमणं परिक्रमः ।

**परिक्षिप्त**-ન.-૧૪૭૪-ઘેરાયેલું, વીંટાયેલું.

☐ वलयित, निवृत्त, परिवेष्टित, परिष्कृत, परीत ।

* परिक्षिप्यते स्म परिक्षिप्तम् ।

**परिखा**-સ્ત્રી-૧૦૯૫-ખાઇ.

☐ खेय, खातिका ।

* परिखन्यते परिखा, 'क्वचित्'-।५।१।१७१॥ इति डः ।

**परिग्रह**-પું-૫૧૩-પત્ની, સહચારિણી.

द्र० ऊढाशब्दः ।

* परिगृह्यते परिग्रहः ।

**परिग्रह** પું-૭૧૫-નોકર, ચાકર, પરિવાર.

द्र० उपकरणशब्दः ।

* परिगृह्यते परिग्रहः ।

**परिघ**-પું-૭૮૬-લોઢાથી બંધાયેલી લાકડી, કડિયાળી ડાંગ.

☐ परिघातन [पलिघ शि. ६८]

* परिहन्यतेऽनेन परिघः, लोहबद्धो लगुडः, 'परेर्घः'-।५।३।४०॥ इत्यलि घादेशः । लत्वे पलिघोऽपि ।

**परिघ**-પું-૧૦૦૪-ભોગળ, કમાડ બંધ કરી પછવાડે નાખેલ લોઢા કે લાકડાનો દંડ.

☐ अर्गला ।

* परिहण्यतेऽनेन परिघः, दारुमयो लौहो वा दण्डः, 'परेर्घः' ।५।३।४०॥ इत्यल् ।

**परिघातन**-પું-૭૮૬-કડિયાળી ડાંગ.

☐ परिघ, [पलिघ शि. ६८] ।

* परिघात्यतेऽनेन परिघातनः ।

**परिचय**-પું-૧૫૧૩-ઓળખાણ.

☐ संस्तव ।

* समन्ताच्चयनं परिचयः ।

**परिचर**-પું-૭૬૫-દંડનાયક, સેનાનું રક્ષણ કરનાર, ચોકીદાર.

☐ परिधिस्थ ।

* परितः-समन्तात् चरति रक्षितुं परिचरः ।

**परिचर्या**-સ્ત્રી-૪૯૬-સેવા, ભક્તિ.

द्र० आराधनाशब्दः ।

* परिचरणं परिचर्या ।

**परिचारक**-પું-૩૫૯-ચાકર.

द्र० किङ्करशब्दः ।

* परिचरति परिचारकः, प्रतिचरोऽपि ।

**परिच्छद**-પું-૭૧૬-નોકર-ચાકર વગેરે પરિવાર.

द्र० उपकरणशब्दः ।

* परितश्छाद्यतेऽनेन परिच्छदः, 'पुंनाम्नि'-।५।३।१३०॥ इति घे 'एकोपसर्गस्य'-।४।२।३४॥ इति ह्रस्वः ।

**परिजन**-પું-૭૧૬-(શે- ६१) નોકર-ચાકર વગેરે પરિવાર.

द्र० उपकरणशब्दः ।

**परिज्वन्**-પું-૧૦૫ (શે० ૧૪) ચન્દ્ર.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० अत्रिदृग्जशब्दः ।

**परिणत**-પું-૧૨૨૧-વાંકો ઘા કરનાર હાથી.

☐ तिर्यग्घातिन् ।

* परितो नमति स्म परिणतः ।

**परिणत**-न.-૧૪૮૫-પાકેલું.

☐ पक्व ।

* परिणमते स्म परिणतम् ।

**परिणय**-પું-૫૧૮-વિવાહ.

द्र० उद्वाहशब्दः ।

* परिणयनं परिणयः ।

**परिणाम**-પું-૧૫૧૮-ફેરફાર, વિચાર.

☐ विक्रिया, [विकार, विकृति शे. ३७] ।

* परिणमनं परिणामः ।

**परिणाय**-પું-૪૮૭-પાસા પ્રમાણે સોગઠા ફેરવવા તે.

* वामदक्षिणयोः शारीणां परिणयनं परिणायः 'परेद्यू'ते' ।५।३।६३।। इति घञ् ।

**परिणाह**-પું-૧૪૩૧-પહોળાઈ.

☐ विशालता ।

* परिणह्यतेऽनेन परिणाहः ।

**परिणाह**-પું-૨૦૦-(શે ४३) શંકર.

द्र० अट्टहासिन्शब्दः ।

**परिणेतृ**-પું-૫૧૭-(શે. ૪૨) પતિ, વર.

द्र० कान्तशब्दः ।

**परितस्**-અ.-૧૫૨૯-ચારે બાજુ, સર્વ તરફ.

☐ सर्वतस्, विश्वक्, समन्तत्. समन्ततस् ।

* 'पर्यभेः सर्वोभये' ।७।२।८३।। इति तसौ परितः यथा-परितो ग्रामम् ।

**परित्राण**-न. ૧૫૦૨-રક્ષણીયને બચાવવું, મારવા તૈયાર થયેલાને રોકવો તે.

☐ पर्याप्ति, हस्तधारण, (हस्तस्थापन) ।

* परित्रायते परित्राणम् ।

**परित्राण**-न.-૬૩૦-(શે. ૧૨૯) રોમ, રૂંવાડા.

द्र० तनूरुहशब्दः ।

(**परित्याग**-પું-)૭૩૮-ત્યાગ (૪ પૈકી પૈસાને છોડી દેવારૂપે એક અર્થ દૂષણ).

**परिदान**-न.-૮૬૯-સાટું, અદલો બદલો કરવો તે.

द्र० निमयशब्दः ।

* परिवर्ताद् दानं परिदानम् ।

**परिदान**-न-૮૭૦-(શે. ૭૭) થાપણ પાછી આપવી.

☐ प्रतिदान, न्यासार्पण ।

**परिदेवन**-न.-૨૭૫-શોક કરવો.

☐ विलाप (उपशोचन) ।

* परिदेवनं उपशोचनमित्यर्थः ।

**परिधान**-न.-૬૭૨-નીચે પહેરવાનું વસ્ત્ર.

द्र० अधोंऽशुकशब्दः ।

* परिधीयते परिधानमधोवसनम् ।

**परिधि**-પું-૧૦૨-મંડલ, ચન્દ્રસૂર્યની ચારે બાજુ પરિધિ.

☐ मण्डल, उपसूर्यक, परिवेष ।

* परितो धीयते परिधिः, पुंलिङ्गः, 'उपसर्गाद्दः किः' ।५।३।८७।। इति किः ।

**परिधिस्थ**-પું-૭૬૫-સૈન્યની બંદોબસ્ત રાખનાર દંડનાયક.

☐ परिचर ।

* परिधौ सेनान्ते तिष्ठति परिधिस्थः ।

**परिपण**-પું-૮૬૧-મૂલધન, પુંજી, મૂડી,

☐ मूलद्रव्य, नीवी ,(नीवि) ।

* परिपण्यते वृद्ध्यर्थं परिपणः । 'पणेर्माने'-।५।३।३२।। इत्यल् ।

**परिपन्थक**-પું-૭૨૯-શત્રુ.

द्र० अभिमातिशब्दः ।

* परितः पन्थयति-गच्छति परिपन्थकः, परिपन्थी ।

**परिपन्थिन**-પું-૭૨૯-શત્રુ.

द्र० अभिमातिशब्दः ।

* परितः पन्थयति-गच्छति परिपन्थकः, परिपन्थी ।

**परिपाटि**-स्त्री- ૫૦૪-અનુક્રમ.

द्र० अनुक्रमशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* परिपाटनं परिपाटिः, स्त्रीलिङ्गः, 'स्वरेभ्य इः' (उणा–६०६)॥ ङ्यां परिपाटी।

**परिपाटी**–સ્ત્રી–૧૫૦૪–અનુક્રમ.

द्र० अनुक्रमशब्दः।

* परिपाटनं परिपाटिः, स्त्रीलिङ्गः, 'स्वरेभ्य इः' (उणा–६०६)॥ ङ्यां परिपाटी।

**परिपूर्णसहस्रचन्द्रवती**–સ્ત્રી–૧૭૫–(શે. ૩૪) ઇન્દ્રાણી.

द्र० इन्द्राणीशब्दः।

**परिप्लव**–ન.–૧૪૫૫–ચલ, ચંચલ, ચપલ.

द्र० अस्थिरशब्दः।

* परिप्लवते परिप्लवम्।

**परिप्लुता**–સ્ત્રી–૯૦૨–મદિરા.

द्र० अब्धिजाशब्दः।

* परिप्लवते स्म परिप्लुता।

**परिभव**–પું–૪૪૧–પરાભવ, તિરસ્કાર.

द्र० अत्याकारशब्दः।

**परिभव**–પું–૧૪૭૯–અનાદર.

द्र० अनादरशब्दः।

**परिभाव**–પું–૪૪૧–તિરસ્કાર.

द्र० अत्याकारशब्दः।

* परिभवनं परिभावो, बाहुलकाद् घञ्।

**परिभाषण**–ન.–૨૭૪–નિન્દાપૂર્વક ઠપકો આપવો તે,

* यः सनिन्दः उपालम्भस्तत्रस्यात् परिभाषणम्। मैवं कृथा इति वाच्यत इत्यर्थः।

**'परिभूत'**–પું–૮૦૫–હારેલો પરાજિત.

द्र० अभिभूतशब्दः।

* परिभूयते स्म परिभूतः।

**परिभूत**–ન.–૧૪૭૯–તિરસ્કારેલું.

द्र० अनादृतशब्दः।

**परिमण्डल**–ન.–૧૪૬૭–ગોળ.

☐ वर्तुल, वृत्त, निस्तल।

* परितो मण्डलाकृति परिमण्डलम्।

**परिमल**–પું–૧૩૯૧–મર્દન કરવાથી ઉત્પન્ન થયેલ સુગંધ.

* परिमलते परिमलः। रतविकसद्देहाङ्गराग परिमलनोत्पन्नो हृद्यो गन्धः।

**परिमोषिन्**–પું–૩૮૨–ચોર.

द्र० एकागारिकशब्दः।

* परिमुष्णातीत्येवंशीलः परिमोषी।

**परिरम्भ**–પું–૧૫૦૭–(શે० ૧૩૬) આલિંગન.

द्र० अङ्कपालीशब्दः।

**परिवत्सर**–પું–૧૫૯–વરસ.

द्र० अब्दशब्दः।

**परिवर्त्त**–પું–૧૬૫૧–પ્રલયકાળ, ક્ષય.

द्र० कल्पशब्दः।

* परिवर्तते जगदत्र परिवर्त्तः।

**परिवर्तन**–ન.–૮૬૯–ફેરફાર કરવો તે.

द्र० निमयशब्दः।

* परिवर्त्यते परिवर्तनम्।

**परिवर्ह**–પું–૭૧૬– નોકર, ચાકર વગેરે પરિવાર.

द्र० उपकरणशब्दः।

* परिवर्हति वर्धते परिवर्हते प्राधान्यं भजति हिनस्ति वा, परिवृहति उद्यच्छते वाऽनेन परिवर्हः परिवर्हणमपि।

**परिवर्हण**–ન.–૭૧૬–(શિ. ६१)નોકર, ચાકર વગેરે પરિવાર.

द्र० उपकरणशब्दः।

**परिवसथ**–પું–૯૬૧–ગામ.

द्र० उपवसथशब्दः।

**परिवाद**–પું–૨૭૧–નિંદા.

द्र० अपवादशब्दः।

**परिवादिनी**–સ્ત્રી–૨૮૮–સાત તારવાળી વીણા.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* स्वरान् परिस्फुटं वदति एवंशीला परिवादिनी । सप्तभिस्तन्त्रीभिः परिवादिनी ।

**परिवापण**-न.-९२३-હજામત.

द्र० क्षौरशब्दः ।

* परिवाप्यते परिवापणम् ।

**परिवार**-पुं-७१५-નોકર, ચાકર આદિ.

द्र० उपकरणशब्दः ।

परिवार्यतेऽनेन परिवारयति वा परिवारः ।

**(परिवार)**-पुं-७८३-મ્યાન.

द्र० कोशशब्दः ।

* परिव्रियतेऽनेन परिवारः ।

**परिवारक**-पुं-४०१-(शे. ५५) ચોખાની ધાણી.

द्र० अक्षतशब्दः ।

**परिवाह**-पुं-१०८८-વધી ગયેલા પાણીને નીકળવાનો માર્ગ.

☐ परीवाह, जलोच्छ्वास ।

* जलं प्रवृद्धं परिवहति यैर्निर्गममार्गैस्ते परिवाहाः ।


**प्रघात**–पुं–७९७–યુદ્ધ, લડાઈ.
द्र० अनीकशब्दः ।
* प्रकर्षेण घ्नन्ति अत्र प्रघातः ।

**प्रचक्र**–न.–७९०–ચાલેલું લશ્કર.
*प्रस्थितं चक्रं–सैन्यं प्रचक्रम् ।

**प्रचक्षस्**–पुं–११९–(शे.–१५)–ગુરુ, બૃહસ્પતિ.
द्र० अङ्गिरसशब्दः ।

**प्रचलाक**–पुं–१३२०–મોરનું પીછું.
☐ पिच्छ, बर्ह, शिखण्डक, (शिखण्ड), कलाप।
* प्रचलति प्रचलाकः, 'मवाक'–(उणा–३७)।। इति निपातनादाकः, प्रचलमकत्यनेन वा ।

**प्रचलायित**–पुं–४४२–બેઠાં બેઠા ઉંઘનાર.
☐ घूर्णित ।
* प्रचला–निद्राविशेषो यस्यामुपविष्टोऽपि घूर्णते, अप्रचलावान् प्रचलावान् भवति स्म प्रचलायितः, लोहितादित्वात् क्यङि क्तः, प्रचल इवाचरितो वा ।

**प्रचुर**–न.–१४२५–બહુ, ઘણું.
द्र० अदभ्रशब्दः ।
* प्रचीयते प्रचोर्यते वा प्रचुरम्, 'खुरक्षुर'–(उणा–३९६) ।। इति रे निपात्यते ।

**प्रचेतस्**–पुं–१८८–વરુણ દેવ.
द्र० अर्णवमन्दिरशब्दः ।
* प्रकृष्टं चेतोऽस्य, प्रचेतयते वा प्रचेता ।

**'प्रचोदनी'**–स्त्री–११५७–બેઠી ભોંય રીંગણી.
द्र० कण्टकारिकाशब्दः ।

**प्रच्छदपट**–पुं–६७६–ઓછાડ, ઉત્તરપટ.
☐ निचोल, निचुल, (निचुलक), उत्तरच्छद ।
* प्रच्छाद्यतेऽनेन प्रच्छदः । 'पुन्नम्नि'– ।५।३।१३०।। इति घे 'एकोपसर्गस्य'–।४।२।३४।।– इति ह्रस्वः, स चासौ पटश्च प्रच्छदपटः ।

**प्रच्छन्न**–न.–१००७–ગુપ્તદ્વાર, અંદરનું બારણું.
☐ अन्तर्द्वार ।
* प्रकर्षेण छाद्यते स्म प्रच्छन्नम्, गृहस्य मध्यद्वारम् एकमेतदिति **कात्यो** यदाह–'प्रच्छन्न-मन्तर्द्वारं यत् पक्षद्वारं तदुच्यते ।'

**प्रच्छर्दिका**–स्त्री–४६९ ઊલટી, વમન.
☐ छर्दि, छर्दिष्, वमथु, वमन, 'वमि' ।
* प्रच्छर्दनं प्रच्छर्दिका ।

**प्रच्छादन**–न.–६७१–ઓઢવાનું વસ્ત્ર.
☐ प्रावरण, संव्यान, उत्तरीयक ।
* प्रच्छाद्यतेऽनेन प्रच्छादनम् ।

**प्रजन**–पुं–१२७४–પશુઓનો ગર્ભગ્રહણ-કાળ, ગર્ભાધાન.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐ उपसर ।

* प्रजायतेऽस्मिन् पशूनां गर्भग्रहणकालः प्रजनः, 'न जनवधः' ।४।३।५४।। इति घञि वृद्धयभावः ।

**प्रजनन**–न.–६११–સ્ત્રી-પુરુષનું ચિહ્ન, યોનિ-લિંગ.

☐ गुह्य, उपस्थ ।

* प्रजन्यतेऽनेन प्रजननम् ।

**प्रजनुक**–पुं–५६४–(શે. ११८) શરીર.

द्र० अङ्गशब्दः ।

**प्रजा**–स्त्री–५०१ પ્રજા, લોક.

☐ लोक, जन ।

* प्रजायते प्रजा, 'क्वचित्' । ५।१।१७१।। इति डः ।

**प्रजा**–स्त्री–५४३–સન્તતિ.

द्र० अपत्यशब्दः ।

* प्रजायते प्रजा ।

**प्रजाकर**–पुं–७८२–(શે. १४४) તલવાર.

द्र० असिशब्दः ।

**प्रजाता**–स्त्री–५३९–સુવાવડી સ્ત્રી.

☐ विजाता, जातापत्या, प्रसूतिका ।

* प्रजायते स्म प्रजाता ।

**(प्रजानती)**–स्त्री–५२२–શાણી સ્ત્રી, બુદ્ધિશાળી સ્ત્રી.

☐ प्रज्ञा, प्राज्ञी ।

**प्रजाप**–पुं–६९०–રાજા.

द्र० नृपशब्दः ।

* प्रजां पाति प्रजापः ।

**प्रजापति**–पुं–२१२–બ્રહ્મા.

द्र० अजशब्दः ।

* प्रजानां पतिः प्रजापतिः, प्रजाया दुहितुः पतिरिति वा 'प्रजापतिः स्वां दुहितरमकामयत' इति **श्रुतेः** ।

**प्रजावती**–स्त्री–५१४–ભાઇની સ્ત્રી, ભાભી.

☐ भ्रातुर्जाया, (भ्रातृजाया) ।

* प्रजाऽस्ति अस्याः प्रजावती ।

**प्रज्ञ**–पुं–४५६ વચ્ચે આંતરાવાળા ઢીંચણવાળો.

☐ प्रज्ञु, विरलजानुक ।

* प्रगते प्रविरले वातादिदोषात् जानुनी अस्य प्रज्ञः, 'सम्प्राज्जानोर्ज्ञुज्ञौ'–।७।३।१५५।। इति साधुः ।

**प्रज्ञप्ति**–स्त्री–२३९– १६ વિદ્યાદેવી પૈકી બીજી દેવી.

* प्रकृष्टा ज्ञप्तिरस्याः प्रज्ञप्तिः ।

**प्रज्ञा**–स्त्री–३०९–મતિ, બુદ્ધિ.

द्र० उपलब्धिशब्दः ।

* प्रज्ञानं प्रज्ञा ।

**प्रज्ञा**–स्त्री–५२२–તીક્ષ્ણ બુદ્ધિવાળી સ્ત્રી.

☐ प्राज्ञी, (प्रजानती) ।

* प्रजानाति प्रज्ञा ।

**प्रज्ञात**–पुं–१४९३ વિખ્યાત, પ્રસિદ્ધ.

☐ ख्यात, प्रतीत, वित्त, प्रथित, विश्रुत, विज्ञात ।

* प्रज्ञायते प्रज्ञातः ।

**(प्रज्ञापना)**–स्त्री–२४५–१२ ઉપાંગ પૈકી ૪થું ઉપાંગ.

**प्रज्ञु**–पुं–४५६– ઊભા રહેતાં જેના ઢીંચણ વચ્ચે આંતરુ રહે તે.

☐ प्रज्ञ, विरलजानुक ।

* प्रगते प्रविरले वातादिदोषात् जानुनी अस्य प्रज्ञुः । 'सम्प्रा'–।७।३।१५५।। इति साधुः ।

**प्रडीन**–न.–१३१८–ઊડવું ઊડવાની ક્રિયા.

☐ उड्डीन, सण्डीन, डयन, नभोगति ।

* प्रडयनं प्रडीनं, 'क्लीबेक्तः'–।५।३।१२३।। 'सूयत्यादि'–।४।२।७०।। इति क्तस्य नत्वम् ।

**प्रणति**–स्त्री–१५०३–નમસ્કાર, નમવું.

☐ प्रणिपात, अनुनय ।

* प्रणमनं प्रणतिः ।

**प्रणय**–पुं–३८८–માંગણી, યાચના કરવી તે.

द्र० अध्येषणाशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* प्रणयनं प्रणयः ।

**प्रणयिन्**-પું-૮-(प.) આ શબ્દ લગાડવાથી પતિ વાચક શબ્દ બને છે.

द्र० ईशशब्दः ।

* यथा-गौरीप्रणयी शिवः ।

**( प्रणयिन् )**-પું-૫૧૬ પતિ.

द्र० कान्तशब्दः ।

**प्रणयिनी**-સ્ત્રી-૫૧૬ પત્ની.

द्र० कान्ताशब्दः ।

* प्रणयः-प्रेम सोऽस्ति अस्याः प्रणयिनि प्रेमवतीत्यपि ।

**प्रणयिनी**-સ્ત્રી-૮ (प.) આ શબ્દલગાડવાથી પત્નીવાચક શબ્દ બને છે.

द्र० कान्ताशब्दः ।

* यथा-शिवप्रणयिनी पार्वती ।

**प्रणव**-પું--૨૫૦-ઓંકાર.

☐ ओङ्कार ।

* प्रणूयते प्रस्तूयते प्रणवः ।

**प्रणाद**-પું-૧૪૦૩-જયજયકાર, ગુણાનુરાગથી બોલાયેલ શબ્દ.

☐ सीत्कृत ।

* प्रणदनं प्रणादः ।

**प्रणाय्य**-પુ-૪૯૧ વિરુદ્ધ.

☐ असम्मत ।

* प्रणीयते प्रणाय्यः, 'प्रणाय्यो निष्कामाऽसंमते'-।५।१।२।३।। इति घ्यणि निपात्यते ।

**प्रणाली**-त्रि.-૧૦૮૯-પાણી જવાની પરનાળ.

☐ जलमार्ग ।

* प्रणलन्त्यम्भोऽत्र प्रणाली, त्रिलिङ्गः, जलनिर्गममार्गो मकरमुखादिः ।

**प्रणिधान**-ન.-૧૩૭૮-સમાધિ, સમાધાન.

☐ अवधान, समाधान समाधि ।

* प्रणिधीयते प्रणिधानम् !

**प्रणिधि**-પું-૭૩૩-ચરપુરુષ, ગુપ્ત પુરુષ.

द्र० अवसर्पशब्दः ।

* प्रकर्षेण गुप्तो निधीयते प्रणिधिः ।

**प्रणिपात**-પું-૧૫૦૩-નમસ્કાર, પ્રણામ.

☐ प्रगति, अनुनय ।

* प्रणिपतनं प्रणिपातः ।

**प्रणीत**-ન.-૪૧૩-કઢી વગેરે સિદ્ધ અન્ન.

☐ उपसम्पन्न ।

* प्रणीयते स्म प्रणीतं रूपरसादिनिष्पन्न-मन्नम् ।

**प्रणीत**-પું-૮૨૬-મંત્ર વગેરેથી સંસ્કારિત અગ્નિ.

* प्रणीयते स्म प्रणीतः, मन्त्रादिना संस्कृतोऽनलः ।

**प्रणेय**-પું-૪૩૨-વશ થયેલો, આધીન થયેલો.

☐ वश्य ।

* प्रणेतव्य प्रणेयः ।

**प्रतति**-સ્ત્રી-૧૧૧૭-વલ્લી, વેલો.

☐ व्रतति, लता, वल्ली, (वल्लि) ।

* प्रकृष्टा ततिरस्याः प्रततिः ।

**प्रतन**-ન.-૧૪૪૯-જુનું, પુરાતન.

द्र० चिरन्तनशब्दः ।

* प्रगतं कालेन प्रतनम्, 'प्रात् पुराणे नश्च' ।७।२।१६१।। इति तनप्रत्ययः ।

**प्रतल**-પું-૫૯૬-હાથનો પંજો.

☐ चपेट, तल, प्रहस्त, तालिका, ताल ।

* प्रसृतं तलमस्य प्रतलः ।

**प्रताप**-પું-૭૪૦-તેજ, પ્રાણના ભોગે પણ બીજાનું અપમાન સહન ન કરે તેવું.

☐ प्रभाव ।

* प्रतपन्त्यनेन प्रतापः ।

**प्रतारण**-ન-૩૭૮-ઠગવું.

☐ वञ्चन, व्यलीक, अतिसन्धान ।

* प्रतार्यते प्रतारणम् ।

**प्रतानिनी**-સ્ત્રી-૧૧૧૮-વેલ (લતા).

☐ गुल्मिनी, उलप, वीरुध् ।

* प्रतानोऽस्त्यस्यां प्रतानिनी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रतिकर्मन्**-न.-६३६-शणुगार, अलंकार.
☐ मण्डन, प्रसाधन ।
* प्रत्यङ्गं कर्म प्रतिकर्म ।

**प्रतिकाय**-पुं-१४६४-प्रतिबिंब, प्रतिमा, पडछायो.
द्र० अर्चाशब्दः ।
* प्रतिरूपः कायः प्रतिकायः ।

**प्रतिकाश**-पुं-१४६२-समान ,तुल्य.
द्र० उपमाशब्दः ।

**प्रतिकूल**-वाच्य.-१४६५ प्रतिकूळ, विपरीत.
द्र० अपष्ठुशब्दः ।
* प्रतीपं कूलात् प्रतिकूलम् , लक्षणया विरुद्धार्थम् ।

**प्रतिकृति**-स्त्री-१४६४-प्रतिबिंब, प्रतिमा.
द्र० अर्चाशब्दः ।
* प्रतिरूपा क्रियते प्रतिकृतिः ।

**प्रतिकृष्ट**-वाच्य.-१४४२-अधम, हलकुं.
द्र० अणकशब्दः ।
* प्रतिकृष्टम् ।

**प्रतिक्षिप्त**-पुं-४४०-तिरस्कार पामेलो.
☐ अधिक्षिप्त ।
* प्रतिक्षिप्यते स्म प्रतिक्षिप्त ।

**प्रतिक्षिप्त**-न.-१४७४-निषेध करायेलुं.
द्र० अपविद्धशब्दः ।
* प्रतिक्षिप्यते स्म प्रतिक्षिप्तम् ।

**प्रतिग्रह**-पुं-७४७-सैन्यनी पाछळनो भाग.
☐ सैन्यपृष्ठ ।
* प्रतिगृह्यते-अवष्टभ्यतेऽनेन सैन्यं प्रतिग्रहः ।

**प्रतिग्रह**-पुं-६८२-(शि. ५७) थूंकवानुं पात्र, पिकदानी.
द्र० पतद्ग्रहशब्दः ।

**प्रतिग्राह**-पुं-६८३ थूंकवानुं पात्र, पिकदानी.
द्र० पतद्ग्रहशब्दः ।

* प्रतिगृह्णाति आचेलकादि प्रतिग्राहः । 'वा ज्वलादि'-५।१।६२॥ इति णः; प्रतिग्रहोऽपि ।

**प्रतिघ**-पुं-२९९ क्रोध, रौद्ररसनो स्थायी भाव.
द्र० कोपशब्दः ।
* प्रतिहन्यतेऽनेन प्रतिघः, 'क्वचित्'-५।१।१७१॥ इति डे, मेघादित्वात् साधुः ।

**प्रतिलोम**-न.-१४६५-विपरीत, प्रतिकूळ.
द्र० अपष्ठुशब्दः ।
* प्रतीपं लोमाऽत्र प्रतिलोमम् , 'प्रत्यन्ववात् सामलोम्नः'-७।३।८२॥ इत्यत्समासान्तः ।

**प्रतिवचस्**-न.-२६३-उत्तर, जवाब.
☐ उत्तर ।
* प्रतीपं वचः प्रतिवचः ।

**प्रतिवसथ**-पुं-९६१-गाम.
द्र० उपवसथशब्दः ।

**प्रतिशासन**-न.-२७७-आज्ञा करवीते, बोलावीने मोकलवुं ते.
* आहूय प्रेषणं प्रतिशासनम् ।

**प्रतिशिष्ट**-न.-१४९२-मोकलेलुं.
☐ प्रस्थापित, प्रहित, प्रोषित ।
* प्रतिशिष्यते स्म प्रतिशिष्टम् ।

**प्रतिश्याय**-पुं-४६८-नाकनो रोग, सळेखम.
☐ पीनस ।
* प्रतिश्यायते-श्रवति प्रतिश्यायः, 'तन्व्यधी'-५।१।६४॥ इति णः ।

**प्रतिश्रय**-पुं-१०००-हंमेशनी दानशाळा.
☐ सत्रशाला (सत्रशाल) ।
* प्रतिश्रीयते प्रतिश्रयः ।

**प्रतिश्रव**-पुं-२७८-स्वीकार, अंगीकार.
द्र० अङ्गीकारशब्दः ।

**प्रतिश्रुत्**-स्त्री-१४१०-पडघो.
☐ प्रतिध्वनि ।

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

* प्रतिरूपः श्रूयते प्रतिश्रुत्, 'कृत्सम्पदादि'- ।५।३।११४।। इति क्विप् ।

**प्रतिघातन**-न.-३७०-હિંસા.

द्र० अपासनशब्दः ।

* हन्तेः स्वार्थणिजन्तस्य पतिघातनम् ।

**प्रतिचर**-पुं-३६१-(शि.-२४)-ચાકર.

द्र० किङ्करशब्दः ।

**प्रतिच्छन्द**-पुं-१४६४-પ્રતિબિંબ, પ્રતિમા.

द्र० अर्चाशब्दः ।

* प्रतिछन्द्यते प्रतिच्छन्दः, प्रतिरूपं छन्द इति वा ।

**प्रतिच्छाया**-स्त्री-१४६४-પ્રતિબિંબ, પ્રતિમા.

द्र० अर्चाशब्दः ।

* प्रतिरूपा छाया प्रतिच्छाया ।

**प्रतिजङ्घा**-स्त्री-६१५-જાંઘાનો અગ્રભાગ.

☐ अग्रजङ्घा ।

* जङ्घा प्रतिगता प्रतिजङ्घा ।

**प्रतिजागर**-पुं-१५१८-અવધાન, દેખરેખ. તપાસ.

☐ अवेक्षा, 'अवधान' ।

* प्रतिजागरणं प्रतिजागरः ।

**प्रतिज्ञा**-२७८-સ્વીકાર, અંગીકાર.

द्र० अङ्गीकारशब्दः ।

* प्रतिज्ञानं प्रतिज्ञा ।

**प्रतिज्ञात**-न.-१४८८-સ્વીકારેલું.

द्र० अङ्गीकृतशब्दः ।

* प्रतिज्ञायते स्म प्रतिज्ञातम् ।

**प्रतिताली**-स्त्री-१००६-તાળું ઉઘાડવાનું યંત્ર, કુંચી.

☐ ताली ।

* प्रतिताड्यतेऽनया प्रतिताली ।

**प्रतिदान**-न-८७०-થાપણ પાછી આપવી તે.

☐ न्यासार्पण, [परिदान शि. ७७] ।

* न्यासस्य निक्षिप्त्रे प्रतीपं दानं प्रतिदानम्, परिदानमित्येके ।

**प्रतिध्वनि**-पुं-१४१०-પડઘો.

☐ प्रतिश्रुत् ।

* प्रतिरूपो ध्वनिः प्रतिध्वनिः प्रतिशब्दः ।

**प्रतिनप्तृ**-पुं-५४४-પૌત્રનો પુત્ર.

☐ प्रपौत्र ।

* प्रतिजातो नप्तृतः प्रतिनप्ता ।

**प्रतिनादविधायिता**-स्त्री-६५-પડધો પડે તેવી પ્રભુની વાણીનો પાંચમો ગુણ.

* प्रतिनादविधायिता प्रतिरवोपेतत्वम् ।

**प्रतिनिधि**-पुं-१४६३-પ્રતિબિંબ, પ્રતિમા.

द्र० अर्चाशब्दः ।

* प्रतिनिधीयते प्रतिनिधिः मुख्यसदृशोऽर्थः ।

**प्रतिपक्ष**-पुं-७२८-શત્રુ.

द्र० अभिमातिशब्दः ।

* प्रतिकूलः पक्षः प्रतिपक्षः ।

**प्रतिपद्**-स्त्री-१४७-પડવો.

☐ पक्षति ।

* प्रतिपद्यते पक्षस्याऽऽद्यतया प्रतिपत् ।

**प्रतिपद्**-स्त्री-३०९-મતિ, બુદ્ધિ.

द्र० उपलब्धिशब्दः ।

* प्रतिपत्तिः प्रतिपत्, सर्वे गत्यर्थाः ज्ञानार्था धातवः ।

**प्रतिपन्न**-न.-१४९६-જાણેલું.

द्र० अवगतशब्दः ।

* प्रतिपद्यते प्रतिपन्नम्, अस्मिन् ज्ञानार्थत्वात् वर्तमाने क्तः ।

**प्रतिपादन**-न.-३८६-દાન, ત્યાગ.

द्र० अंहतिशब्दः ।

* प्रतिपाद्यते प्रतिपादनम् ।

**प्रतिबद्ध**-पुं-४३९-નિરાશ, નાઉમેદ થયેલો.

☐ मनोहत, प्रतिहत, हत ।

* प्रतेर्बन्धिः प्रवृत्तनिवारणार्थः, प्रतिबध्यते स्म प्रतिबद्धः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रतिबन्ध**–पुं–१४९८ રોકાણ, અટકાવ.

☐ प्रतिष्टम्भ ।

* प्रतिबन्धनं प्रतिबन्धः ।

**प्रतिबिम्ब**–न.–१४६४–પ્રતિબિંબ, પ્રતિમા.

द्र० अर्चाशब्दः ।

* प्रतिबिम्ब्यते प्रतिबिम्बम्, बिम्बेन सदृशं वा ।

**प्रतिभय**–त्रि.–३०२–ભયાનક.

द्र० घोरशब्दः ।

* प्रतिगतं भयेनेति प्रतिभयम् ।

**प्रतिभा**–स्त्री–३०९–મતિ, બુદ્ધિ.

द्र० उपलब्धिशब्दः ।

* प्रतिभानं प्रतिभा ।

**प्रतिभान्वित**–पुं–३४३–પ્રૌઢ, પ્રતિભાશાળી.

☐ प्रौढ, प्रगल्भ ।

* प्रतिभा नवनवोल्लेखशालिनी प्रज्ञा, तया अन्वितः प्रतिभान्वितः ।

**प्रतिभू**–पुं–८८२–પ્રતિનિધિ, જામીન.

☐ लग्नक ।

* प्रतिनिधिः प्रतीतो वा भवति प्रतिभूः ।

**प्रतिम**–पुं–१४६२–તુલ્ય, સરખું.

द्र० उपमाशब्दः ।

* प्रतिमाति प्रतिमः ।

**प्रतिमा**–स्त्री–१४६३ પ્રતિબિંબ, પડછાયો

द्र० अर्चाशब्दः ।

* प्रतिमीयतेऽनया प्रतिमा ।

**प्रतिमान**–न.–१२२७–બે દાંત વચ્ચેનો ભાગ.

* प्रतिमीयते प्रतिक्षिप्यतेऽनेन प्रतिमानं, बाहिस्थस्याधोभागो दन्तमध्यमित्यर्थः, 'भिम्मीगोऽखलचलि'–।४।२।८।। इत्यात्वम् ।

**प्रतिमान**–न.१४६३–પ્રતિબિંબ, પ્રતિમા.

द्र० अर्चाशब्दः ।

* प्रतिमीयतेऽनेन प्रतिमानम् ।

**प्रतिमुक्त**–पुं–७६५–કંચુક ધારણ કરેલો.

☐ आयुक्त, अपिनद्ध, पिनद्ध ।

* प्रतिमुच्यते स्म प्रतिमुक्तः ।

**प्रतियत्न**–पुं–६५३–(शे. १३४) રચના, ગૂંથણુ, પુષ્પહારની રચના.

द्र० गुम्फशब्दः ।

**प्रतियातना**–स्त्री–१४६३–પ્રતિબિંબ, પ્રતિમા.

द्र० अर्चाशब्दः ।

* प्रतियात्यते–उपस्क्रियते प्रतियातना ।

**प्रतिरूप**–न.–१४६३–પ્રતિબિંબ, પ્રતિમા.

द्र० अर्चाशब्दः ।

* रूपेण सदृशं प्रतिरूपम्, प्रतिरूप्यते वा ।

**प्रतिरोधक**–पुं–३८१–ચોર.

द्र० एकागारिकशब्दः ।

* प्रतिरुणद्धि प्रतिरोधकः ।

**प्रतिलम्भ**–पुं–१५२०–પ્રાપ્તિ, લાભ, પુનઃ પ્રાપ્તિ.

☐ लम्भन ।

* प्रतिलम्भनं प्रतिलम्भः ।

**प्रतिष्टम्भ**–पुं–१४९८–રોકાણ, અટકાવ.

☐ प्रतिबन्ध ।

* प्रतिष्टम्भनं प्रतिष्टम्भो रोधः, 'अङ्प्रतिस्तब्धनिस्तब्धे' स्तम्भः'–।२।३।४१।। इति षत्वम् ।

**प्रतिष्ठ**–पुं–३६–શ્રી સુપાર્શ્વનાથ ભ. ના પિતા

* प्रतिष्ठते धर्मकार्ये प्रतिष्ठः ।

**प्रतिसर**–त्रि.–६६३–હાથે બાંધવાનું ઘરેણું, પોંચી, વલય વિ.

द्र० आवापशब्दः ।

* प्रतिसरति प्रतिसरः त्रिलिङ्गः ।

**प्रतिसर्ग**–पुं–२५२–પ્રતિસર્ગ. (પુરાણનું એક લક્ષણ).

☐ सर्ग, प्रतिसर्ग वंश, मन्वन्तर, वंशानुवंश, चरित ।

* प्रतीपः सर्गः प्रतिसर्गः संहारः ।

**प्रतिसीरा**–स्त्री–६८०–પડદો, કનાત.

द्र० अपटीशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* प्रतिसिन्वन्त्येनां प्रतिसीरा, 'चिजि-' (उणा-३९२) ॥ इति रः, दीर्घत्वं च ।

**प्रतिसूर्य**-પું-૧૨૯૯-કાચીંડો, કરચલો, કાકીંડો.

द्र० कृकलासशब्दः ।

* सूर्यस्य प्रतीपः प्रतिसूर्यः ।

**(प्रतिसूर्यशयानक)**-પું-૧૨૯૯-કાચીંડો, કરચલો, કાકીડે.

द्र० कृकलासशब्दः ।

* प्रतिसूर्यं शेते प्रतिसूर्यशयानक इत्यन्यः ।

**प्रतिहत**-પું-૪૩૯-નિરાશ નાઉમેદ થયેલો.

☐ मनोहत, प्रतिबद्ध, हत ।

* प्रतिहन्यते स्म प्रतिहतः ।

**'प्रतिहास'**-પું-૧૧૩૭-કણેર.

द्र० करवीरशब्दः ।

**प्रतीक**-પું-૫૬૬-શરીરના અવયવ.

द्र० अङ्गशब्दः ।

* प्राति शरीरमिति प्रतीकः, 'सृणीकास्तीक'-(उणा-५०) ॥ इतीके निपात्यते ।

**'प्रतीकाश'**-પું-૧૪૬૨-તુલ્ય અર્થ.

द्र० उपमाशब्दः ।

**प्रतीक्ष्य**-પું-૪૪૬-પૂજ્ય.

☐ अर्च्य ।

* प्रतीक्षणीयो मुख्यत्वात् प्रतीक्ष्यः ।

**प्रतीची**-સ્ત્રી-૧૬૭-પશ્ચિમ દિશા.

☐ पश्चिमा, अपरा । [पूर्वेतरा शे. ३०] ।

* प्रत्यञ्चति रविरस्यां प्रतीची ।

**प्रतीचीन**-ન.-૧૬૮-પશ્ચિમ દિશા માં ઉત્પન્ન થયેલ.

☐ प्रत्यन्च् ।

* प्रत्यञ्चतीति प्रत्यक् प्रत्यगेव प्रतीचीनम् ।

**प्रतीचीश**-પું-૧૮૮-(શે૦ ૩૯)-વરુણ દેવતા.

द्र० अर्णवमन्दिरशब्दः ।

**प्रतीत**-પું-૧૪૯૩-વિખ્યાત, પ્રસિદ્ધ.

☐ ख्यात, प्रज्ञात, वित्त, प्रथित, विश्रुत ।

* प्रतीयते प्रतीतः ।

**प्रतीप**-वाच्य-१४६५- વિપરીત, પ્રતિકૂળ.

द्र० अपष्ठुशब्दः ।

* प्रत्यावृत्ता आपोऽत्र प्रतीपम्, 'ऋक्पूः पथ्यपोऽत्' ।७।३।७६।।

'द्व्यन्तरनवर्णे'-।३।२।१०९।। इति अप ईपादेशः ।

**(प्रतीपदर्शिनी)**-સ્ત્રી-૫૦૭-વિશિષ્ટ અંગ અને ક્રિયાવાળી સ્ત્રી.

द्र० अलसेक्षणाशब्दः ।

**प्रतीर**-ન.-૧૦૭૮-તીર, કાંઠો, કિનારો.

☐ तट, तीर कूल, प्रपात, कच्छ, रोधस् ।

**प्रतीहार**-પું-૭૨૧-દારપાળ.

द्र० उत्सारकशब्दः ।

* प्रतिह्रियते वार्यतेऽनेन प्रतिहारः, 'घञ्युपसर्गस्य'-।३।२।८६।। इति दीर्घत्वे प्रतीहारः ।

**प्रतीहार**-પું-૧૦૦૪-દ્વાર, બારણું.

☐ वलज, द्वार्, द्वार ।

* प्रतिह्रियन्ते रुध्यन्तेऽनेन बाहुलकाद् घञि दीर्घत्वे च प्रतीहारः ।

**'प्रतीहास'**-પું-૧૧૩૭-કણેર.

द्र० करवीरशब्दः ।

**प्रतोद**-પું-૮૯૩-બળદ વગેરે હાંકવાનો પરોણો, ચાબુક.

☐ प्रवयण, प्राजन, तोत्र, तोदन ।

* प्रतुद्यन्ते वोढारोऽनेन प्रतोदः ।

**प्रतोली**-સ્ત્રી-૯૮૧-શેરી.

☐ रथ्या, विशिखा ।

* प्रतोल्यते प्रतोली ।

**प्रत्न**-ન.-૧૪૪૯-જૂનું, પુરાતન.

द्र० चिरन्तनशब्दः ।

* प्रगतं कालेन प्रत्नम्, 'प्रात् पुराणे'-।७।२।१६१।। इति त्नप्रत्ययः ।

**प्रत्यक्**-अ.-१५४२-(શે૦ ૨૦૭) પશ્ચિમ દિશા, દેશ અથવા કાળ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रत्यग्र**—न.—१४४८—नवुं.
द्र० अभिनवशब्दः ।
* प्रतिगतमग्रमनेन प्रत्यग्रम् ।

**प्रत्यग्रथ**—पुं—९६०—(ब. व.) અહિચ્છત્ર દેશ.
☐ अहिच्छत्र ।
* प्रत्यग् रथा अत्र प्रत्यग्रथाः ।

**प्रत्यच्**—न.—१६८—પશ્ચિમ દિશા માં ઉત્પન્ન થયેલું.
☐ प्रतीचीन ।
* प्रत्यञ्चतीति प्रत्यक् ।

**प्रत्यनीक**—पुं—७२८—શત્રુ.
द्र० अभिमातिशब्दः ।
* प्रतीपमनीकमस्य प्रत्यनीकः ।

**प्रत्यन्त**—पुं—९५२—મ્લેચ્છ નો દેશ.
☐ म्लेच्छमण्डल ।
* प्रतिगतोऽन्तं भोटादिदेशः प्रत्यन्तः ।

**प्रत्ययित**—पुं—७३४—વિશ્વાસુ, અવિસંવાદી.
☐ आप्त, (अविसंवादिवाच्) ।
* प्रत्ययः—आश्वासः सञ्जातोऽस्य प्रत्ययितः ।

**प्रत्यर्थिन्**—पुं—७२९—શત્રુ.
द्र० अभिमातिशब्दः ।
* प्रतीपमर्थयते प्रत्यर्थी ।

**प्रत्यवसान**—न.—४२३—ભોજન, ખાવું તે.
द्र० अदनशब्दः ।
* प्रत्यवसीयते प्रत्यवसानम् ।

**प्रत्यवस्थातृ**—पुं—७२८ શત્રુ.
द्र० अभिमातिशब्दः ।
* प्रतीपमवतिष्ठते प्रत्यवस्थाता ।

**प्रत्याकार**—पुं— ७८३— મ્યાન, તલવાર રાખવાનું ખોળું.
☐ परीवार, कोश, खड्गपिधान, (खड्गपिधानक) ।
* प्रतिरूप आकारोऽस्य प्रत्याकारः ।

**प्रत्याख्यात**—न.—१४७३—निषेध કરાયેલું.
द्र० अपविद्धशब्दः ।
* प्रत्याख्यायते स्म प्रत्याख्यातम् ।

**प्रत्याख्यानप्रवाद**—न—२४८—१४ પૂર્વ પૈકી ૯મું પૂર્વ.
☐ (प्रत्याख्यान) ।
* सर्वप्रत्याख्यानस्वरूपं प्रवदति प्रत्याख्यानप्रवादम्, तदेकदेशः प्रत्याख्यानम्, भीमवत् ।

**प्रत्यादिष्ट**—न.—१४७४—निषेध કરાયેલું.
द्र० अपविद्धशब्दः ।
* प्रत्यादिश्यते स्म प्रत्यादिष्टम् ।

**प्रत्यालीढ**—न.—७७७—ડાબો પગ લંબાવી જમણો પગ સંકોચી ઊભા રહેવું તે, એક પ્રકારનું ધનુર્વેદનું આસન.
* प्रतिलोममालीढं प्रत्यालीढम् । यद् **धनुर्वेदः** ।—
'प्रत्यालीढे तु कर्तव्यः, सव्यस्तीक्ष्णोऽनुकुञ्चितः ।
तिर्यग्वामः पुरस्तत्र, दूरापाते विशिष्यते ॥'

**प्रत्यासार**—पुं—७४७—વ્યૂહની પાછળનો ભાગ.
☐ व्यूहपार्ष्णि ।
* प्रत्यासरति भग्नान् प्रत्यासरः, 'सर्तेः स्थिर'—।५।३।१७॥ इति घञ् ।

**प्रत्याहार**—पुं—८३—વિષયોથી ઇન્દ્રિયોને અટકાવી ને ૮ પૈકી યોગનું પાંચમું અંગ.
* प्रतीपमाहरणं विषयेभ्यः इन्द्रियाणां प्रत्याहारः ।

**प्रत्याहार**—पु—१५२४—ઇન્દ્રિયોને વિષયોથી પાછી ખેંચવી તે.
☐ उपादान ।
* प्रत्याहरणं प्रत्याहारः ।

**प्रत्युत्क्रम**—पुं—१५१०—પ્રયોગ, કાર્યનો આરંભ.
☐ प्रयोग, (प्रत्युत्क्रान्ति) ।
* प्रत्युत्क्रमणं प्रत्युत्क्रमः ।

**(प्रत्युत्क्रान्ति)**—स्त्री—१५१० પ્રયોગ, કાર્યનો આરંભ.
☐ प्रयोग, (प्रत्युत्क्रान्ति) ।

**प्रत्युत्पन्नमति**—पुं—३४४—હાજરજવાબી.
☐ तत्कालधी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* प्रत्यग्रमुत्पन्ना मतिरस्य प्रत्युत्पन्नमतिः ।

**प्रत्युषस्**–न.–१३९–પ્રભાતકાળ.

द्र० अहर्मुखशब्दः ।

* प्रत्योषति अर्ककरैः प्रत्युषः, 'मिथिरञ्ज्युषि'–(उणा-९७१)॥ इत्यस् ।

**प्रत्यूष**–पुं–न.–१३९–પ્રભાતકાળ.

द्र० अहर्मुखशब्दः ।

* प्रत्यूषति–निशां रुजति प्रत्यूषम्, पुंक्लीबलिङ्गः ।

**प्रत्यूषाण्ड**–पुं–९८–(शे. १०) સૂર્ય.

द्र० अंशुशब्दः ।

**प्रत्यूह**–पुं–१५०९–અન્તરાય, વિઘ્ન.

☐ विघ्न, अन्तराय, व्यवाय ।

* प्रतीपमूहनं प्रत्यूहः ।

**प्रथन**–पुं–११७२–મગ.

☐ मुद्ग, लोभ्य, बलाट, हरित, हरि ।

* प्रथते प्रथनः ।

**प्रथम**–न.–१४५९–પ્રથમ, પહેલું.

द्र० अग्रशब्दः।

* प्रथते प्रथमम्, 'सृपृप्रथि' (उणा–३४७)॥ इति मः ।

**प्रथित**–पुं–१४९३–વિખ્યાત, પ્રસિદ્ધ.

☐ ख्यात, प्रतीत, प्रज्ञात, वित्त, विश्रुत ।

* प्रथ्यते प्रथितः ।

**प्रदक्षिण**–पुं–६२–પંખીઓ પ્રદક્ષિણા કરે તે–તીર્થંકરનો ૨૯મો અતિશય.

* शकुनाः (पक्षिणः) प्रदक्षिणगतयः स्युरिति चतुर्दशः ।

**प्रदर**–पुं–७७८–બાણ.

द्र० अजिह्मगशब्दः ।

* प्रदीर्यतेऽनेन प्रदरः ।

**प्रदिश्**–स्त्री–१६७– દિશાના ખૂણા, વિદિશા.

☐ विदिश्, अपदिश ।

* प्रकृष्टा दिक् प्रदिक् ।

**प्रदीप**–पुं–६८६–દીવો.

द्र० कज्जलध्वजशब्दः ।

* दीप्यते दीपः, प्रः स्वार्थे, मेरुः सुमेरुवत् प्रदीपः।

**प्रदीपन**–पुं–११९६–સ્થાવર વિષ.

द्र० अङ्कोलसारशब्दः ।

* प्रदीपयति प्रदीपनः ।

**प्रदेशन**–न.–३८६–દાન, ત્યાગ.

द्र० अंहतिशब्दः ।

* प्रदिश्यते प्रदेशनम्, प्रादेशनमपि ।

**प्रदेशिनी**–स्त्री–५९२–અંગૂઠા પાસેની આંગળી, તર્જની.

☐ तर्जनी ।

* प्रदिशति प्रदेशनी ।

**प्रदोष**–पुं–१४४–રાત્રિનો પ્રથમ ભાગ.

☐ यामिनीमुख, [दिनात्यय शे. २०]

* प्रारब्धा दोषा अस्मिन् इति प्रदोषः ।

**प्रद्युम्न**–पुं–२२८– કામદેવ.

द्र० अङ्गजशब्दः ।

* प्रकृष्टं द्युम्नं बलमस्य प्रद्युम्नः ।

**प्रद्योतन**–पुं–९५–સૂર્ય.

द्र० अंशुशब्दः ।

* प्रद्योतते प्रद्योतनः ।

**प्रद्राव**–पुं–८०३–પલાયન, નાસી જવું,

द्र० अपक्रमशब्दः ।

* प्रद्रवणं प्रद्रावः, 'प्रान्स्नुद्रुस्तो'–।५।३।६७। इति घञि प्रद्रावः नशनमपि ।

**प्रधन**–न.–७९७– યુદ્ધ, લડાઈ.

द्र० अनीकशब्दः ।

* प्रधनति–हन्ति प्रधनम्, धनिर्मरणार्थोऽत्र निधनवत् ।

**प्रधान**–न.–७२०–મુખ્ય પ્રધાન, સેનાપતિ, પુરોહિત વગેરે.

☐ महामात्र ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* प्रधीयते एषु इति प्रधानानि, अमात्य-पुरोहितसेनापत्यादयः । आविष्टलिङ्गोऽयम् ।

**प्रधान**-न.-१४३८-પ્રધાન, મુખ્ય.

द्र० अग्रशब्दः ।

* प्रधत्ते प्रधानम्, रम्यादित्वादनट्, आविष्ट-लिङ्गक्लीबेऽयम् ।

**प्रधानधातु**-पुं-६३०-શુક્ર, વીર્ય.

द्र० आनन्दप्रभवशब्दः ।

* प्रधानं चासौ धातुश्च प्रधानधातुः ।

**प्रधि**-पुं-स्त्री-७५५- ઘેરાવો, પૈડાંનો ગોળ ફરતો ભાગ.

☐ धारा, नेमि ।

* प्रान्ते प्रधीयते प्रधिः पुंस्त्रीलिङ्गः ।

**प्रपञ्च**-पुं-१४३२-વિસ્તાર.

☐ आभोग विस्तार, व्यास ।

* प्रपञ्चनं प्रपञ्चः ।

**प्रपद्**-न.-६१७-પગનો આગળનો ભાગ.

☐ पादाग्र ।

* प्रारम्भोऽत्र पदस्य प्रपदम् ।

**प्रपा**-स्त्री-१००१-પરબ.

☐ पानीयशाला, (पानीयशाल)।

* प्रपिबन्त्यस्यां प्रपा, स्थादित्वात् कः ।

**प्रपात**-पुं-८००-ધાડ, છળકપટથી એકદમ છાપો મારવો તે.

☐ अभ्यवस्कन्द, धाटि, (धाटी,) अभ्यासादन' । [अवस्कन्द शि. ७०] ।

* प्रपतनं प्रपातः, छलादाक्रमणमित्यर्थः ।

**प्रपात**-पुं-१०३२-પર્વતનું ઊંચું સ્થાન, પર્વત ઉપરથી પડવાનું સ્થાન.

☐ अतट, भृगु ।

* प्रपतन्ति अस्मात् प्रपातः, 'व्यञ्जनाद् घञ्' ।५।३।१३२॥

**प्रपात**--१०७७-કાંઠો, કિનારો.

☐ कूल, कच्छ, रोधस्, तट, तीर, प्रतीर ।

* प्रपतन्ति अस्मिन् प्रपातः ।

**प्रपातिन्**-पुं-१०२७-(शे.-१५८) પર્વત.

द्र० अचलशब्दः ।

**प्रपितामह**--५५७-પિતામહના પિતા.

* पितामहस्य पिता, प्रवृद्धः पितामहात् प्रपितामहः ।

**'प्रपुनड'**-पुं-११५८-કુંવાડિયો.

द्र० एडगजशब्दः ।

**'प्रपुनाड'**-पुं-११५८-કુંવાડિયો.

द्र० एडगजशब्दः ।

**प्रपुनाल'**-पुं-११५८-કુંવાડિયો.

द्र० एडगजशब्दः ।

**प्रपुन्नाट**-पुं-११५८-પુંવાડીઓ, દાદરનાશક ઔષધિ.

द्र० एडगजशब्दः ।

* प्रपुणति प्रपुनाति वा प्रपुन्नाटः, 'कपाट'-(उणा-१४९) ॥ इति आटे निपात्यते ।

**'प्रपुन्नाड'**-पुं-११५८-કુંવાડિયો.

द्र० एडगजशब्दः ।

**'प्रपुन्नाल'**-पुं-११५८-કુંવાડિયો.

द्र० एडगजशब्दः ।

**प्रपौत्र**-पुं-५४४-પૌત્રનો પુત્ર.

☐ प्रतिनप्तृ ।

* प्रजातः पौत्रात् प्रपौत्रः-पौत्रापत्यम्, आदिपुरुषाच्चतुर्थः ।

**प्रफुल्ल**-न.-११२८-ખીલેલું (ફૂલ).

द्र० उच्छ्वसितशब्दः ।

* प्रफुल्लति प्रफुल्लम् ।

**प्रबुद्ध**-पुं-३४१-વિદ્વાન, પંડિત.

द्र० अभिरुपशब्दः ।

* प्रबुध्यते प्रबुद्धः ।

**प्रबुद्ध**-न.-११२७-ખીલેલું (પુષ્પ).

द्र० उच्छ्वसितशब्दः ।

* प्रबुध्यते प्रबुद्धम् ।

**प्रबोध**-पुं-३१९-જાગવું તે.

☐ विनिद्रत्व ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* प्रबोधनं प्रबोधः ।

**प्रभञ्जन**-पुं-११०६-પવન, વાયુ.

द्र० अनिलशब्दः ।

* प्रभनक्ति प्रभञ्जनः ।

**(प्रभव)**-पुं-३३-શ્રુતકેવલી પ્રભવ સ્વામી.

☐ प्रभवप्रभु, (प्रभवस्वामिन्) ।

**प्रभवप्रभु**-पुं-३३-શ્રુતકેવલી પ્રભવ સ્વામી.

☐ (प्रभवस्वामिन्, प्रभव) ।

* प्रभवति अस्मात् श्रुतमिति प्रभवः, स चासौ प्रभुश्च प्रभवप्रभुः ।

**(प्रभवस्वामिन्)**-पुं-३३-શ્રુતકેવલી પ્રભવ-સ્વામી.

☐ (प्रभव) प्रभवप्रभुः ।

**प्रभविष्णु**-पुं-४९१-(शि. ३७) સમર્થ, સહનશીલ.

☐ सह, क्षम, शक्त, प्रभूष्णु, [समर्थ, अलम्भूष्णु शे.-१०८] ।

**प्रभा**-स्त्री-१००-કિરણ.

द्र० अंशुशब्दः ।

* प्रभानं प्रभा ।

**प्रभा**-स्त्री-१९०-કુબેરની નગરી.

द्र० अलकाशब्दः ।

* प्रकर्षेण भाति प्रभा ।

**प्रभा**-स्त्री-२०५-(शे. ६१) પાર્વતી.

* अद्रिजाशब्दः ।

**प्रभाकर**-पुं-९७-સૂર્ય.

द्र० अंशुशब्दः ।

**प्रभात**-न.-१३८-પ્રભાતકાળ, સવાર.

द्र० अहर्मुखशब्दः ।

*भातुं प्रवृत्तं प्रभातम् । 'आरम्भे'-।५।१।१०।। इति क्तः ।

**प्रभाव**-पुं-७४०-તેજ સામર્થ્ય, પરાક્રમ.

☐ प्रताप ।

प्रभवन्त्यनेन प्रभावो, बाहुलकाद् घञ् ।

**प्रभावती**-स्त्री-४०-શ્રી મલ્લિનાથ ભ.ની માતા.

* प्रभाऽस्ति अस्याः प्रभावती ।

**प्रभावती**-स्त्री-२८९-ગુણોની વીણા.

* प्रभाऽस्ति अस्याः प्रभावती ।

**प्रभास**-पुं-३२-११ મા ગણધર ભગવાન.

* प्रभासते प्रभासः, एष कौण्डिन्यः ।

**प्रभिन्न**-पुं-१२२०-મહોન્મત્ત હાથી.

☐ मत्त, गर्जित ।

* प्रभिद्यते स्म गण्डपाल्यां प्रभिन्नः ।

**प्रभु**-पुं-३५९-સ્વામી, નાયક.

द्र० अधिपशब्दः ।

* प्रभवति प्रभुः, 'शंसंस्वयं-विप्राद् भुवो डुः' ।५।२।८४।। इति डुः ।

**प्रभुत्वशक्ति**-स्त्री-७३५-કોશ-દંડના પ્રભાવથી ઉત્પન્ન થયેલી શક્તિ.

* कोशदण्डसमृद्धिः प्रभुत्वशक्तिः ।

**प्रभूत**-न.-१४२५-ઘણું, અતિશય.

द्र० अदभ्रशब्दः ।

* प्रभवति प्रभूतम्, 'शीरी'-(उणा-२०१)।। इति कित् तः ।

**प्रभूष्णु**-पुं-४९१-સમર્થ, સહનશીલ.

☐ सह, क्षय, शक्त, [समर्थ, अलम्भूष्णु शे. १०८, प्रभविष्णु, शि. ३७]

* प्रभवतीत्येवंशीलः प्रभूष्णुः प्रभविष्णुरपि ।

**प्रभ्रष्टक**-न.-६५२-શિખાની પેઠે મસ્તક ઉપર પાછળના ભાગમાં લટકતી પુષ્પમાળા.

* शिखालम्बिदाम, केशमध्यात् प्रभ्रश्यति स्म प्रभ्रष्टम्, के प्रभ्रष्टकम् ।

**प्रमथ**-पुं-२०१-(પ. વ.) શંકરના ગણ.

☐ पार्षद (परिषद), गण ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* प्रमथन्ति अरीन् प्रमथाः ।

**प्रमथन**–न.–३७०–હિંસા.

द्र० अपासनशब्दः ।

* मथे विलोडने प्रमथनम् ।

**प्रमथपति**–પું–१९९–શંકર.

द्र० अट्टहासिन्शब्दः ।

* प्रमथानां पतिः प्रमथपतिः ।

**(प्रमथाधिप)**–પું–२०७–શંકર.

द्र० अट्टहासिन्शब्दः ।

**प्रमद**–પું–३१६–મનની પ્રસન્નતા, હર્ષ.

द्र० आनन्दशब्दः ।

* प्रमदनं प्रमदः ।

**प्रमदवन**–न.–१११३–રાણીઓને ક્રીડા કરવાનો બાગ.

* आक्रीडोद्यानं राज्ञामन्तः पुरयोग्यं प्रमदार्थं प्रमदानां वा वनं प्रमदवनम्, 'ङ्चापोऽ'हुलम्' ।२।४।९९।। इति ह्रस्वः ।

**प्रमदा**–સ્ત્રી–५०५–પ્રકૃષ્ટ મદવાળી સ્ત્રી.

द्र० अङ्गनाशब्दः ।

* प्रकृष्टो मदः कामवेगोऽस्याः प्रमदा ।

**प्रमनस्**–પું–४३५–પ્રસન્નમનવાળો.

☐ हर्षमाण, हृष्टमानस, विकुर्वाण ।

* प्रहृष्टं मनोऽस्य प्रमनाः ।

**प्रमय**–પુંન.–३७०–હિંસા.

द्र० अपासनशब्दः ।

* 'मीगृश् हिंसायां'–मलि प्रमयः, पुंक्लीबलिङ्गः, 'कदनं प्रमयोऽस्त्रियाम्' इत्यमरशेषः ।

**प्रमर्दन**–પું २१९ (शे. ७५) વિષ્ણુ, કૃષ્ણ.

द्र० अच्युतशब्दः ।

**(प्रमातामह)**–પું–५५७–માતામહના પિતા.

* मातामहस्य पिता प्रमातामहः ।

**प्रमाद**–પું–१३८२–પ્રમાદ, અનવધાનપણું.

☐ अनवधानता ।

* प्रमदनं प्रमादः ।

**प्रमापण**–न.–३७०–હિંસા.

द्र० अपासनशब्दः ।

* मीनातेरेव स्वार्थे णिचि 'मिग्मीगोऽखलचलि'–।४।२।८।। इत्यात्वेऽनटि च प्रमापणम् ।

**प्रमीत**–પું–३७३–મરેલો, મૃત્યુ પામેલ.

द्र० उपगतशब्दः ।

* प्रमीयते स्म प्रमीतः ।

**प्रमीला**–સ્ત્રી–३१३–નિદ્રા, ઊંઘ, તન્દ્રા.

द्र० तन्द्राशब्दः ।

* प्रमीलन्तीन्द्रियाण्यस्यां प्रमीला ।

**प्रमुख**–न.–મુખ્ય, પ્રધાન, શ્રેષ્ઠ.

द्र० अग्रशब्दः ।

* प्रकृष्टं मुखमस्य प्रमुखम् ।

**प्रमृत**–न.–८६६ (शि. ७६)–ખેતી.

☐ अनृत, कृषि ।

**प्रमेह**–પું–४७०–બહુ મૂત્રતાનો રોગ.

☐ (मेह), बहुमूत्रता ।

* प्रमेहति–मूत्रयति अमेन प्रमेहः ।

**प्रमोद**–પું–३१६–આનંદ, હર્ષ.

द्र० आनन्दशब्दः ।

* प्रमोदनं प्रमोदः ।

**प्रमोदित**–પું–१९०–(शे.–४०)–કુબેરદેવ.

द्र० इच्छावसुशब्दः ।

**प्रयस्त**–न.–४११–સારી રીતે સંસ્કારિત અન્ન, પકવાન્ન વગેરે.

☐ सुसंस्कृत ।

* परिव्ययपाकादिना प्रयत्नसाध्यं प्रयस्तम्, सुष्ठुसंस्कृतम् ।

**प्रयाणक**–न.–७८९–પ્રયાણ, ગમન.

☐ प्रस्थान, गमन, व्रज्या, अभिनिर्याण, यात्रा ।

* प्रयायते प्रयाणम्, स्वार्थे के प्रयाणकम् ।

**प्रयाम**–પું–१५१८–મોંઘવારી કરવા માટે ધાન્યને એકઠું કરનાર.

☐ नीवाक ।

* प्रयमनं प्रयामः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रयास**–પું–૩૨૦–થાક, પરિશ્રમ, કસરત.

द्र० आयासशब्दः ।

* प्रयसनं प्रयासः ।

**प्रयुत**–પું–ન. ૮૭૩–૧૦ લાખ.

* दश लक्षाणि प्रयुतम्, पुंक्लीबलिङ्गः ।

**प्रयोग**–પું–૧૫૧૦–પ્રયોગ, કાર્યનો આરંભ..

☐ प्रत्युत्क्रम, (प्रत्युत्क्रान्ति) ।

* कर्मारम्भे प्रयुक्तिः प्रयोगः, प्रकृष्टयुद्धार्था प्रत्युत्क्रान्तिर्वा ।

**प्रयोजन**–ન.–૧૫૧૪–કાર્ય.

☐ कार्य, अर्थ, कृत्य ।

* प्रयोजयति प्रयोजनम् ।

**प्ररोह**–પું–૧૧૧૮–અંકુરો, ફણગો.

☐ अङ्कुर, अङ्कूर, रोह ।

* प्ररोहति प्ररोहः ।

**(प्रलम्बघ्न)**–પું–૨૨૪–બળદેવ, કૃષ્ણના મોટા ભાઈ.

द्र० अच्युताग्रजशब्दः ।

**प्रलम्बभिद्**–પું–૨૨૪–બળદેવ કૃષ્ણના મોટા ભાઈ.

द्र० अच्युताग्रजशब्दः ।

* प्रलम्बं भिनत्ति प्रलम्बभित् ।

**प्रलम्बाण्ड**–પું–૪૫૭–લાંબા અંડકોશવાળો

☐ मुष्कर ।

* प्रलम्बावण्डौ अस्य प्रलम्बाण्डः ।

**प्रलय**–પું–૧૬૧–પ્રલયકાળ, ક્ષય.

द्र० कल्पशब्दः ।

* प्रलीयते जगदत्र प्रलयः ।

**प्रलय**–પું–૩૦૭–મૂર્ચ્છા.

☐ अचेष्टता, (मूर्च्छा) ।

* प्रलीयते क्रियाऽत्र प्रलयो मूर्च्छेत्यर्थः ।

**प्रलाप** પું–૨૭૫–અર્થ વિનાનું બોલવું તે.

* प्रलपनं प्रलापः, अनर्थकं वचः ।

**प्रलापिन्**–પું–૨૨૫–(શે. ૭૭) બળદેવ.

द्र० अच्युताग्रजशब्दः ।



**प्रलोभ्य**–પું–૫૭૦–(શે. ૧૧૯) નિર્મળકેશ.

☐ शीर्षण्य, शिरस्य ।

**प्रवङ्ग**–પું–૧૨૯૨–(શિ. ૧૧૪) વાનર, વાંદરો.

द्र० कपिशब्दः ।

**प्रवण**–પું–૩૮૫–તત્પર, આસક્ત.

द्र० आसक्तशब्दः ।

* प्रकर्षेण वनति सम्भजते प्रवणः ।

**प्रवयण**–ન.–૮૯૩–પરોણો, ચાબુક.

☐ प्रतोद, प्राजन, तोत्र, तोदन ।

* प्राजन्ति प्रेरयन्त्यनेन प्रवयणम्, "त्रने–वा" ॥४।४।३॥ इति विकल्पेन वीरादेशः ।

**प्रवयस्**–પું–૩૩૯–સ્થવિર, વૃદ્ધ.

☐ वृद्ध, स्थविर, जरत्, जरिन्, जीर्ण, यातयाम, जीन ।

* प्रगतंवयो यौवनमस्य प्रवयाः ।

**प्रवर**–પું–૧૧૭૩–કાળા મગ.

☐ वासन्त, हरिमन्थज, शिम्बिक ।

* प्रव्रियते प्रवर, कृष्णमुद्गः ।

**प्रवर**–ન.–૧૪૩૮–મુખ્ય, પ્રધાન.

द्र० अग्रशब्दः ।

* प्रव्रियते प्रवरम्, 'युवर्ण'–।५।३।२८॥ इत्यल् ।

**प्रवर**–ન.–૬૪૦–(શે. ૧૩૦) અગર, અગરુ.

द्र० अगरुशब्दः ।

**प्रवरवाहन**–(દ્વિ. વ.)–પું–૧૮૨–(શે.–૩૬)–સ્વર્ગના વૈદ્ય.

द्र० अश्विजशब्दः ।

**प्रवर्ग्य**–પું–૮૩૬–યજ્ઞાગ્નિ, હોમ માટેનો અગ્નિ.

☐ होमाग्नि, महाज्वाल, महावीर ।

* प्रवृज्यते पापमनेन प्रवर्ग्यः ।

**प्रवर्ह**–ન.–૧૪૩૮–મુખ્ય, પ્રધાન.

द्र० अग्रशब्दः ।

* प्रकृष्टो वर्हः–परिच्छदोऽस्य प्रवर्हम्, प्रवर्हति वर्द्धते प्राधान्यं भजतीति वा, प्रवृंहत्युद्यच्छतीति वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रवह**-पुं-१५१४-જળ વગેરેનું બહાર જવું.

* प्रवहन्त्यनेन प्रवहः, 'गोचरसञ्चर'-।५।३। १३१॥ इति घः ।

**प्रवहण**-न.-७५३-ચકડોળ, પડદાવાળો રથ, પાલખી.

☐ कर्णीरथ, डयन, रथगर्भक ।

* प्रवहन्त्यनेन पोह्यते वा प्रवहणम् ।

**प्रवहण**-न.-८७६-(शि. ७७)-વહાણ.

द्र० पोतशब्दः ।

**प्रवल्हिका**-स्त्री-२५९-પ્રહેલિકા, ગુપ્ત ભાવવાળું કાવ્ય.

☐ प्रहेलिका ।

* प्रवल्हते-प्राधान्यं भजते प्रवल्हिका ।

**प्रवाच्**-पुं-३४६-બોલવામાં કુશળ.

☐ वाग्मिन्, वाचोयुक्तिपटु, समुख, (सवचन), वावदूक ।

* प्रकृष्टा वागस्य प्रवाक् ।

**प्रवाल**-पुं-न.-२९१-વીણાનો વચલો દંડ.

* वीणाया दण्डः, प्रवलति प्रवालः, पुंक्लीबलिङ्गः, ज्वलादित्वाद् णः । यत् **शाश्वतः**-"प्रवालो वल्लकीदण्डे, विद्रुमे नवपल्लवे ।"

**प्रवाल**-पुंन.-१०६६-પરવાળાં.

☐ विद्रुम, रक्ताङ्ग, रक्तकन्द, हेमकन्दल ।

* प्रवलति प्रवालम्, पुंक्लीबलिङ्गः, ज्वलादित्वात् णः, प्रवते अब्धेरूर्ध्वं वा 'चात्वाल'-(उणा-४८०) ॥ इति निपात्यते ।

**प्रवाल**-पुंन.-११२४-નવી કુંપળ.

* किसलये नवे प्रवलति प्रवालः, पुंक्लीबलिङ्गः, ज्वलादित्वात् णः ।

**प्रवासन**-न.-३७१-હિંસા.

द्र० अपासनशब्दः ।

* प्रवसतः प्रयुक्तिः प्रवासनम् ।

**प्रवासिन्**-पुं-४९३-મુસાફર.

द्र० अध्वगशब्दः ।

* प्रवसनशीलः प्रवासी ।

**प्रवाह**-पुं-१०८७-પ્રવાહ.

☐ ओघ, वेणी, धारा, रयस् ।

* प्रवहन्त्यनेन प्रवाहः ।

**प्रवाहिक** पुं-१८८-(शि० ३८)-રાક્ષસ.

द्र० असृक्पशब्दः ।

**प्रवाहिका**-स्त्री-४७१-ઝાડાનો રોગ, સંગ્રહણી.

☐ ग्रहणीरुज् ।

* मलप्रवहणं प्रवाहिका ।

**प्रविदारण**-न.-७९७-યુદ્ધ, લડાઈ.

द्र० अनीकशब्दः ।

* प्रविदार्यतेऽत्र प्रविदारणम् ।

**प्रवीण**-पुं-३४२-પ્રવીણ, હોંશિયાર.

द्र० अभिज्ञशब्दः ।

* प्रकर्षेण वीयते गम्यते प्रवीणः, 'वृवीह्वा-' (उणा-१८३) ॥ इति णक् ।

**प्रवृत्ति**-स्त्री-२६०-વાર્તા.

☐ वार्ता, वृत्तान्त, उदन्त ।

* प्रवर्तते जनोऽनया प्रवृत्तिः ।

**प्रवृत्ति**-स्त्री-१२२३-હાથીના ગંડસ્થળમાંથી ઝરતું પાણી.

☐ मद, दान ।

* प्रवर्ततेऽनया प्रवृत्तिः ।

**प्रवृद्ध**-न.-१४९५-ઘણું વધેલું, પ્રૌઢ.

☐ एधित, प्रौढ ।

* प्रवर्द्धते स्म प्रवृद्धम् ।

**प्रवेक**-न.-१४३८-મુખ્ય, પ્રધાન.

द्र० अग्रशब्दः ।

* प्रकृष्टो वेकः पृथक्त्वमस्य प्रवेकम् ।

**(प्रवेणि)**-स्त्री-५७०-વેણી.

☐ वेणि, (वेणी), प्रवेणी ।

**प्रवेणी**-स्त्री-५७०-વેણી.

☐ वेणि, (वेणी, प्रवेणि) ।

* प्रकृष्टा वेणिः प्रवेणी ।

**प्रवेणी**-स्त्री-६८०-ઝૂલ, હાથી વિ. ઉપર નાંખવાનું વસ્ત્ર.

द्र० आस्तरशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* प्रवीयते प्रवेणिः, 'कावा-' (उणा–६३४) ॥ इति णिः, ङ्यां प्रवेणी ।

**प्रवेतृ**–पुं–७६०–સારથી.

द्र० क्षत्तृशब्दः ।

* प्राजति प्रवेता, 'त्रऽनेवा' ।४।४।३॥ इति विकल्पेन वीरादेशः ।

**प्रवेल**–पुं–११७२–પીળા મગ.

☐ वसु, खण्डीर, जय, शारद ।

* प्रवेलति प्रवेलः, पीतवर्णः मुद्गः ।

**प्रवेश**–पुं–१५००–પ્રવેશ, અંદર જવું.

☐ अन्तर्विगाहन ।

* प्रवेशनं प्रवेशः ।

**प्रवेशन**–न–९९३–પ્રવેશ દ્વાર, મુખ્ય દરવાજો.

☐ सिंहद्वार ।

* प्रविश्यतेऽनेन प्रवेशनम् ।

**प्रवेष्ट**–पुं–५८९–ભુજા, હાથ.

☐ भुज, बाहु, दोस्, वाहा ।

* प्रवेष्टते प्रवेष्टः ।

'**प्रव्यक्त**'–न–१४६७–૨૫૮.

द्र० उल्बणशब्दः ।

**प्रव्रज्या**–स्त्री–८१–(शि.–६)–દીક્ષા.

☐ व्रतादान, परिव्रज्या, तपस्या, नियमस्थिति ।

**प्रशंसा**–स्त्री–२७०–વખાણ, સ્તુતિ.

द्र० अर्थवादशब्दः ।

**प्रशमन**–न.–३७०–હિંસા.

द्र० अपासनशब्दः ।

* प्रशमेः प्रशमनम् ।

**प्रशस्त**–न.–८६–(शि. ५)–કલ્યાણ.

द्र० कल्याणशब्दः ।

**प्रशस्यता**–स्त्री–६८–પ્રશંસાને પાત્ર પ્રભુની વાણીનો ૨૧ મો ગુણ.

* प्रशस्यता–उक्तगुणयोगात् प्राप्तश्लाघ्यता ।

**प्रश्न**–पुं–२६३–પૂછવું તે, સવાલ.

द्र० अनुयोजनशब्दः ।

* प्रच्छनं प्रश्नः, 'यजिस्वपि'–।५।३।८५॥ इति नः ।

**प्रश्नव्याकरण**–न.–२४४–૧૧ અંગો પૈકી ૧૦ મું અંગ સૂત્ર.

* प्रश्नः–पृच्छा तन्निर्वचनं व्याकरणं प्रश्नव्याकरणम्, तत्प्रतिपादको ग्रन्थोऽपि प्रश्नव्याकरणम् ।

**प्रश्रित**–पुं–४३१–વિનયી, નમ્ર.

☐ विनीत, निभृत ।

* प्रश्रयति स्म प्रश्रितः ।

**प्रष्ठ**–पुं–४९९–અગ્રેસર, નાયક.

द्र० अग्रतःसरशब्दः ।

* प्रतिष्ठते प्रष्ठः 'प्रष्ठोऽग्रगे'–।२।३।३२॥ इति षत्वम् ।

**प्रष्ठ**–न.–१४३९–પ્રધાન, શ્રેષ્ઠ.

द्र० अग्रशब्दः ।

* प्रतिष्ठते प्रष्ठः, 'प्रष्ठोऽग्रगे'–।२।३।३२॥ इति षत्वम् ।

'**प्रष्ठवाह्**'–पु–१२६०–અભ્યાસ માટે ધોંસરે જોડેલો નવો બળદ.

**प्रष्ठौही**–स्त्री–१२६६–ગર્ભિણી ગાય.

☐ गर्भिणी, 'प्रष्ठौही' (बालगर्भिणी) ।

* प्रष्ठं वहति प्रष्ठौही, गौरादित्वात् ङीः । 'प्रष्ठौही बालगर्भिणी' इत्यमरः ।

**प्रसङ्ग**–पु–७८२–(शे. १४५)–તલવાર.

द्र० असिशब्दः ।

**प्रसन्न**–न.–१०७१–નિર્મળ (પાણી).

☐ अच्छ ।

* प्रसीदति स्म प्रसन्नम् ।

**प्रसन्ना**–स्त्री–९०३–મદિરા.

द्र० अब्धिजाशब्दः ।

* प्रसीदत्यच्छत्वात् प्रसन्ना ।

**प्रसभ**–न.–८०४–બલાત્કાર, જુલમ.

☐ बलात्कार, हठ ।

* प्रगता सभा अत्र प्रसभम्, सभया युक्तायुक्तविचारो लक्ष्यते, क्लीबलिङ्गोऽयम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वैजयन्ती** तु- 'प्रसभोऽस्त्री बलात्कारः' इति पुंस्यप्याह ।

**प्रसर**-पुं-४९५-વેગ.

द्र० जवशब्दः ।

* प्रसरणं प्रसरः, बाहुलकादल् ।

**प्रसल**-पुं-१५६-હેમન્ત ઋતુ, માગશર અને પોષ માસ.

☐ हेमन्त, रौद्र, [हिमागम शे. २५] ।

* प्रकर्षेण सलति प्रसलः ।

**प्रसव**-पुं-५४१-જન્મ.

☐ विजनन ।

* प्रसवनं प्रसवः ।

**प्रसव**-पुं-११२५-ફૂલ, પુષ્પ.

द्र० कुसुमशब्दः ।

* प्रसूयते प्रसवः, 'युवर्ण'-।५।३।२८।। इत्यल् ।

**प्रसवबन्धन**-न.-११२७-ફળ-ફૂલ વ. નું ડીટું.

☐ वृन्त ।

* प्रसवः-पुष्पादिस्तस्य बन्धनं **यत्कात्यः**-'बन्धनं पुष्पफलयोर्वृन्तमाहुः ।'

**प्रसव्य**-न.-१४६५-વિપરીત, પ્રતિકૂળ, ઊલટું.

द्र० अपष्ठुशब्दः ।

* प्रगतं सव्यात् प्रसव्यम् ।

**प्रसह्य**-अ.-१५३९-હઠથી, બલાત્કારથી.

* प्रसहनं पूर्वं प्रसह्य । यथा-'प्रसह्य वित्तानि हरन्ति चौराः ।'

**प्रसादन**-न.-३९५- ભોજન, ભાત.

द्र० अन्नशब्दः ।

* प्रसाद्यतेऽनेनात्मा प्रसादनम् ।

**प्रसादन**-पुं-९९३-(शि. ८६)-દેવ મંદિર, રાજાનો મહેલ.

☐ प्रासाद ।

**प्रसादना**-स्त्री-४९६-સેવા, ભક્તિ.

द्र० आराधनाशब्दः ।

* प्रसाद्यते प्रसादना ।

**प्रसाधन**-न.-६३६-શણગાર, અલંકાર.

☐ मण्डन, प्रतिकर्मन् ।

* प्रसाध्यतेऽनेन प्रसाधनम् ।

**प्रसाधन**-पुं-६८८-કાંસકો, કાંસકી.

☐ कङ्कत, केशमार्जन ।

* प्रसाध्यन्ते केशा अनेन प्रसाधनः ।

**प्रसार**-पुं ७९१-ઘાસ, પાણી, લાકડા વગેરે માટે સૈન્યની બહાર જવું તે.

* सैन्याद् बहिस्तृणजलाद्यर्थं प्रसरणं-गमनं प्रसारः, **यल्लक्ष्यम्**-'नीरुद्धवीवधाऽऽसार प्रसारागा इव व्रजम्' **अमरस्तु**-'स्यादासारः प्रसरणम्' इत्याह, तच्चाऽर्थशास्त्रेण न संवदतीति नादृतम् ।

**प्रसारिन्**-पुं-३९०-પ્રસરનાર, વિસ્તાર પામનાર, ફેલાનાર.

☐ विसृत्वर, विसृमर, विसारिन् ।

* प्रसारी 'विपरिप्रात् सर्तेः'-'।५।२।५५।। इति घिनण् ।

**प्रसित**-पुं-३८५-તત્પર, આસક્ત.

द्र० आसक्तशब्दः ।

* प्रसिनोति स्म प्रसितः ।

**प्रसीदिका**-स्त्री-१११३-બગીચો, નાની વાડી,

☐ क्षुद्राराम ।

* प्रसीदति मनोऽस्यां प्रसीदिका, पृषोदरादित्वात् ।

**प्रसू**-स्त्री-५५७-માતા, જનની.

द्र० अम्बाशब्दः ।

* प्रसूते प्रसूः ।

**प्रसू**-स्त्री-१२३३-ઘોડી.

☐ वडवा, अश्वा, वामी, [अर्वती शे. १८०] ।

* प्रसूते प्रसूः, स्त्रीलिङ्गः ।

**प्रसूति**-स्त्री-५४२-સંતતિ, છોકરું.

द्र० अपत्यशब्दः ।

* प्रसूयतेऽसौ प्रसूतिः ।

**प्रसूतिका**-स्त्री-५३९ સુવાવડી સ્ત્રી.

☐ विजाती, प्रजाता, जातापत्या ।

* प्रसूते स्म प्रसूता सैव प्रसूतिका, प्रजाता सूतिरस्य वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रसूतिज**-न.-१३७१-दुःख, पीडा.
द्र० आर्त्तिशब्दः ।
* प्रसूतेर्जातं प्रसूतिजम् ।

**प्रसून**-११२४-फूल, पुष्प.
द्र० कुसुमशब्दः ।
* प्रसूयते स्म प्रसूनम्, 'सूयत्यादि'-।४।२।७०।। इति क्तस्य नत्वम् ।

**प्रसृत**-पुं-५९८-अर्ध अंजली, पसली.
☐ प्रसृति ।
* प्रस्रियते स्म प्रसृतः ।

**(प्रसृत)**-पुं-८८६-अर्ध अंजली, पसली.

**प्रसृता**-स्त्री-६१४-जांघ.
☐ जङ्घा, नलकिनी ।
* प्रसरति स्म प्रसृता ।

**प्रसृति**-स्त्री-५९८-अर्ध अंजली, पसली.
☐ प्रसृत ।
* प्रस्रियते प्रसृतिः, 'स्त्रियां क्तिः'-।५।३।९१ ।।

**प्रसेवक**-पुं-२९१-वीणानी नीचेनो भाग, काष्ठ-पात्र.
☐ ककुभ ।
* प्रसीव्यते प्रसेवः, स्वार्थे के प्रसेवकः ।

**प्रसेवक**-पुं-९१२-थेली, कोथळी.
☐ स्यूत ।
* प्रसीव्यते प्रसेवः, के प्रसेवकः, वस्त्राद्या-वपनम् ।

**प्रस्कन्न**-पुं-८०६-पतित, पडेलो.
☐ पतित ।
* प्रस्कन्दते स्म प्रस्कन्नः ।

**प्रस्तर**-पुं-१०३५-पत्थर.
द्र० अश्मन्शब्दः ।
* प्रस्तीर्यते प्रस्तरः ।

**प्रस्तर**-पुं-६८२-(शि.-५६) पांदडा वि. नी शय्या.
☐ संस्तर, स्रस्तर ।

**प्रस्तार**-पुं-११११-घणा घासवाळुं जंगल.
☐ तृणाटवी, झष ।
* प्रस्तीर्यते प्रस्तारः ।

**प्रस्ताव**-पुं-२५४-प्रकरण.
☐ प्रकरण ।
* प्रस्तूयते प्रस्तावः, 'प्रात् स्नुद्रुस्तोः'-।५।३।६७।। इति घञ् ।

**प्रस्ताव**-पुं-१५०९-समय, अवसर, प्रसंग.
द्र० अन्तरशब्दः ।
* प्रसङ्गेन स्तूयते प्रस्तावः, 'प्रात् स्नुद्रुस्तोः'-।५।३।६७।। इति घञ् ।

**प्रस्तावौचित्य**-न.-६७-देशकाळने अविरोधी प्रभुनी वाणीनो १५ मो गुण.
☐ प्रस्तावौचित्यं- देशकालाव्यतीतत्वम् ।

**प्रस्थ**-पुं-८८६-चार कुडव प्रमाण.
* चतुर्भिः कुडवैः प्रतिष्ठते प्रस्थः पुंक्लीब-लिङ्गः ।

**प्रस्थ**-न.-१०३५-पत्थर
☐ स्नु, सानु ।
* प्रतिष्ठन्तेऽस्मिन् समभूभागत्वात् प्रस्थम् ।

**प्रस्थान**-न.-७८९-प्रयाण यात्रा, गमन.
द्र० अभिनिर्याणशब्दः ।
* प्रस्थीयते स्थानात् चल्यते प्रस्थानम् ।

**प्रस्थापित**-न.-१४९२-मोकलेलुं.
☐ प्रतिशिष्ट, प्रहित, प्रेषित ।
* प्रस्थाप्यते स्म प्रस्थापितम् ।

**प्रस्फोटन**-न.-१०१७-छोडां काढी नाखवां ते
☐ पवन ।
* प्रस्फोट्यते-असारं बहिष्क्रियते प्रस्फोटनं, निर्बुसीकरणम् ।

**प्रस्फोट**-पुंन.-१०१८-सूपडुं.
☐ शूर्प (सूर्प) ।
* प्रस्फोटयतेऽनेन प्रस्फोटनम्, पुंक्लीबलिङ्गः, धान्यादिनिष्पवनभाण्डमित्यर्थः ।

**प्रस्मृत**-न.-१४९५-(शि. १३५) वीसरी गयेलुं.
☐ विस्मृत, अन्तर्गत ।

**प्रस्रव**-પું-૩૯૬-(શે० ૧૯૬) ચોખાનો માંડ, ઓસામણ.

द्र० आचामशब्दः ।

**प्रस्रवण**-પું-૧૦૨૯-માલ્યવાન પર્વત.

☐ माल्यवत् ।

* प्रस्रवति निर्झरैः प्रस्रवणः ।

**प्रस्रवण**-ન.-૧૦૯૬-ઝરણું, ઝરો, નદીનું ઉદ્‌ભવ સ્થાન.

☐ निर्झर, झर, सरि, उत्स, स्रव ।

* प्रस्रवन्त्यनेन गिरयः प्रस्रवणम् ।

**प्रस्राव**-પું-૬૩૩-મૂત્ર, પેશાબ.

द्र० नृजलशब्दः ।

* प्रस्रूयते प्रस्रावः, 'प्रात् स्नुद्रुस्तोः'-।५।३।६७।। इति घञ् ।

**प्रस्राव**-પું-૩૯૬-(શે. ૯૬) ચોખાનો માંડ. ઓસામણ.

द्र० प्रस्रवशब्दः ।

**प्रहत**-પું-૩૪૫-શસ્ત્રાદિ તત્વોનો સંસ્કારી.

☐ व्युत्पन्न, क्षुण्ण, संस्कृत ।

* प्रहण्यते स्म प्रहतः ।

**प्रहर**-પું-૧૪૫-પહોર, અહોરાત્રનો ૮ મો ભાગ.

☐ याम ।

* प्रह्रियतेऽस्मिन् कालसूचकं वाद्यं प्रहरः, 'पुन्नाम्नि घः'-।५।३।१३०।।

**प्रहरण**-ન.-૭૭૩-શસ્ત્ર, હથિયાર.

☐ आयुध, हेति, शस्त्र, अस्त्र ।

* प्रहरन्त्यनेन प्रहरणम् ।

**प्रहरण**-ન.-૭૯૬-યુદ્ધ, લડાઈ.

द्र० अन्तकशब्दः ।

* प्रहरन्तेऽत्र प्रहरणम् ।

**प्रहर्षुल**-પું-૧૧૭-બુધ ગ્રહ.

द्र० ज्ञशब्दः ।

* प्रहृष्यतीति प्रहर्षुलः, 'हृषिवृति'-(उणा-४८५) इत्यादिना उलः ।

**प्रहसन**-ન.-૨૮૪-નાટ્ય પ્રબંધનો એક પ્રકાર.

* एकस्य बहूनां वा चरितं प्रहस्यते यत्र तत् प्रहसनम् ।

**प्रहस्त**-પું-૫૯૬-હાથનો પંજો.

☐ चपेट, प्रतल, तल, तालिका, ताल ।

* प्रसृतो हस्तः प्रहस्तः ।

**प्रहासिन्**-પું-૩૩૧-વિદૂષક.

द्र० केलिकिलशब्दः ।

* प्रहसतीत्येवंशीलः प्रहासी ।

**प्रहि**-પું-૧૦૯૧-કૂવો.

☐ कूप, उदपान, अन्धु ।

* प्रहरति प्रहिः, 'नीवीप्रह्व्यो डित्'-(उणा-६१६) । इति इः, पुंलिङ्गः ।

**प्रहित**-ન.-૩૯૭-દાળ.

☐ सूप, सूद ।

* प्रकर्षेण हितं प्रहितम् ।

**प्रहित**-પું-૭૭૯-નાખેલું (બાણ).

☐ निरस्त, (क्षिप्त) ।

* प्रहीयते स्म प्रहितः क्षिप्त इत्यर्थः ।

**प्रहित**-ન.-૧૪૯૨-મોકલેલું.

☐ प्रस्थापित, प्रतिशिष्ट, प्रेषित ।

* प्रहीयते स्म प्रहितम् ।

**प्रहेलिका**-સ્ત્રી-૨૫૯-ગુપ્ત ભાવ સૂચવનાર શ્લોક કાવ્ય.

☐ प्रवल्हिका ।

* प्रहेलयति-अभिप्रायं सूचयति प्रहेलिका । सा शाब्दी आर्थी च । शाब्दी यथा-'पयस्विनीनां धेनूनां, ब्राह्मणः प्राप्य विंशतिम् । ताभ्योऽष्टादश विक्रीय, गृहीत्वैकां गृहं गतः' ।। आर्थी यथा-'जइ सासुआइ भणिआ पियवासघरंमि दीवयं देसु । ता कीस मुद्धड-मुही, हिअयंमि निवेसये दिट्ठीं ।।'

**प्रह्व**-પું-૩૮૫-તત્પર, આસક્ત.

द्र० आसक्तशब्दः ।

* प्रह्वयते-कार्ये स्पर्धते प्रह्वः, 'उपसर्गादातो डोऽश्यः'-।५।१।५६।। इति डः ।

**प्रह्लाद**-પું-૬૯૯-૭ મા પ્રતિ વાસુદેવ.

* प्रह्लादते प्रह्लादः ।

**प्रांशु**-ન.-૧૪૨૯-ઊંચું.

द्र० उच्चशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* प्राश्नुते प्रांशु 'अशेरान्नोन्तश्च'-(उणा-७१९) इत्युः ।

**प्राक्**-अ.-१५३५-पूर्वे, પહેલાં.

☐ पुरा ।

* प्राञ्चति प्राक्, यथा-'प्रागेव हरिणाक्षीणा-मुदीर्णो ।'

**प्राक्**-अ.-१५४२-(शि. २०१) પૂર્વદિશા, દેશ અથવા પૂર્વ કાળ,

**प्राक्**-अ.-१४५९-(शि. १३०) પ્રથમ, પહેલું.

द्र० अग्रशब्दः ।

**प्राकाम्य**-न.-२०२-ઇચ્છિત પ્રાપ્ત થાય તેવી શકિત, અષ્ટ સિદ્ધિ પૈકી એક સિદ્ધિ.

* प्रकृष्टः कामोऽस्य प्रकामः, तद्भावः प्राकाम्यम् इच्छाऽनभिघातः, नाऽस्य भूतस्वरूपैर्मूर्त्यादिभिरिच्छाऽभिहन्यते, भूमावुन्मज्जति निमज्जति यथोदके ।

**प्राकार**-पुं-९८०-કોટ, કિલ્લો.

☐ वरण, साल ।

* प्रकुर्वन्ति तमिति प्राकारः, 'घञ्युपसर्गस्य'-।३।२।८६॥ इति दीर्घः ।

**प्राकाराग्र**-न.-९८१-કોટના કાંગરા.

☐ कपिशीर्ष ।

* प्राकारस्याऽग्रं प्राकाराग्रम् ।

**प्राकृत**-पुं-९३२-પામર, નીચ, અસંસ્કારી.

द्र० इतरशब्दः ।

* प्रकृतौ भवः प्राकृतः, गुणाऽसंस्कृतः ।

**(प्राकृत)**-न.-२८५-પ્રાકૃત ભાષા.

**प्रागल्भ्य**-न.-५०९-સ્ત્રીઓનાં ૭ અયત્નજ અલંકાર પૈકી ૧ લો અલંકાર.

द्र० औदार्यशब्दः ।

* प्रागल्भ्यं-प्रयोगे निःसाध्वसत्वम् ।

**प्राग्ज्योतिष**-(બ.વ.)पुं-९५६-આસામ, કામરૂપ દેશ.

☐ कामरूप ।

* प्राग् ज्योतिषमत्र प्राग्ज्योतिषाः ।

**प्राग्रहर**-न.-१४३८-પ્રધાન, શ્રેષ્ઠ.

द्र० अग्रशब्दः ।

* प्रकृष्टमग्रं हरति प्राग्रहरम् ।

**'प्राग्र्य'**-पुं-१४३९-મુખ્ય, પ્રધાન.

द्र० अग्रशब्दः ।

**प्राग्वंश**-पुं-९९६-પત્નીશાલા નામનો અગ્નિ-શાળાનો આગલો ભાગ.

* वंशः कुलं स्थूणा वा, प्राग् वंशोऽत्र प्राग्वंशः, पत्नीशालाख्यः अग्निशालाया आद्योभागः ।

**'प्राघाण'**-पुं-१०१०-બારણાના આગળના ભાગમાં કરેલો ઓટલો.

द्र० अलिन्दशब्दः ।

**प्राघुण**-पुं-४९९-અતિથિ, મહેમાન.

द्र० अतिथिशब्दः ।

* प्राघुणति भ्राम्यति प्राघुणः ।

**प्राघूर्णक**-पुं-४९९-અતિથિ, મહેમાન.

द्र० अतिथिशब्दः ।

* प्राघूर्णते प्राघूर्णकः ।

**प्राङ्गण**-न.-१००४-આંગણું.

द्र० अङ्गशब्दः ।

* प्राङ्गति अत्र प्राङ्गणम्, 'तृकृशृ'-(उणा-१८७) इत्यणः, अङ्गणमपि ।

**प्राच्**-न.-१६८-પૂર્વ દિશામાં ઉત્પન્ન થયેલું.

☐ प्राचीन ।

* प्राञ्चतीति प्राक् ।

**प्राची**-સ્ત્રી-१६७-પૂર્વ દિશા.

☐ पूर्वा, [अपरेतरा शे० ३०] ।

* प्रथममस्यामञ्चति आदित्यः इति प्राची, क्विपि 'अञ्चः' ।२।४।३॥ इति ङीः ।

**प्राचीन**-न.-१६८-પૂર્વ દિશા માં ઉત્પન્ન થયેલું.

☐ प्राच् ।

* प्रागेव प्राचीनम् । 'अदिक्स्त्रियां वाऽञ्चः'-।७।१।१०७॥ इति स्वार्थे ईनः ।

**प्राचीन**-पुं-९८२-ઘરને ફરતો કોટ કે વાડ.

☐ वाट, आवेष्टक, वृति ।

* प्रागेव प्राचीनम् । 'अदिक्स्त्रियां वाऽञ्चः' ।७।१।१०७॥ इति स्वार्थे ईनः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्राचीनबर्हिष्**-पुं-१७१-ઇન્દ્ર.

द्र० अच्युताग्रजशब्दः ।

* प्राचीनमुख्या बर्हिषो दर्भा अस्य प्राचीनबर्हिः, यद्

**विष्णुपुराणे** — "प्राचीनाग्राः कुशास्तस्य, पृथिव्यां विश्रुता मुनेः । प्राचीनबर्हिरभवत्, ख्यातो भुवि महाबलः ॥"

**प्राचीनावीत**-८४५-ડાબા ખભા ઉપર ધારણ કરેલી જનોઈ.

* प्रागेव प्राचीनम्, आवीयते स्म आवीतम्, यन्मनुः-"प्रोद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः । सव्ये प्राचीनमावीती, निवीती कण्ठसज्जने ॥"

(**प्राचीश**)-पुं-१७१-ઇન્દ્ર.

द्र० अच्युताग्रजशब्दः ।

**प्राचेतस**-पुं-८४६-વાલ્મીકિ ઋષિ.

द्र० कविशब्दः ।

* प्रचेतसोऽपत्यं प्राचेतसः ।

**प्राच्य**-पुं-९५२-શરાવતી નદીનો પૂર્વ અને દક્ષિણનો દેશ.

* शरावत्याः सरितः पूर्वोत्तरेण वहन्त्या देशः पूर्वतो दक्षिणतश्च प्राच्यः ।

**प्राजन**-न.-८९३-પરોણો, ચાબુક.

☐ प्रतोद, प्रावयण, तोत्र, तोदन ।

* प्राजन्ति प्रेरयन्ति अनेन प्राजनम् ।

**प्राजापत्य**-पुं-६९५-ત્રિપૃષ્ઠ નામના પ્રથમ વાસુદેવ.

☐ त्रिपृष्ठ ।

* प्रजापते राज्ञोऽपत्यं प्राजापत्यः, 'अनिदमि'-।६।१।१५॥ इति ञ्यः ।

**प्राजितृ**-पुं-७६०-સારથિ.

द्र० क्षत्तृशब्दः ।

* प्रजति प्रेरयति प्राजिता ।

**प्राज्ञ**-पुं-३४१-વિદ્વાન, પંડિત.

द्र० अभिरूपशब्दः ।

* प्रज्ञा अस्त्यस्य प्राज्ञः, 'प्रज्ञाश्रद्धा'-।७।२।३३॥ इति णः, प्रज्ञ एवेति वा 'प्रज्ञादिभ्योऽण्'-।७।२।१६५॥

**प्राज्ञा**-स्त्री-५२२ તીક્ષ્ણ બુદ્ધિવાળી સ્ત્રી.

☐प्राज्ञी, (प्रजानती) ।

* प्रज्ञा अस्ति अस्याः प्राज्ञा, 'प्रज्ञाश्रद्धा'-।७।२॥३३॥ इति णः ।

**प्राज्ञी**-स्त्री-५२२-સમજદાર સ્ત્રી, શાણી.

☐ प्राज्ञी, (प्रजानती) ।

* प्रजानाति प्रज्ञाद्यणि प्राज्ञी ।

**प्राज्य**-न.-१४२५-ઘણું, બહુ.

द्र० अदभ्रशब्दः ।

* प्राज्यते-प्रकर्षेण जायते वा प्राज्यम्, 'शिक्या-स्याढ्य'- (उणा-३६४) ॥ इति ये निपात्यते ।

**प्राञ्जल**-पुं-३७५-સરળ, સાદો.

☐ ऋजु, अञ्जस ।

* प्राञ्जलयति-अञ्जलिं प्रबध्नाति प्राञ्जलः, प्राज्यते अभिगम्यते इति वा ।

**प्राड्विवाक**-पुं-७२०-ન્યાયાધીશ.

द्र० अक्षदर्शकशब्दः ।

* द्रष्टा— निर्णेता व्यवहाराणां ऋणादानादि-न्यायानां, पृच्छतीत्येवंशीलः प्राट्, 'विद्युद्वृ' ।५।२।८३॥ इति क्विपि निपात्यते, प्राट् चासौ विविधवाकश्च प्राड्विवाकः ।

**प्राण**-पुं-७९६-પરાક્રમ.

द्र० ऊर्ज्जशब्दः ।

* प्राणनं प्राणः ।

**प्राण**-पुं-१०६३-હીરાબોળ.

द्र० गन्धरसशब्दः ।

* प्राणिति अनेन प्राणः ।

**प्राण**-पुं-११०८-પ્રાણવાયુ.

* नासाग्रहृन्नाभिपादाङ्गुष्ठान्तगोचरः प्रकर्षेणानयति प्राणः, 'क्वचित्'-।५।१।१७१॥ इति डः, प्रसरणेन अनित्यनेन वा ।

**प्राण**-पुं-११०७-(शे० १७१)-વાયુ, પવન.

द्र० अनिलशब्दः ।

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

**प्राणतज**-(બ. વ.)-પુ-૯૩-૧૦ મા દેવલોકના દેવો.

* प्राणते जाताः प्राणतजाः ।

**प्राणद**-ન.-६२१-લોહી.

द्र० असृज्शब्दः ।

* प्राणं बलं ददाति प्राणदम् ।

**प्राणद**-ન.-१०७०-પાણી.

द्र० अप्शब्दः ।

* प्राणान् ददाति प्राणदम् ।

**प्राणयम**-પું-૮૩-પ્રાણાયામ, ૮ પૈકી યોગનું ૪ થું અંગ.

☐ प्राणायाम, श्वासप्रश्वासरोधन ।

* प्राणस्य यमनं प्राणयमः ।

**(प्राणसम)**-પું-૫૧૬-વહાલો પતિ, વર.

द्र० कान्तशब्दः ।

**प्राणसमा**-स्त्री-૫૧૬-વહાલી સ્ત્રી.

द्र० कान्ताशब्दः ।

* प्राणानां समा-तुल्या प्राणसमा ।

**(प्राणहिता)**-स्त्री-૬૧૫-પગરખા, જોડા, બૂટ.

द्र० उपानहशब्दः ।

**प्राणायाम**-પું-૮૩-પ્રાણાયામ, યોગનું ૪ થું અંગ.

☐ प्राणयम, श्वासप्रश्वासरोधन ।

* प्राणस्य आयमनं प्राणायामः ।

**प्राणावाय**-ન.-૨૪૮-૧૪ પૂર્વ પૈકી ૧૨મું પૂર્વ.

☐ (प्राणावायप्रवाद) ।

* प्राणा वर्णिता यत्र तत् प्राणावायम् ।

**(प्राणावायप्रवाद)**-ન.-૨૪૮-૧૪ પૂર્વ પૈકી ૧૨ મું પૂર્વ.

☐ प्राणावाय ।

**प्राणिद्यूत**-ન.-૪૮૮-કૂકડા વગેરેને સરત કરી લડાવવા તે.

☐ समाह्वय ।

* प्राणिभिः मेषकुक्कुटादिभिः द्यूतं प्राणिद्यूतम् ।

अ. ६२

**प्राणिन्**-પું-૧૩૬૬-(શિ. ૧૨૩) સંસારી જીવ.

द्र० असुमत्शब्दः ।

**(प्राणेश)**-પું-૫૧૬-વહાલો પતિ, વર.

द्र० कान्तशब्दः ।

**प्राणेशा**-स्त्री-૫૧૫-વહાલી પત્ની.

द्र० कान्ताशब्दः ।

* प्राणानीष्टे प्राणेशा ।

**प्रातर्**-अ.-१५३३-સવાર.

☐ प्रगे ।

* प्रकर्षेणातति अत्र प्रातः, 'प्रादतेदरर्' (उणा-९४५) ॥ यथा-'प्रातरेव समुत्थाय' ।

**प्रातराश**-પું-૪૨૫-નાસ્તો, પ્રભાતનું ભોજન.

☐ कल्यवर्त ।

* प्रातरशनं प्रातराशः ।

**प्रातिहारिक**-પું-૯૨૫-ઇન્દ્રજાલિક, બાજીગર.

☐ मायाकार ।

* प्रतिहरणं व्याजः प्रयोजनमस्य प्रातिहारिकः ।

**प्राथमकल्पिक**-પું-૭૯-નવીન શિષ્ય, પ્રથમ દીક્ષા લેનાર.

☐ शैक्ष ।

* प्रथम कल्पः-आद्यारम्भः प्रयोजनमस्य प्राथमकल्पिकः, प्रथमकल्पमधीत इति वा, 'पद-कल्पलक्षणान्तक्रत्वाख्यानाख्यायिकात्'-।६।२।११९॥ इतीकण् ।

**प्रादुष्कृत**-ન.-૧૪૭૮-(શિ-૧૩૨)-પ્રગટ કરાયેલું, બતાવેલું.

☐ दर्शित, प्रकाशित, आविष्कृत, प्रकटित ।

**प्रादुस्**-अ.-१५३९-પ્રકટ, પ્રકાશ, ખુલ્લું.

☐ आविस् ।

* प्राति प्रादुः, 'रुव्यर्ति'-(उणा-९९७) । इत्युस् । यथा-'प्रादुरासीद् वसुंधरा' ।

**प्रादेश**-પું-૫૭૫-અંગૂઠો તર્જની સહિત લંબાવે તેટલી લંબાઈ.

* प्रदेशिन्या सार्धमङ्गुष्ठे प्रसारिते प्रादिश्यते प्रादेशः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रादेशन**–न.–३८६–(शि. २७) દાન, ત્યાગ.
द्र० अंहतिशब्दः ।

**प्राध्वम्**–अ.–१५४२–(शे. १९९) અનુકૂળ.

**प्रान्तर**–न.–९८५–શૂન્ય માર્ગ, પાણી છાયા ન હોય તેવો માર્ગ.
* प्रगता अन्तरेऽस्मात् प्रान्तरं–दूरशून्यो मार्गः ।

**प्रापणिक**–पुं–८७६–(शि–७७)–વેપારી.
द्र० आपणिकशब्दः ।

**प्राप्त**–वाच्य–७४३–યોગ્ય, વ્યાજબી, ન્યાયયુક્ત
द्र० अभिनीतशब्दः ।
* प्राप्यते स्म प्राप्तम् ।

**प्राप्त**–न.–१४७०–મેળવેલું.
☐ भावित, लब्ध, आसादित, भूत, [विन्न शि. १३५] ।
* प्राप्यते स्म प्राप्तम् ।

**प्राप्तरूप**–पुं–३४१–વિદ્વાન, પંડિત.
द्र० अभिरूपशब्दः ।
* प्राप्तं रूपं येन प्राप्तरूपः ।

**प्राप्ति**–स्त्री २०२–પ્રાપ્તિ–સિદ્ધિ,આંગળના અગ્રભાગથી સૂર્ય–ચન્દ્રને સ્પર્શવાની શક્તિ.
* प्रापणं प्राप्तिः, सर्वे भावाः संनिहिता भवन्ति तस्य, तद्यथा–भूमिष्ठ एव अङ्गुल्यग्रेण चन्द्रमसं स्पृशति ।

**प्राभृत**–न.–७३७–દાન,ભેટ, લાંચ.
द्र० आमिषशब्दः ।
* प्रकर्षेण आराधनार्थं प्राऽऽश्रियते ढौक्यते स्म प्राभृतम् ।

**प्राय**–पुं–५६५–બાલ્યાદિ વય, અવસ્થા.
☐ वयस्, दशा ।
* प्रकर्षेणाऽयन्ते प्रायाः, पुंलिङ्गः ।

**प्राय**–पुं–८४३–સંન્યાસીનું અનશન, બધું ત્યાગી મરણ પામવું તે.
☐ संन्यास्यनशन ।
* प्रकर्षेणायन्तेऽनेन परलोकं प्रायः ।

**प्रायस्**–अ.–१५२७ ઘણું કરીને.
☐ (भूमन्) ।
* प्रैति प्रायः, 'असू'-(उणा–९५२) ॥ इत्यस् । यथा-प्रायः प्रत्ययमाधत्त, स्वगुणेषूत्तमादरः ।

**प्रालम्ब**–न.–६५२–ગળામાંથી બન્ને બાજુએ છાતી ઉપર લટકતી માળા.
* कण्ठादुभयतो वक्षसि लम्बमानं पुष्पदाम प्रालम्बते प्रालम्बम् ।

**प्रालम्बिका**–स्त्री–६५७–નાભિ સુધી લટકતી સોનાની કંઠી.
* हेम्ना कृता कण्ठभूषा प्रालम्बिका ।

**प्रालेय**–न.–१०७२–હિમ, ઝાકળ.
द्र० अवश्यायशब्दः ।
* प्रलयादागतं प्रालेयम् । 'तत आगते'–।६।३।१४९॥ इत्यण् ततः 'केकयमित्रयुप्रलयस्य यादेः–' ।७।४।२॥ इति वृद्धौ इयादेशे च साधुः ।

**प्रावरण**–न.–६७१–ઓઢવાનું વસ્ત્ર.
☐ प्रच्छादन, संव्यान, उत्तरीयक ।
* प्राव्रियतेऽनेन प्रावरणम् ।

**प्रावार**–पुं–६७२–ખેસ, ઉત્તરાસંગ.
☐ वैकक्ष, उत्तरासङ्ग, बृहतिका ।
* प्राव्रियतेऽनेनाङ्गं प्रावारः, 'वृगो वस्त्रे'–।५।३।५२॥ इति घञ् ।

**प्राश्निक**–पुं–८८२–(शे. १५४) સાક્ષી (પ્રમાણિક પુરુષ).
☐ साक्षिन्, स्थेय । [मध्यस्थ शि. १५४] ।

**प्रावृष्**–स्त्री–१५७–વર્ષા ઋતુ–શ્રાવણ ભાદરવો માસ.
☐ वर्षा, तपात्यय, मेघकाल, मेघागम, क्षरिन्, [वरिष शि. १२] ।
* प्रवर्षन्त्यस्यां मेघाः प्रावृट्, स्त्रीलिङ्गः 'गतिकारकस्य'–।३।२।८५॥ इत्यादिना क्विपि दीर्घः ।

**प्रावृषायणी**–स्त्री–११५१–કૌવચ.
द्र० आत्मगुप्ताशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रास**-पुं-७८५-ભાલો.

☐ कुन्त ।

* प्रास्यते प्रासः हस्तधार्यः शल्यः ।

**प्रासक**-पुं-४८६-જુગારના પાસા.

☐ पाशक, अक्ष, देवन ।

* प्रास्यन्ते-क्षिप्यन्तेऽनेन प्रासकः ।

**प्रासङ्ग**-पुं-७५७-ભેતર,-નવા વાછરડા માટેની ધૂંસરી.

☐ युगान्तर ।

* प्रसज्ज्यते वोढृस्कन्धे प्रासङ्गः, 'घञ्युपसर्गस्य'-।३।२।८६॥ इति दीर्घः।

**प्रासङ्ग्य**-पुं-१२६१-ધોંસરી ખેંચનાર બળદ.

* प्रासङ्गं वहति प्रासङ्ग्यः ।

**प्रासाद**-पुं-९९३-દેવ મંદિર, રાજાનો મહેલ.

☐ [प्रसादन शि. ८६] ।

* प्रसीदन्ति नयन-मनांसि अस्मिन्निति प्रासादः, 'घञ्युपसर्गस्य'-।३।२।८६॥ इति दीर्घः, प्रसादनोऽपि ।

**प्रासिक**-पुं-७७०-ભાલાવાળો.

☐ कौन्तिक ।

* प्रासः प्रहरणमस्य प्रासिकः, 'प्रहरणम्'-।६।४।६२।। इतीकण् ।

**(प्राहारिक)**-पुं-७६२-પહેરગીર, સૈનિક.

☐ सेनारक्ष, सैनिक ।

**प्राह्णे**-अ.-१३७-પ્રભાતકાળ.

द्र० अहर्मुखशब्दः ।

**प्रिय**-पुं-८(प.)-આ શબ્દ લગાડવાથી પતિ વાચક શબ્દ બને છે.

☐ वर, रमण, प्रणयिन्, ईश ।

* यथा-गौरीप्रियः शिवः ।

**प्रिय**-वाच्य-१४४५-સુન્દર, મનોહર.

द्र० अभिरामशब्दः ।

* प्रीणाति प्रियम्, 'नाम्युपान्त्यप्रीकृ'-।५।१।५४॥ इति कः वाच्यलिङ्गः ।

**(प्रिय)**-पुं-५१६-પતિ.

द्र० कान्तशब्दः ।

**प्रियक**-पुं-११४४-અસન વૃક્ષ, બીવક.

द्र० असनशब्दः ।

* प्रियकः काम्यत्वात् ।

**'प्रियक'**-पुं-११३८-કદંબ.

द्र० कदम्बशब्दः ।

**'प्रियक'**-पुं-११९४-કાંગ.

द्र० प्रियंगुशब्दः ।

**'प्रियक'**-पुं-१२९४-એક પ્રકારની હરણની જાત.

**(प्रियङ्कर)**-पुं-९४-૮મા ગ્રૈવેયક દેવ.

**प्रियङ्गु**-स्त्री-११७-સુગંધી ઘઉંલે.

☐ फलिनी, श्यामा 'महिलाह्वया, लता, गोवन्दनी, गुन्द्र, फली, विष्वक्, सेना, गन्धफली, कारम्भा, प्रियक' ।

* प्रिणाति प्रियङ्गुः, स्त्रीलिङ्गः, 'प्रिकैणै'-(उणा-७।६२) इत्यङ्गुक् ।

* श्राद्धे देवः श्राद्धदेवः, पितृपतित्वात् ।

**श्रान्त**-पुं-८११-ઇન્દ્રિયો ઉપર જય મેળવનાર.

☐ शान्त, जितेन्द्रिय ।

* श्राम्यति स्मेति श्रान्तः ।

**श्रावण**-पुं-१५४-શ્રાવણ માસ.

☐ नभस्, श्रावणिक ।

* श्रावणी पौर्णमास्यस्येति श्रावणः ।

**श्रावणिक**-पुं-१५४-શ્રાવણ માસ.

☐ श्रावण, नभस् ।

* श्रावणी पौर्णमास्यस्येति श्रावणिकः ।

**श्री**-स्त्री-४०-શ્રી અરનાથ ભગવાનની માતા

* श्रीरिव श्रीः ।

**श्री**-स्त्री-२२६-લક્ષ્મી.

द्र० आशब्दः ।

* श्रयतीत्येवंशीला श्रीः, "दिद्युद्दद्"-॥५।२।८३॥ इत्यादिना क्विपि दीर्घो निपात्यते ।

**श्री**-स्त्री-३५७-સંપત્તિ.

द्र० ऋद्धिशब्दः ।

*श्रयणशीला श्रीः ।

**श्री**-स्त्री-१५१२-શોભા, કાન્તિ.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० अभिख्याशब्दः ।

* श्रयणशीला श्रीः स्त्रीलिङ्गः, "विपुद्ध्द"- ॥५।२।८३॥ इति क्विपि निपात्यते ।

**श्रीकण्ठ**–पुं–१९५–शंकर.

द्र० अट्टहासिन्शब्दः।

* श्रीः शोभा कण्ठेऽस्येति श्रीकण्ठः, तथाहि **महाभारते—**

"इन्द्रेण तत् पुरा क्षिप्तं, वज्रं श्री कण्ठकाषिणा ।
दग्ध्वा कण्ठं तु तं पार्थ ! ततः श्रीकण्ठता मम ।

**श्रीकण्ठसख**–पुं–९–(प.)–कुबेर.

**श्रीकर**–पुं–२१९–(शे.६९)–विष्णु, नारायण.

द्र० अच्युतशब्दः ।

**श्रीखण्ड**–न.–६४१–चन्दन.

द्र० गन्धसारशब्दः ।

* श्रिया खण्डयतीति श्रीखण्डम् ।

**श्रीगर्भ**–पुं–२१९–(शे.६८)–विष्णु, नारायण.

द्र० अच्युतशब्दः।

**श्रीगर्भ**–पुं–७८२–(शे.१४८)–तलवार.

द्र० असिशब्दः।

**(श्रीगुणसुन्दर)**–पुं–३४–त्रीजा दशपूर्वी.

**(श्रीगुप्त)**–पुं–३४–नवमां दशपूर्वी.

**श्रीघन**–पुं–२३४–सुगत, बुद्ध.

द्र० अद्वयशब्दः ।

* श्रिया योगविभूत्या घनो निबिडः, श्रिया घन इव वर्षिता वा श्रीघनः।

**श्रीघन**–न.–४०६–(शे.१००)–दही, गोरस.

☐ क्षीरज, दधि, गोरस, [मङ्गल्य शे.१००]।

**श्रीद**–पुं–१८९–कुबेरदेव.

द्र० इच्छावसुशब्दः।

* श्रियं ददातीति श्रीदः।

**श्रीधर**–पुं–५१–गई उत्स.ना ७मां भग.

* मुक्तिश्रियं धरतीति श्रीधरः।

**श्रीधर**–पुं–२१५–विष्णु, नारायण.

द्र० अच्युतशब्दः ।

**श्रीनन्दन**–पुं–२२८–कामदेव.

द्र० अङ्गजशब्दः ।

* श्रिया लक्ष्म्या नन्दनः श्रीनन्दनः, रुक्मिण्याः श्रियोऽवतारत्वात् ।

**श्रीपति**–पुं–२१४–विष्णु, नारायण.

द्र० अच्युतशब्दः ।

* श्रियः पतिः श्रीपतिः, यौगिकत्वाद् लक्ष्मीनाथ इत्यादयः ।

**श्रीपथ**–पुं–९८७ राजमार्ग, धोरीरस्तो.

द्र० असङ्कुलशब्दः ।

* श्रिया उपलक्षितः पन्थाः श्रीपथः।

**श्रीपर्णी**–स्त्री–११४३–सीवणनुं वृक्ष.

द्र० काश्मरीशब्दः।

* श्रीयुक्तानि पर्णान्यस्या श्रीपर्णी "पाककर्णपर्ण-वालान्तात्–" ॥२।४।५५॥ इति ङीः।

**(श्रीपर्याय)**–न.–६४६–लवींग.

☐ लवङ्ग, देवकुसुम, श्रीसंज्ञ ।

**श्रीफल**–पुं–११३५–बीलीनुं झाड.

द्र० बिल्वशब्दः।

* श्रीप्रदानि फलान्यस्येति श्रीफलः ।

**श्रीमत्**–पुं–३५७–(शे.२३)–लक्ष्मीवाळो.

द्र० लक्ष्मणशब्दः।

**श्रीमत्**–पुं–१३३५–(शे.१९१)–पोपट.

द्र० कीरशब्दः ।

**श्रीमत्कुम्भ**–न.–१०४४–(शे.१६३)–सोनुं.

द्र० अर्जुनशब्दः ।

**(श्रील)**–पुं–३५७–लक्ष्मीवान.

द्र० लक्ष्मणशब्दः ।

**श्रीवत्स**–पुं–४७–श्रीशीतलनाथ भ. नुं लांछन.

**श्रीवत्स**–पुं–२१८–विष्णु, नारायण.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० अच्युतशब्दः ।

* श्रीवत्सो हृदि अस्येति श्रीवत्सः ।

**श्रीवत्स**-पुं-२२२-વિષ્ણુના હૃદય પર રહેલું ચિન્હ.

* श्रिया युक्तो वत्सो वक्षोऽनेनेति श्रीवत्सः, रोमावर्तविशेषः ।

**श्रीवत्सभृत्**-पुं-२१९-વિષ્ણુ, નારાયણ.

द्र० अच्युतशब्दः ।

* श्रिवत्सं बिभर्तीति श्रीवत्सभृत्, यौगिकत्वात् श्रीवत्साङ्कः ।

**(श्रीवत्साङ्क)**-पुं-२१९-વિષ્ણુ, નારાયણ.

द्र० अच्युतशब्दः ।

**श्रीवराह**-पुं-२१९-(शे.७६)-વિષ્ણુ, નારાયણ.

द्र० अच्युतशब्दः ।

**श्रीवास**-पुं-६४८-ગૂગળનો ધૂપ.

द्र० पायसशब्दः ।

* श्रियो वासः श्रीवासः ।

**श्रीवृक्ष**-पुं-११३१-પીપળો.

द्र० अश्वत्थशब्दः ।

* श्रिया युक्तो वृक्षः श्रीवृक्षः ।

**श्रीवृक्षकिन्**-पुं-१२३६-શ્રીવૃક્ષના ચિન્હથી પંક્તિ ઘોડી.

☐ हृद्वक्त्रावर्तिन् ।

* श्रीवृक्षको लाञ्छनमस्त्यस्येति श्रीवृक्षकी ।

**श्रीवेष्ट**-पुं-६४८-(शे.१३४)-ગૂગળનો ધૂપ.

द्र० पायसशब्दः ।

**श्रीसंज्ञ**-न.-६४६-લવીંગ.

☐ लवङ्ग, देवकुसुम, (श्रीपर्याय) ।

* श्रीसंज्ञं श्रीपर्यायमित्यर्थः ।

**श्रुतकर्मन्**-पुं-१२१-(शे.१५)-શનિગ્રહ.

द्र० असितशब्दः ।

**श्रुतदेवी**-स्त्री-२४१-સરસ્વતી દેવી, વાણી.

द्र० गीर्वाणीशब्दः ।

* श्रुतस्य प्रवचनस्याऽधिष्टात्री देवी श्रुतदेवी ।

**श्रुतश्रवोऽनुज**-पुं-१२१-(शे.१६)-શનિગ્રહ.

द्र० असितशब्दः ।

**श्रुति**-स्त्री-२४९-વેદ.

☐ स्वाध्याय, आम्नाय, छन्दस्, वेद ।

* श्रूयते इति श्रुतिः, "श्रादिभ्यः" ॥५।३।९२॥ इति क्तिः ।

**श्रुति**-स्त्री-५७३-કાન.

द्र० कर्णशब्दः ।

* श्रुयतेऽनया श्रुतिः, श्रादित्वात् क्तिः ।

**(श्रुतिविकल)**-पुं-४५४-બહેરો.

☐ अकर्ण, एड, बधिर ।

**श्रेणि**-पुं-स्त्री-८९९-શિલ્પીઓનો સમુદાય.

* श्रीयते इति श्रेणिः पुंस्त्रीलिङ्गः, "कावावी-" (उणा-६३४) इति णः ।

**(श्रेणी)**-स्त्री-१४२३-શ્રેણી, આવલી.

द्र० आलिशब्दः ।

**(श्रेणि)**-पुं-स्त्री-१४२३-શ્રેણી, પંક્તિ.

द्र० आलिशब्दः ।

* श्रीयते इति श्रेणिः, पुंस्त्रीलिङ्गः ।

**श्रेणिक**-पुं-७१२-મગધપતિ રાજા, શ્રેણિક.

☐ भम्भासार ।

* श्रेणीः कायतीति श्रेणिको मगधेश्वरः ।

**श्रेणी**-स्त्री-१४२३-શ્રેણી, પંક્તિ.

द्र० आलिशब्दः ।

* श्रीयते इति श्रेणिः, पुंस्त्रीलिङ्ग, ङ्यां श्रेणी ।

**श्रेयस्**-पुं-२९-અગિયારમાં તીર્થંકર ભ.

☐ श्रेयांस ।

* सकलभुवनस्यापि प्रशस्यतमत्वेन श्रेयान् ।

**श्रेयस्**-न.-७४-મોક્ષ.

द्र० अक्षरशब्दः ।

* अतिशयेन प्रशस्यं श्रेयः "गुणाङ्गात्-" ॥७।३।९॥ इतियसौ "प्रशस्यस्य श्रः" ।७।४।३४॥ इति आदेशः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**श्रयस्**-न.-८६-કલ્યાણ, શુભ.

द्र० कल्याणशब्दः ।

* अतिशयेन प्रशस्यं श्रेयः ।

**श्रयस्**-न.-१३७९-ધર્મ, પુણ્ય, સુકૃત્ય.

☐ धर्म, पुण्य, वृष, सुकृत ।

* अतिशयेन प्रशस्यं श्रेयः ।

**श्रयस्**-न.-१४३९-શ્રેષ્ઠ, પ્રધાન

☐ श्रेष्ठ, उत्तम, पुष्कल, 'अतिशोभन' ।

* अतिशयेन प्रशस्यं श्रेयः ।

**श्रयसी**-સ્ત્રી-११४६-હરડે.

द्र० अभयाशब्दः ।

**श्रयांस**-પું-२७-અગિયારમાં તીર્થંકર ભગવાન.

* श्रेयांसावंसावस्येति श्रेयांसः पृषोदरादित्वात्, **यथा**- ।

गर्भस्थेऽस्मिन् केनाऽप्यानाक्रान्तपूर्वदेवताधिष्ठितशय्या जनन्याक्रान्तेति श्रेयो जातमिति श्रेयांसः ।

**श्रयांस**-પું-२९-અગિયારમાં તીર્થંકર ભગવાન.

⊡ श्रेयस् ।

**श्रष्ठ**-न.-१४३९-અત્યંત ઉત્તમ, પ્રધાન.

☐ श्रेयस्, सत्तम, पुष्कल, 'अतिशोभन' ।

* अतिशयेन प्रशस्यं श्रेष्ठम् ।

**श्रोण**-પું-४५२-પાંગળો.

द्र० पङ्गुशब्दः ।

* "श्रोणृ सङ्घाते" श्रोणतीति श्रोणः ।

**श्रोणि**-સ્ત્રી-પું-६०७-કેડ.

द्र० ककुद्मतीशब्दः ।

* श्रूयते किङ्किणीध्वनिरत्रेति श्रोणिः पुंस्त्रीलिङ्गः "कावा-" (उणा-६३४) इति णिः, श्रोण्यते संहन्यते इति वा ।

**श्रोत्र**-न.-५७४-કાન.

द्र० कर्णशब्दः ।

* श्रूयतेऽनेनेति श्रोत्रं "हुयमा-" (उणा-४५१) इति त्रः ।

**श्रोत्रिय**-પું-८१७-વેદ જાણનાર બ્રાહ્મણ.

☐ छान्दस ।

* छन्दोऽधीते इति श्रोत्रियः, "छन्दोऽधीते श्रोत्रश्च" वा । ॥७।१।१७३॥ इतीयः श्रोत्रादेशश्च ।

**(श्रोत्रियसमाज)**-પું-१४१४-શ્રોત્રિયોનો સમુદાય.

**श्रौषट्**-अ.-१५३८-દેવાને બલિદાન આપવામાં વપરાતો શબ્દ.

☐ वौषट्, वषट्, स्वाहा, स्वधा ।

* श्रूयते इति श्रौषट्, बाहुलकात् क्विबन्तो निपात्यते, **यथा**-"अस्तु श्रौषट्" ।

**श्लक्ष्ण**-न.-१४२७-સૂક્ષ્મ, બારીક, ઝીણું.

☐ सूक्ष्म, पेलव ।

* श्लिष्यते इति श्लक्ष्णम्, "भृगतृणगुण-" (उणा-१८६) इति साधुः ।

**श्लथ**-પું-४९१-ઢીલો, શિથિલ, દુર્બળ.

☐ शिथिल ।

* श्लथयतीति श्लथः ।

**श्लोधा**-સ્ત્રી-२७०-વખાણ, પ્રશંસા.

द्र० अर्थवादशब्दः ।

**श्लीपद्**-न.-४६५-પગનો હાથીપગો રોગ.

☐ पादवल्मीक ।

* श्लिष्टं पदं येन श्लीपदं, पृषोदरादित्वात् ।

**श्लील**-પું-३५७-લક્ષ્મીવાળો.

द्र० लक्ष्मणशब्दः ।

* श्रियं लातीति श्लीलः, श्रीरस्यास्तीति वा सिध्मादित्वाद्लः, ऋफिडादित्वाद् रस्य लत्वम्, श्रीमान् इत्यपि ।

**श्लेष्मण**-પું-४६०-સળેખમ, કફનો રોગી.

☐ श्लेष्मल, कफिन् ।

*श्लेष्मा अस्त्यस्येति श्लेष्मणः, अङ्गादित्वादनः

**श्लेष्मन्**-પું-४६२-કફ.

द्र० कफशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* श्लिष्यति हृदयादौ इति श्लेष्मा "मन्"-(उणा-९११) इति मन् ।

**श्लेष्मल**-पुं-४६०-સળેખમ, કફનો રોગી.

☐ श्लेष्मण, कफिन् ।

* श्लेष्मा अस्त्यस्येति श्लेष्मलः, सिध्मादित्वाल्लः ।

**श्लेष्मातक**-पुं-११४४-મોટી ગુંદી.

☐ शेलु 'सेलु' ।

* श्लिष्यति कफोऽस्मात् इति श्लेष्मातकः, "श्लेष्मातक"-(उणा-८३) इत्यातके निपात्यते, श्लेष्माणमततीति वा ।

**श्लोक**-पुं-२७३-યશ, કીર્તિ.

द्र० अभिख्याशब्दः ।

* श्लोक्यते इति श्लोकः ।

**श्वःश्रेयस**-न.-८६-કલ્યાણ, શુભ.

द्र० कल्याणशब्दः ।

* शोभनं श्रेयः श्वःश्रेयसं, श्व आगामि श्रेयो वा "निसश्च श्रेयसः" ॥७।३।१२२॥ इत्यत्समासान्तः ।

**श्वजीविका**-स्त्री-८६६-સેવા, ચાકરી.

☐ सेवावृत्ति, (सेवा) ।

* शुन इव जीविका वृत्तिः परपिण्डोपजीवित्वादधमेत्यर्थः ।

**श्वदंष्ट्रा**-स्त्री-११५६-ગોખરૂં.

द्र० गोक्षुरशब्दः ।

* शुनो दंष्ट्रेव श्वदंष्ट्रा, संज्ञाशब्दत्वात् "शुनः" ॥३।२।९०॥ इति दीर्घत्वाभावः ।

**श्वदयित**-न.-६२६-હાડકું.

द्र० अस्थिशब्दः ।

* शुनो दयितं श्वदयितम् ।

**श्वन्**-पुं-१२८०-કૂતરો.

द्र० अस्थिभुजशब्दः ।

* श्वयतीति श्वा "श्वन्मातरि"-(उणा-९०२) इत्यनि निपात्यते । शेषश्चात्र- "शुनि क्रोधी रसापायी, शिवारिः सूचको रुरुः । वनंतपः स्वजातिद्विट्, कृतज्ञो मल्लहश्वसः ॥ दीर्घनादः पुरोगामी, स्यादिन्द्रमहकामुकः । मण्डलः कपिलो ग्राममृगश्चन्द्रमहोऽपि च ॥"

**श्वपच**-पुं-९३३-ચાંડાલ.

द्र० अन्तावसायिन्शब्दः ।

* श्वानं पचतीति श्वपचः, लिहादित्वादच् ।

**श्वभ्र**-न.-१३६४-છિદ્ર, બિલ, બાકોરૂં.

द्र० अगाधशब्दः ।

* श्वयतीति श्वभ्रं "खुरक्षुर"-(उणा-३९६) इति रे निपात्यते, श्वभिर्भ्रान्तमिति वा ।

**'श्वभ्र'**-न.-१३६४-બાકોરૂં.

द्र० अगाधशब्दः ।

**श्वयथु**-पुं-४६८-સોજો.

☐ शोथ, शोफ ।

* श्वयति अनेनेति श्वयथुः, पुंलिङ्गः, ट्वित्वादथुः ।

**श्वशुर**-पुं-५५९-પત્ની કે પતિના પિતા, સસરો.

* सुशोभनमश्नुते, अश्नाति वा श्वशुरः, "श्वशुरकुकुन्दर"-(उणा-४२६) इत्युरे निपात्यते ।

**श्वशुर**-पुं-५६०-સાસુ સસરો બંને.

☐ श्वश्रूश्वशुर ।

* श्वशुरश्च श्वश्रूश्च द्वौ "श्वशुरः श्वश्र्वा वा" ॥३।१।१२३॥ इत्येकशेषः ।

**श्वश्रू**-स्त्री-५५९-પતિ કે પત્ની ની માતા, સાસુ.

*श्वशुरस्य भार्या श्वश्रूः, "नारीसखी"-॥२।४।७६॥ इत्यूङि निपात्यते ।

**श्वश्रूश्वशुर**-पुं-५६०-સાસુ સસરો બંને.

☐ श्वशुर ।

**श्वस्**-अ.-१५४१-આવતો દિવસ, આવતી કાલ.

* श्वसितीति श्वः, अनन्तरागामिदिनम्, यथा

"अद्य श्वो वा भविष्यति।"

श्वस्-अ.-१५४२-(शे.२०२)-આવતી કાલે, પરમ દિવસે.

☐ [परश्वस् शे.२०२]।

**श्वसन**-पुं-११०६-વાયુ.

द्र० अनिलशब्दः।

* श्वसन्त्यनेनेति श्वसनः।

**श्वसित**-न.-१३६८-શ્વાસ, શ્વાસલેવાની ક્રિયા.

☐ श्वास।

* श्वसनं "क्लीवे" ॥५।३।१२३॥ इति भावे क्ते श्वसितम्।

**श्वान**-पुं-१२७९-કૂતરો.

द्र० अस्थिभुज्शब्दः।

* शोभन आनः प्राणोऽस्या श्वानस्तालव्यादिः।

**श्वापद**-पुं-१२१६-હિંસક પશુ.

☐ व्याल।

* शुनः पदमिवपदमस्येति श्वापदः "शुनः" ॥३।२।९०॥ इति दीर्घत्वम्।

**श्वविध्**-स्त्री-१२९६-શાહુડી.

☐ शल्य, शलल, शल्यक।

* श्वानं विध्यतीति श्वावित् "धञ्युपसर्गस्य-" ॥३।२।८६॥ इति दीर्घः।

**श्वास**-पुं-५७-કમળ જેવો સુગંધી શ્વાસ હોયતે. તીર્થંકરનો ३४ પૈકી બીજો અતિશય.

* श्वास उच्छ्वासनिश्वासम्।

**श्वास**-पुं-१३६८-શ્વાસ.

☐ श्वसित।

* श्वसनं श्वासः।

**श्वासप्रश्वासरोधन**-न.-८३-પ્રાણાયામ, પ્રાણોને રોકવાની ક્રિયા, ८ પૈકી યોગનું ४ थुं અંગ.

☐ प्राणायाम, प्राणयम।

* सत्यासने बाह्यस्य वायोराचमनमिति श्वासः, कोष्ठ्यस्य वायोर्निःश्वसनं प्रश्वासः, तयो रोधनं गतिच्छेदः।

**श्वासहेति**-स्त्री-३१३-નિદ્રા, ઉંઘ.

द्र० तन्द्राशब्दः।

* श्वासा हेतयोऽस्यामिति श्वासहेतिः, अयं सुप्तवाचकः इत्यन्ये।

**श्वित्र**-न.-४६६-ધોળો કોઢ રોગ.

☐ पाण्डुर, (श्वेत), कुष्ट।

* श्वेतते इति श्वित्रं "ऋज्यजि-" (उणा-३८८) इति किद् रः।

**श्वेत**-न.-४०९-સરખા ભાગના પાણી વાળું દહીં.

☐ (श्वेतरस)।

* श्वेतते इति श्वेतम्, श्वेतरसमित्यपि।

**श्वेत**-न.-१०४३-રૂપું.

द्र० कलधौतशब्दः।

* श्वेतते इति श्वेतम्, सितात्र्यपि।

**श्वेत**-पुं-१३९२-સફેદ.

द्र० अर्जुनशब्दः।

* श्वेतते इति श्वेतः।

**श्वेत**-पुं-१२०६-(शे.१७४)-કોડી.

द्र० कपर्दशब्दः।

(**श्वेत**)-न.-४६६-ધોળોકોઢ રોગ.

☐ श्वित्र, पाण्डुर, कुष्ट।

**श्वेतकोलक**-पुं-१३४६-સફરી, સફેદ માછલું.

☐ प्रोष्ठिन्, शफर।

* श्वेतः कोल उत्सङ्गोऽस्येति श्वेतकोलकः।

**श्वेतगज**-पुं-१७७-ઇન્દ્રનો ઐરાવણ હાથી.

द्र० अभ्रमातङ्गशब्दः।

* श्वेतश्चासौ गजश्च श्वेतगजः।

'**श्वेतगरुत्**'-पुं-१३२५-હંસ.

* द्र० चक्राङ्गशब्दः।

**श्वेतद्युति**-पुं-१०५-ચન્દ્રમા.

द्र० अत्रिदृग्जशब्दः।

* श्वेताः द्युतयो यस्य स श्वेतद्युतिः यौगिकत्वात् सितांशुः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(श्वेतपत्ररथ)-पुं-२१२-બ્રહ્મા.

द्र० अजशब्दः ।

श्वेतपिङ्ग-पुं-१२८५-સિંહ.

द्र० इभारिशब्दः ।

* श्वेतश्चासौ पिङ्गश्च श्वेतपिङ्गः ।

श्वेतमरिच-पुं-११३४-સફેદ સરગવો.

* श्वेतानि मरिचतुल्यानि फलान्यस्येति श्वेतमरिचः ।

श्वेतरक्त-पुं-१३९५-ગુલાબી રંગ.

☐ पाटल ।

* श्वेतश्चासौ रक्तश्च श्वेतरक्तः ।

(श्वेतरस) न.-४०९-સરખા ભાગના પાણી-વાળું દહી.

☐ श्वेत ।

श्वेतरूप्य-न.-१०४२-(शे. १६१)-કલઈ, સીસું.

द्र० आलीनशब्दः ।

श्वेतवाजिन-पुं-१०४-ચન્દ્રમા.

द्र० अत्रिदृग्जशब्दः ।

* श्वेतवाजी सिताश्वः ।

श्वेतवाहन-पुं-१०५-(शे.११)-ચન્દ્રમા.

द्र० अत्रिदृग्जशब्दः ।

श्वेतसर्षप-पुं-११८०-ધોળો સરસવ.

☐ सिद्धार्थ ।

श्वेतहय-पुं-७०९-અર્જુન.

द्र० अर्जुनशब्दः ।

(श्वेताश्व)-पुं-१०४-ચન્દ્રમા.

द्र० अत्रिदृग्जशब्दः ।

श्वोवसीयस-न.-८६-કલ્યાણ, શુભ, ભાવી કાળે થનાર મંગલ.

द्र० कल्याणशब्दः ।

* वसुमच्छब्दादीयसौ मतोर्लुक्यस्वरादेश्च लोपे वसीयः, शोभनं वसीयः, श्वोवसीयसं, श्व आगामि वसीयो वा "श्वसो वसीयसः" ॥७।३।१२१॥ इत्यत्समासान्तः ।

## 'ष'

षट्कर्मन्-पुं-८१२-યજન-યાજન, અધ્યયન-અધ્યાપન, દાન અને પ્રતિગ્રહ એ છ કર્મમાં આસક્ત રહેનાર બ્રાહ્મણ.

द्र० अग्रजशब्दः ।

* षड्-अध्ययनम्, अध्यापनम्, यजनम्, याजनम्, दानम्, प्रतिग्रहश्चेति कर्माण्यस्येति षट्कर्मा ।

(षट्चरण)-पुं-१२१२-ભમરો.

द्र० अलिशब्दः ।

षट्पदी-स्त्री-१२०८-જૂ.

☐ यूका ।

* षट्पादा अस्याः षट्पदी "सुसङ्ख्यात्" ॥७।३।१५०॥ इति पाद्भावे "वा पादः" ॥२।४।६॥ ङीः ।

(षडंह्रि)-पुं-१२१२-ભમરો.

द्र० अलिशब्दः ।

षडङ्गक-न.-५६४-(शे.११८)-શરીર.

द्र० अङ्गशब्दः ।

षडङ्गजित्-पुं-२१९-(शे.६६)-વિષ્ણુ, નારાયણ.

द्र० अच्युतशब्दः ।

षडङ्गी-स्त्री-२५३-વેદના ૬ અંગો.

षडभिज्ञ-पुं-२३३-બુદ્ધ, સુગત.

द्र० अद्वयशब्दः ।

* दिव्यं चक्षुः, दिव्यंश्रोत्रं, पूर्वनिवासानुस्मृतिः, परचित्तज्ञानं, आश्रवक्षयः, ऋद्धिश्चेति षड् अभिज्ञा अस्येति षडभिज्ञः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**षड्गव**-न.-१४२४-પશુઓનું ષટ્ક બનાવવા માટે પશુવાચક શબ્દથી લગાડાતો શબ્દ જેમકે હસ્તિષડ્ગવમ્.

* पशुनामभ्यः परं षट्त्वे वाच्ये षड्गवमिति प्रयुज्यते, **यथा**-हस्तिनां षट्त्वम् हस्तिषड्गवम्, "षट्त्वे षड्गवः" ॥७।१।१३५। इति षड्गवप्रत्ययः ।

**षड्ज**-पुं-१४०१-સાતમો સ્વર.

* षड्भ्यो जायते इति षड्जः, यद् **व्याडिः**
"कण्ठादुत्तिष्ठते व्यक्तं षड्जःषड्भ्यस्तु जायते ।
कण्ठोरस्तालुनासाभ्यो, जिह्वाया दशनादपि ॥"

**षड्बिन्दु**-पुं-२१५-વિષ્ણુ, નારાયણ.

द्र० अच्युतशब्दः ।

* षड् बिन्दवो लाञ्छनभूता अस्येति षड्बिन्दुः ।

**षड्रस**-न.-१०७०-(शे १६५)-પાણી.

द्र० अपशब्दः ।

**षड्रसासव**-पुं-६२० રસધાતુ

द्र० असिसंभवशब्दः ।

* षण्णां मधुरादीनां रसानामासवः इति षड्रसासवः ।

**षण्ड**-पुं-न.-१११०-વન, જંગલ.

द्र० अटवीशब्दः ।

* सन्यते सेव्यते इति षण्डं पुंक्लीबलिङ्गः, बाहुलकात् सत्वाभावे "पञ्चमाड्डः"-(उणा-१६८) इति डः ।

**षण्ड**-पुं-१२५९-સાંઢ, આખલો.

द्र० इट्चरशब्दः ।

* सनोति सनति वा षण्डः, "पञ्चमाड्डः"-(उणा-१६८) इति डः, बाहुलकात् सत्वाभावः, शाण्डोऽपि ।

**षण्ढ**-पुं-१९६-શંકર.

द्र० अट्टहासिन्शब्दः ।

* ऋषिभिः शापेन पातितलिङ्गत्वात् षण्ढः, यद् **वामनपुराणे**-
"ततस्तमृषयो दृष्ट्वा, भार्गवाङ्गिरसो मुने !
क्रोधभाजोऽब्रुवन् सर्वे, लिङ्गोऽस्य पततां भुवि ॥"

**षण्ढ**-पुं-५६२-નપુંસક.

द्र० क्लीबशब्दः ।

* सनतीति षण्ढः, "शमिषणिभ्यां-" (उणा-१७९) इति ढे बाहुलकात् सत्वाभावः "शण्ढः" **इत्यमरः**, "शाण्ढः" **इत्यन्ये** ।

**षण्ढ**-पुं-७२८-અંતઃપુરનો રક્ષક, નપુંસક.

☐ वर्षवर ।

* षण्ढो नपुंसकोऽत एवान्तःपुरपालकः ।

**षण्ढतिल**-पुं-११८०-ઉગી ન શકે તેવા તલ.

☐ तिलपिञ्ज, तिलपेज ।

* षण्ढो निष्फलस्तिलः षण्ढतिलः ।

**षण्मुख**-पुं-४२-શ્રી વિમલનાથ ભગવાન ના શાસન દેવ.

* षण्मुखान्यस्येति षण्मुखः ।

**षण्मुख**-पुं-२०९-કાર્તિકેય, શંકરનો પુત્ર.

द्र० अग्निभूशब्दः ।

* षड् मुखान्यस्येति षण्मुखः, अग्निपत्नीनां षण्णां स्तनपानत्वात् ।

**षष्टिक**-पुं-११६८-સાઠી ચોખા, પોતાની મેળે પાકે તેવા ચોખા.

☐ गर्भपाकिन् ।

* षष्टिरात्रेण पच्यते इति षष्टिकः, "यवयवक-षष्टिकाद्यः" ॥७।१।८१॥ इत्यत्र षष्टिकेति निर्देशात् साधुः ।

**(षष्टिक)**-पुं-१२०१-બીજમાંથી ઉત્પન્ન.

**षष्टिक्य**-न.-९६६-સાઠી ચોખા થઈ શકે તેવું ખેતર.

* षष्टिका षष्टिरात्रेण पच्यमाना व्रीहयस्तेषां क्षेत्रं षाष्टिक्यं, "यवयवकषष्टिका-" ॥७।१।८१॥ इति यः ।

**षष्टिहायन**-पुं-१२१८-(शे-१७६)-હાથી.

द्र० अनेकपशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पष्ठवाह्**–पुं-१२६०-७ वर्षनी उंमरनो हळ वही शके तेवो બળદ.

☐ युगपार्श्वग ।

* पञ्चमं षष्ठं वा वर्षं वहतीति पष्ठवाट्, पृषोदरादित्वात् ।

**पष्ठी**–स्त्री-२०५-(शे.५०)-પાર્વતી

द्र० अद्रिजाशब्दः ।

**षाण्मातुर**–पुं-२०८-કાર્તિકેય.

द्र० अग्निभूशब्दः ।

* षण्णां मातृणामपत्यमिति षाण्मातुरः ।

**षिङ्ग**–पुं-३३१-વિટ, વ્યભિચારી.

☐ पल्लवक, विट ।

* सेटनं सिट् अनादरः, सिटा गायति गच्छतीति वा षिङ्गः, पृषोदरादित्वात् षत्वम् ।

**षोडत्**–पुं-१२६३-૭ દાંત વાળો બળદ.

* षड् दन्ता अस्येति षोडन्, "एकादशषोडश"– ॥३।२।९१॥ इति साधुः ।

**षोडशार्चिस्**–पुं-१२०-શુક્ર.

द्र० उशनसशब्दः ।

* षोडशार्चिषोऽस्येति षोडशार्चिः ।

**षोडशावर्त**–पुं-१२०५-શંખ.

द्र० कम्बुशब्दः ।

* षोडश आवर्ता अस्येति षोडशावर्तः ।

**षोडशांह्रि**–पुं-१३५२-કરચલો.

द्र० कर्कटशब्दः ।

* षोडश अंह्रयोऽस्येति षोडशांह्रिः ।

**ष्ठीवन**–न.-१५२१-થૂંકવું.

द्र० थूत्कृतशब्दः ।

* ष्ठीव्यते इति ष्ठीवनम्, "ष्ठिवसिवोऽनटि वा" ॥४।२।१२२॥ इति दीर्घत्वम् ।

**ष्ठेवन**–न.-१५२१-થૂંકવું.

द्र० थूत्कृतशब्दः ।

* ष्ठीव्यते इति ष्ठेवनम्, "लघोरुपान्त्यस्य" ॥४।३।४॥ इति गुणः ।

**ष्ठ्यूत**–न.-१५२१-થૂંકવું.

द्र० थूत्कृतशब्दः ।

* ष्ठीव्यते इति ष्ठ्यूतम्, भावे क्तः ।

## 'स'

**संयत्**–न.-स्त्री-७९६-યુદ્ધ, લડાઈ.

द्र० अनीकशब्दः ।

* संयतन्ते संयच्छन्ति वाऽत्रेति संयत् क्लीबलिङ्गः, अमरस्तु–"स्त्रियां संयत्" इत्याह ।

**संयत**–पुं-४३९-બંધાયેલો કેદી.

द्र० कीलितशब्दः ।

* संयम्यते स्मेति संयतः ।

**संयमनी**–स्त्री-१८६-યમનગરી.

* संयम्यते प्राणिनोऽस्यामिति संयमनी ।

**संयुग**–न.-पुं-७९९-યુદ્ધ.

द्र० अनीकशब्दः ।

* संयुज्यन्तेऽत्रेति संयुगं पुंक्लीबलिङ्गः, रथादित्वात् के न्यङ्क्वादित्वात् गत्वं, सङ्गता रथयुगा अत्रेति वा ।

**'संयोगित'**–पुं-१४८५-જોડાયેલું.

☐ संयोजित, उपाहित ।

**संयोजित**–पुं-१४८५-જોડાયેલું.

☐ उपाहित, संयोगित ।

* संयोज्यते स्मेति संयोजितः ।

**संरम्भ**–पुं-१४९९-અહંકાર, આડંબર, ભૂત નો આવેશ.

☐ आवेश, आटोप ।

* संरम्भणं संरम्भः ।

**संराव**–पुं-१४००-શબ્દ, ધ્વનિ.

द्र० आरवशब्दः ।

* संरवणं संरवः ।

**संलय**–पुं-३१३-નિદ્રા, ઊંઘ, તન્દ્રા.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० तन्द्राशब्दः ।

* संलीयन्ते इन्द्रियाण्यत्रेति संलयः ।

**संलाप**-पुं-२७५-પરસ્પર ન્યાયપૂર્વક વાત કરવી તે.

☐ संकथा, अन्योक्ति ।

* संमुखं लपनं संलापः ।

**संवत्**-अ.-१५३५-વરસ.

* संवदन्तीति संवत् "सं श्रद्"-(उणा-८८२) इति निपात्यते, यथा विक्रमसंवत्, **सिद्धहेमकुमार**-संवदिति ।

**संवत्**-स्त्री-१५०-(शे.२१)-વરસ.

द्र० अनुवत्सरशब्दः ।

**संवत्सर**-पुं-१५९-વરસ.

द्र० अनुवत्सरशब्दः ।

**संवनन**-न.-१४९८-વશીકરણ.

☐ वशक्रिया, (वशीकरण) ।

* समन्तात् वन्यते सेव्यते वाऽनेनेति संवननम् ।

**संवर**-पुं-३६-શ્રી અભિનન્દન સ્વામીના પિતા.

* संवृणोतीन्द्रियाणि इति संवरः ।

**संवर**-पुं-५५-આવતી ચોવીશી ના અઢાર માં તીર્થંકર.

* संवर आश्रवनिरोधोऽस्त्यस्येति संवरः ।

**संवर**-पुं-९६५-સેતુ, પુલ, બંધ, પાળ.

द्र० आलिशब्दः ।

* संवृणोति जलमिति संवरः ।

**संवर**-न-१०६०-પાણી.

द्र० अप्शब्दः ।

* संवृणोतीति संवरम् ।

**संवर्त**-पुं-१६१-પ્રલયકાળ, ક્ષય.

द्र० कल्पशब्दः ।

* संवर्तन्ते जगदत्रेति संवर्तः ।

**संवर्तक**-न.-२२५-બળદેવ નું હળ.

* संवर्तयति संहरति शत्रूनिति संवर्तकम् ।

**संवर्तक**-पुं-११०८-વડવાનલ, સમુદ્રમાં થતો અગ્નિ.

द्र० अब्धग्निशब्दः ।

* संवर्तयतीति संवर्तकः ।

**संवर्तिका**-स्त्री-११६६-કમલ વગેરે નું નવું પાંદડું.

☐ (नवदल, दारयन्त्रिक) ।

* संवर्तयति वेष्टयतीति संवर्तिका ।

**संवसथ**-पुं-९६१-ગામ.

द्र० उपसथशब्दः ।

* संवसतीति संवसथः ।

**संवाहक**-पुं-४०२-અંગમર્દન કરનાર.

☐ अङ्गमर्द ।

* संवाहयत्यङ्गानीति संवाहकः ।

**संविद्**-स्त्री-२७८-અંગીકાર, સ્વીકાર.

द्र० अङ्गीकारशब्दः ।

* संवेदनं संवित् ।

**संवित्ति**-स्त्री-३००-ઢંકાયેલું, આચ્છાદિત થયેલ.

द्र० उपलब्धिशब्दः ।

* संवेदनं संवित्तिः ।

**संवीत**-न-१४७६-ઢંકાયેલું, આચ્છાદિત.

द्र० अन्तर्हितशब्दः ।

* 'व्येग् संवरणे'-संवीयते इति संवीतम्, "यजादिवचेः किति" ।।५।१।७९।। इति वृत् "दीर्घमवोऽन्त्यम्" ।।४।१।१०३।। इति दीर्घः ।

**संवृत**-न-१४७६-ઢંકાયેલું, આચ્છાદિત થયેલ.

द्र० अन्तर्हितशब्दः ।

* संव्रियते इति संवृतम् ।

**संवृत**-पुं-१८८-(शे.३९)-વરુણદેવતા, જલદેવતા.

द्र० अर्णवमन्दिरशब्दः ।

**संवेग**-पुं-३२२-શીઘ્રતા, ઉતાવળ.

द्र० आवेगशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* संवेजनं संवेगः ।

**संवेश**-पुं-३१३-निद्रा,तंद्रा, ऊंघ.

द्र० तन्द्राशब्दः ।

* संविशतीन्द्रियाण्यत्रेति संवेशः ।

**संवेशन**-न.-५३७-मैथुन, कामक्रीडा.

द्र० कामकेलिशब्दः ।

* संविशन्त्यङ्गान्यत्रेति संवेशनम् ।

**संव्यान**-न.-६७१-ओढवानुं वस्त्र, उत्तरीय वस्त्र.

☐ प्रच्छादन, प्रावरण, उत्तरीयक ।

* संवीयतेऽनेनेति संव्यानम् ।

**संशप्तक**-७९५-युद्ध थी पाछो नहि फरनार.

☐ युद्धाऽनिवर्तिन् ।

* संशपन्ति, पलायमानान् सशपथं युद्ध्यन्ते वा संशप्ताः, के संशप्तकाः ।

**संशय**-पुं-१३७५-संदेह, संशय.

☐ संदेह, द्वापर, आशंका, विचिकित्सा ।

* संशयनं संशयः, समन्ततः शेते आत्माऽस्मिन्निति वा ।

**संशयानामसम्भव**-पुं-६६-संदेह विनानीप्रभुनी वाणीनो १५ मो गुण.

* संशयानामसम्भवोऽसन्दिग्धत्वम् ।

**संशयालु**-पुं-४४५-संशयवाळो, शंकाशील.

☐ संशयितृ, [सांशयिक शि.३१] ।

* संशयशीलः संशयालुः, "शीङ"-।५।२।३७।। इत्यालुः, सांशयिकोऽपि ।

**संशयितृ**-पुं-४४५-संशयवाळो, शंकाशील.

☐ संशयालु, [सांशयिक शि ३१] ।

**संशित**-न.-१४९१-सारी रीते निश्चित करायेलुं.

☐ सुनिश्चित ।

* संश्यति स्मेति संशितम् ।

**संश्रव**-पुं-२७८-स्वीकार, अंगीकार.

द्र० अङ्गीकारशब्दः ।

**संश्रुत**-न.-१४८९-स्वीकारेलुं.

द्र० अङ्गीकृतशब्दः ।

* संश्रूयते स्मेति संश्रुतम् ।

**संश्लेष**-पुं-१५०७-आलिंगन करवुं ते.

द्र० अङ्कपालीशब्दः ।

* संश्लेषणं संश्लेषः ।

**संसक्त**-न.-१४५१-साथे लागेलुं, आंतरा रहित.

द्र० अनन्तरशब्दः ।

* संसजति स्मेति संसक्तम् ।

**संसक्त**-न.-१४७१-निरंतर, नित्य, कायम.

द्र० अजस्रशब्दः ।

* संसजति स्मेति संसक्तम् ।

**संसद्**-स्त्री-४८१-सभा.

द्र० आस्थाशब्दः ।

* संभूय सीदन्त्यस्यां इति संसत्, संपदादित्वात् क्विप् ।

**संसरण**-न.-९८७-राजमार्ग.

द्र० असङ्कुलशब्दः ।

* सम्यक् सरन्त्यत्रेति संसरणम् ।

**(संसारिन्)**-पुं-१३६६-संसारी जीव.

द्र० असुमत्शब्दः ।

**संसिद्धि**-स्त्री-१३७७-२४३५, स्वभाव.

द्र० आत्मन्शब्दः ।

* संसिद्ध्यत्यनया इति संसिद्धिः ।

**संस्कार**-पुं-१३७३-पूर्वना संस्कार, वासना.

☐ वासना, भावना ।

* संस्क्रियतेऽनेनेति संस्कारः ।

**संस्कारवर्जित**-पुं-८५४-संस्काररहीत ब्राह्मण.

☐ व्रात्य ।

* संस्कारोऽत्रोपनयनं तेन वर्जितः ।

**संस्कारवत्त्व**-न.-६५-संस्कृतादि लक्षणु वाळी, प्रभुनी वाणीनो ३५ पैकी पहेलो गुण.

* संस्कारवत्त्वं संस्कृतादिलक्षणयुक्तत्वम् ।

**संस्कृत**-पुं-३४५-शास्त्रादि तत्वोनो संस्कारी.

☐ व्युत्पन्न, प्रहत, क्षुण्ण ।

* शास्त्रादिना संस्क्रियते स्मेति संस्कृतः ।

**(संस्कृत)**-न.-२८५-संस्कृत भाषा.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**संस्तर**-पुं-६८२-पांदडा वगेरेनी शय्या.

☐ स्रस्तर, [प्रस्तर-शि.५४] ।

* समन्तात्स्तीर्यते इति संस्तरः, पल्लवादिरचिता शय्या, प्रस्तरोऽपि ।

**संस्तर**-पुं-८२०-यज्ञ.

द्र० अध्वरशब्दः ।

* संस्तीर्यन्ते दर्भा अत्रेति संस्तरः, "पुंनाम्नि-" ॥५।३।१३०॥ इति घः ।

**संस्तव**-पुं-१५१३-परिचय, ओळखाण.

☐ परिचय ।

* संगतं स्तवनमिति संस्तवः ।

**संस्त्याय**-पुं-९९१-घर.

द्र० अगारशब्दः ।

* संस्त्यायन्त्यत्रेति संस्त्यायः ।

**संस्था**-स्त्री-३२३-मृत्यु.

द्र० अत्ययशब्दः ।

* संस्थानं संस्था ।

**संस्था**-स्त्री-७४४-मर्यादा, न्यायमार्गमां रहेवुं ते.

☐ मर्यादा, धारणा, स्थिति ।

* संतिष्ठतेऽनया इति संस्था ।

**संस्थान**-न.-९८६-चोक, चाररस्ता एकठा थाय तेवुं स्थान.

☐ चतुष्पथ, चतुष्क ।

* संतिष्ठन्तेऽत्रेति संस्थानम् ।

**संस्थान**-न.-१५१६-आकार, अवयवोनी रचना.

☐ संनिवेश ।

* संस्थितिः संस्थानम् ।

**संस्थित**-पुं-३७३-मरेलो, मृत्यु थयेल.

द्र० उपगतशब्दः ।

* संतिष्ठते स्मेति संस्थितः ।

**संस्फेट**-पुं-७९९-(शि. ७०)-युद्ध, लडाई.

द्र० अनीकशब्दः ।

**संस्फोट**-पुं-७९६-युद्ध, लडाई.

द्र० अनीकशब्दः ।

* संस्फुटन्त्यत्र कातरहृदयानि इति संस्फोटः, संस्फेट इत्यन्ये, संफेट इति भरतः ।

**संहत**-न. १४७२-मजबूत बांधो, दृढ संघयण.

☐ दृढसन्धि ।

* संहन्यते इति संहतम् ।

**संहतल**-पुं-५९६-(शि.४७)-डाबा अने जमणा बंने हाथनी हथेळी भेगी करवी ते.

☐ सिंहतल ।

**संहति**-स्त्री-१४११-समूह, समुदाय.

द्र० उत्करशब्दः ।

* संहननं संहतिः ।

**संहनन**-न.-५६३-शरीर.

द्र० अङ्गशब्दः ।

* संहन्यतेऽङ्गान्यत्रेति संहननम् ।

**संहर्ष**-पुं-१५१५-हरिफाई, स्पर्धा.

☐ स्पर्द्धा, [सङ्घर्ष शि. १३६] ।

* संहर्षणं संहर्षः, संघर्षोऽपि ।

**संहार**-पुं-१६१-प्रलयकाळ, क्षय.

द्र० कल्पशब्दः ।

* संह्रियते प्रलीयते क्षीयते जगदत्रेति संहारः ।

**संहूति**-स्त्री-२६१-घणाए करेलो पोकार.

☐ (सदृशाह्वया) ।

* संभूय ह्वानं संहूतिः, सदृशाह्वया इति भागुरिः ।

**सकल**-न.-१४३३-समस्त, बधुं.

द्र० अखण्डशब्दः ।

* सह कलाभिर्भागैर्वर्तते इति सकलम् ।

**सकृत्प्रज**-पुं-१३२१-कागडो.

द्र० अन्यभृत्शब्दः ।

* सकृदेकवारं प्रजायते इति सकृत्प्रजः, सकृत् प्रजाऽपत्यमस्य वा ।

**सक्तु**-पुं-न.-४०१-धाणीनुं चूर्ण, साथवो.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐ धानाचूर्ण ।

* षचिसेचने, सच्यन्त इति सक्तवः, पुंक्लीबलिङ्गः, एकवचनान्तोऽप्ययम्, "कृसिकम्यमि–" (उणा-७७३) इति तुन् ।

**सक्तुक**-पुं-११९८-વનસ્પતિજન્ય સ્થાવર વિષ.

द्र० अङ्कोल्लसारशब्दः ।

* सक्तुप्रतिकृतिः सक्तुकः, सक्तुवच्चूर्णीभवनत्वात् ।

**सक्थि**-न.-६१३-સાથળ.

☐ उरु ।

* सजति मांसेन इति सक्थि क्लीबलिङ्गः, "वीसञ्ज्य–" (उणा-६६९) इति कित् थिः ।

**सखि**-पुं-९ (प.)-મિત્રવાચક શબ્દ બનાવનાર શબ્દ દા. ત. વાયુસખ.

**सखि**-पुं-७३०-મિત્ર.

द्र० मित्रशब्दः ।

* सनोति सनति वा सखा "सनेर्डखिः" (उणा-६२५) इति डखिः ।

**सखी**-स्त्री-५२९-સાહેલી, સહચરી.

☐ वयस्या, आलि, सध्रीची ।

* सनुते इति सखी, "सनेर्डखिः"-(उणा-६२५) "नारीसखी–" ॥२।४।७६॥ इति ङीः ।

**सख्य**-न.-७३०-મિત્રાચારી, દોસ્તી.

द्र० अजर्यशब्दः ।

* सख्युर्भावः कर्म वा सख्यं "सखिवणिग्दूतात्–" ॥७।१।६३॥ इति यः ।

**सगर**-न.-६९२-બીજા ચક્રવર્તી.

☐ सुमित्रभू ।

* सहते सर्वमिति सगरः, "जठर–" (उणा-४०३) इत्यरे निपात्यते ।

**सगर्भ**-पुं-५५१-સગોભાઈ.

द्र० भ्रातृशब्दः ।

* समानो गर्भोऽस्येति सगर्भः "समानस्य"– ॥३।२।१४९॥ इति सभावः "सगर्भ्यः" इत्यमरः ।

**सगर्भ्य**-पुं-५५१-(शि. ४४)-સગોભાઈ.

द्र० भ्रातृशब्दः ।

**सगोत्र**-पुं-५६१-સ્વજન, એક ગોત્રનો કુટુંબી.

द्र० ज्ञातिशब्दः ।

* समानं गोत्रमस्येति सगोत्रः "समानस्य धर्मादिपु" ॥३।२।१४९॥ इति सभावः ।

**सग्धि**-स्त्री-४२५-સાથે જમવું તે.

☐ सहभोजन ।

* सह जग्धिर्भोजनं सग्धिः, स्त्रीलिङ्गः, पृषोदरादित्वात् ।

**सङ्कट**-पुं-१५०४-ગીરદી, સાંકડું.

☐ सम्बाध ।

* संकीर्णःसंकटः, "संप्रोन्नेः–"७।१।१२५॥ इति कटः ।

**सङ्कथा**-स्त्री-२७५-પરસ્પર ન્યાયપૂર્વક વાત કરવી તે.

☐ संलाप ।

* संमुखं कथनं संकथा "भीषिभूषि–" ॥५।३।१०९॥ इत्यङ् ।

**सङ्कर**-पुं-१०२६-કચરો, પૂંજો.

☐ अवकर ।

* समुह्य कीर्यतेऽसौ इति सङ्करः ।

**सङ्कर्षण**-पुं-२२४-બળદેવ.

द्र० अच्युताग्रजशब्दः ।

* संकर्षति यमुनामिति संकर्षणः ।

**सङ्कलित**-पुं-१४८५-સરવાળો, સંગ્રહ કરેલ.

☐ संगुड ।

* संकल्यते स्मेति संकलितः ।

**सङ्कल्प**-पुं-२२९-કામની યોનિ, ઉત્પત્તિ.

**सङ्कल्प**-पुं-१३७०-મનનો વ્યાપાર, નિશ્ચય, પ્રતિજ્ઞા.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐ [विकल्प-शि. १२४] ।

* संकल्पनं संकल्पः मनसो व्यापारः, विकल्पोऽपि ।

**(सङ्कल्पयोनि)**-पुं-२२९-कामदेव.

द्र० अङ्गजशब्दः ।

**सङ्कसुक**-पुं-४३७-अस्थिर, चपळ, अनित्य.

☐ अस्थिर ।

* संकसतीति संकसुकः, "सांविभ्यां कसेः"-(उणा-५२) इत्युकः ।

**सङ्काश**-पुं-१४६२-समान, तुल्य.

द्र० उपमाशब्दः ।

* संकाशते इति संकाशः **यथा**-काशसंकाशाः केशाः ।

**सङ्कीर्ण**-न.-१४७२-भीचोभीच, सांकडुं.

☐ सङ्कुल, आकुल, कीर्ण, आकीर्ण ।

* संकीर्यते इति सङ्कीर्णम् ।

**सङ्कुचित**-न.-११२९-बिडायेलुं पुष्प.

☐ निद्राण, मीलित, मुद्रित ।

* संकोचति स्मेति संकुचितम् ।

**सङ्कुल**-न.-२६५-पूर्वापर विरुद्ध वचन.

☐ क्लिष्ट ।

* संकुलं अन्योऽन्यविरुद्धम् । यथा—

"अन्धो मणिमुपाविध्यद्, तमनङ्गुलिरासदत् ।

तमग्रीवः प्रत्यमुञ्चत्, तमजिह्वोऽभ्यपूजयत् ॥"

**सङ्कुल**-न.-१४७२-भीचोभीच, सांकडुं, व्याप्त.

☐ सङ्कीर्ण, आकुल, कीर्ण, आकीर्ण ।

* संकोलति निरन्तरीभवतीति सङ्कुलम् ।

**सङ्कोच**-न.-६४५-(शि. ५१)-केशर.

द्र० कश्मीरजन्मन्शब्दः ।

**सङ्कोचपिशुन**-न.६४५-केशर.

द्र० कश्मीरजन्मन्शब्दः ।

* संकोचस्य पिशुनं सूचकं संकोचपिशुनं, संकोचं पिशुनं चेति द्वयमपि ।

**संक्रन्दन**-पुं-१७१-इन्द्र.

द्र० अच्युताग्रजशब्दः ।

* संक्रन्दयत्यरिस्त्रीः इति संक्रन्दनः ।

**संक्रम**-पुं-न.-१५१७-विकटमार्ग.

☐ संक्राम, दुर्गसंचर ।

* संक्रामन्त्यनेनेति संक्रमः "मोऽकमि-" ।४।३।५५। इति वृद्धिनिषेधः पुंक्लीबलिङ्गोऽयम् ।

**संक्राम**-पुं-न.-१५१७-विकट मार्ग.

☐ संक्रम, दुर्गसंचर ।

* संक्रामन्त्यनेनेति संक्रामः, घञि बाहुल्काद् वृद्धिः ।

**संक्षेप**-पुं-१४३२-टुंकाववुं, टुंकाणु.

☐ समास, समाहार, संग्रह ।

* संक्षेपणमिति संक्षेपः ।

**सङ्ख्य**-न.-पुं-७९६-युद्ध.

द्र० अनीकशब्दः ।

* संचक्षतेऽत्र सङ्ख्यं पुंक्लीबलिङ्गः, "चक्षो वाचि" ॥४।४।४॥ इति ख्यादेशः ।

**सङ्ख्या**-स्त्री-८७२-एक, बे, त्रण आदि संख्या.

**सङ्ख्या**-स्त्री-१३७३-चर्चा, विचारणा.

☐ चर्चा, विचारणा ।

* सङ्ख्यानं सङ्ख्या "उपसर्गादातः" ॥५।३।११०॥ इत्यङ् ।

**सङ्ख्यावत्**-पुं-३४२-विद्वान, पंडित.

द्र० अभिरूपशब्दः ।

* सम्यक् ख्यानं ज्ञानं अस्त्यस्येति संख्यावान्, यद्वा संख्या विचारणा गणना वा ।

**सङ्ख्येय**-न.-८७२-गणी शकाय तेवुं.

☐ गण्य, गणेय, (गणनीय) ।

* संङ्ख्यायते इति संङ्ख्येयम् ।

**सङ्ग**-पुं-१५०८-संयोग, मळवुं.

☐ मेलक, सङ्गम ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* सञ्जनं सङ्गः ।

**सङ्गत**–न.–२६८–युक्तिवाळुं वचन.

☐ हृदयङ्गम ।

* संगच्छते स्मेति सङ्गतम् ।

**सङ्गत**–न.–७३१–मित्रता, दोस्ती.

द्र० अजर्यशब्दः ।

* संगमनं संगतम् ।

**सङ्गम**–पुं–न.–१५०८–संयोग, मळवुं.

☐ मेलक, सङ्ग ।

* संगमनं संगमः पुंक्लीबलिङ्गः ।

**सङ्गर**–पुं–२७८–स्वीकार, प्रतिज्ञा.

द्र० अङ्गीकारशब्दः ।

* संगरणं संगरः ।

**सङ्गर**–पुं–७९८–युद्ध.

द्र० अनीकशब्दः ।

* सङ्गिरन्ते संगृणन्ति वाऽत्रेति सङ्गरः ।

**सङ्गीत**–न.–२७९–गीत, नृत्य.

* संभूय गीयतेऽस्मिन्निति संगीतम् ।

**सङ्गीर्ण**–न.–१४८९–स्वीकारेलुं, प्रतिज्ञा करेल.

द्र० अङ्गीकृतशब्दः ।

* संगीर्यते स्मेति संगीर्णम् ।

**सङ्गुप्त**–पुं–२३४–बुद्ध, सुगत.

द्र० अद्वयशब्दः ।

* सम्यग् गुप्तः सङ्गुप्तः, योगिनामगम्यत्वात् ।

**संगूढ**–पुं–१४८५–सरवाळो करेल.

☐ संकलित ।

* संगुह्यते स्मेति संगूढः ।

**संग्रह**–पुं–२५७–अर्थ विशेषनो संग्रह.

☐ समाहृति ।

* संगृह्यन्ते वाच्यविशेषा अनेनेति संग्रहः ।

**संग्रह**–पुं–१४३२–संक्षेप, टुंकाववुं ते.

☐ समास, समाहार, संक्षेप ।

* संग्रहणं संग्रहः ।

**संग्राम**–पुं–७९६–युद्ध.

द्र० अनीकशब्दः ।

* सङ्ग्रामयन्तेऽत्रेति सङ्ग्रामः ।

**सङ्ग्राह**–पुं–५९७ मूठी.

☐ मुष्टि, मुस्तु, मुचुटी, (मुचुटि) ।

* संगृह्यते इति सङ्ग्राहः, "समो मुष्टौ" ॥५।३।५८॥ इति घञ् ।

**सङ्ग्राह**–पुं–७८४–ढालनी मूठ.

* संगृह्यतेऽनेनेति सङ्ग्राहः, "समो मुष्टौ" ॥५।३।५८॥ इति घञ् ।

**सङ्घ**–पुं–१४१२–समुदाय.

☐ सार्थ ।

* संहन्यते इति सङ्घः, "निघोद्घसङ्घ"–॥५।३।३६॥ इत्यलि साधुः, यथा श्रमणादिश्चतुर्विधः सङ्घः, सेवसङ्घाद्युपचाराद् ।

**सङ्घचारिन्**–पुं–१३४४–मत्स्य, माछलुं.

द्र० अनिमिषशब्दः ।

* संघेन चरतीति सङ्घचारी ।

**सङ्घजीविन्**–पुं–४८०–समुदाय साथे रही आजीविका चलावनार.

☐ ग्रार्तान ।

* सङ्घेन जीवन्तीति सङ्घजीविनः ।

**सङ्घर्ष**–पुं–१५१५ (शि. १३१) हरिफाई, परस्पर घर्षण.

☐ संहर्ष, स्पर्धा ।

**सङ्घात**–पुं–१४११–समूह.

द्र० उत्करशब्दः ।

* संहन्यते इति सङ्घातः ।

**सचिव**–पुं–७१९–अमात्य, मन्त्री.

द्र० अमात्यशब्दः ।

* सचते धिया समवैति सचिवः, "पलिसचेरिवः" (उणा–५२२) इति ।

**सज्ज**–पुं–७६६–बख्तरपहेरेलो, तैयार.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० कङ्कटशब्दः ।

* सज्जते इति सज्जः, सन् जायते वा, "क्वचित्" ॥५।१।१७१॥ इति डः ।

**सज्जन**-पुं-३७९-सारो माणस.

☐ साधु, सभ्य, आर्य ।

* सत् शोभनं जनयतीति सज्जनः, संश्चासौ जनश्चेति वा सज्जनः ।

**सज्जन**-न.-७४९-युद्ध माटे सैन्यनी स्थापना.

☐ उपरक्षण ।

* सत् शोभनं जन्यतेऽनेनेति सज्जनम्, सज्ज्यतेऽनेन वा ।

**सज्जित**-पुं-१२२१-युध्ध माटे तैयार करेलो हाथी.

☐ कल्पित ।

* युद्धाय सज्ज्यते प्रगुणीक्रियते स्मेति सज्जितः ।

**सञ्चय**-पुं-१४१२-समुदाय, ढगलो.

द्र० उत्करशब्दः ।

* संचीयते इति संचयः ।

**सञ्चर**-पुं-५६३-शरीर.

द्र० अङ्गशब्दः ।

* संचरत्यनेनेति संचरः, "गोचरसंचर"-॥५।३।१३१॥ इति घः ।

**सञ्चारिका**-स्त्री-५२१-दूती, कुटणी स्त्री.

☐ दूती ।

* संचारयति संदेशं प्रापयति संचारिका ।

**सञ्चारिन्**-पुं-२९५-शृंगारादि रस ने अनुकूल एक भाव, व्यभिचारी भाव.

☐ (व्यभिचारिन्) ।

* संचरन्ति न सततमवतिष्ठन्त इति संचारिणो व्यभिचारिणः ।

**सञ्जवन**-न.-९९२-चोकवाळु घर.

☐ चतुःशाल ।

* संजवन्तेऽत्रेति सञ्जवनम् ।

**सञ्ज्ञ**-पुं-४५६-जोडायेला ढींचणवाळो.

☐ संज्ञु, युतजानु ।

**सञ्ज्ञप्ति**-स्त्री-३७१-हिंसा.

द्र० अपासनशब्दः ।

* संज्ञपनं संज्ञप्तिः, "सातिहेति"-॥५।३।९४॥ इति क्तिः ।

**सञ्ज्ञा**-स्त्री-२६०-नाम.

द्र० अभिख्याशब्दः ।

* संज्ञायतेऽनया इति सञ्ज्ञा ।

**सञ्ज्ञु**-पुं-४५६-जोडायेला ढींचणवाळो.

☐ संज्ञ, युतजानु ।

* संज्ञते जानुनी अस्येति सञ्ज्ञुः ।

**सञ्ज्वर**-पुं-११०२-अग्नि वडे दाझवा थी थती पीडा.

☐ संताप ।

* संज्वरयतीति सञ्ज्वरः ।

**सटा**-स्त्री-८१६-जटा-(केशनी जटा).

☐ जटा ।

* सन्यते इति सटा, "नमितनि"-(उणा-१३९) इति टो न लुक् च. "जटसङ्घाते" "षट अवयवे" इत्यनयोर्वाऽच् ।

**सण्डीन**-न.-१३१८-ऊडवानी क्रिया, ऊडवुं ते.

☐ प्रडीन, उड्डीन, डयन, नभोगति ।

* सण्डीयते इति सण्डीनम् ।

**सत्**-पुं-३४२-विद्वान पंडित.

द्र० अभिरूपशब्दः ।

* अस्तीति सन् विद्यमान उत्तम इत्यर्थः, अन्ये तालव्यादिमाहुः ।

**सतत**-न.-१४७१-निरंतर, कायम.

द्र० अजस्रशब्दः ।

* संतन्यते इति सततम्, "समस्तत हिते वा" ॥३।२।१३९॥ इति सभावः ।

**सतत्त्व**-न.-१३७७-स्वरूप, स्वभाव.

द्र० आत्मनशब्दः ।

* सह तद्भावेन वर्तते इति सतत्त्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सती**-२०४-स्त्री-પાર્વતી.

द्र० अद्रिजाशब्दः ।

* सतीति पुत्रजन्मनि दक्षपुत्रीत्वे नाम, दक्षजेतिवत्, यद् **वामनपुराणे**-

"ब्रह्मस्त्वया समाख्याता, मृता दक्षात्मजा सती ।
सा जाता हिमवत्पुत्री त्येवं मे वक्तुमर्हसि ॥"

सत्यशीलत्वात् सती ।

**सती**-स्त्री--५२८-સતીસ્ત્રી.

☐ पतिव्रता, एकपत्नी, सुचरित्रा, साध्वी ।

* अस्ति नित्यं भर्तृभक्ता सती ।

**सती**-स्त्री-१०५५-ફટકડી.

द्र० आढकीशब्दः ।

* अस्तीति सती ।

**सतीनक**-पुं-११७०-વટાણા.

द्र० कलायशब्दः ।

* सीदन्त्यनेनेति सतीनः, "दिननग्न-" (उणा-२६८) इति साधुः, के सतीनकः, सातीनोऽपि ।

**सतीर्थ्य**-पुं-७९-ગુરૂભાઈ, સહાધ્યાયી.

☐ एकगुरु ।

* तरन्त्यनेन विद्याम्भोधिमिति तीर्थं गुरुः, समाने तीर्थे वसन्तीति सतीर्थ्याः, "सतीर्थ्यः" ॥६।४।७८॥ इति यान्तो निपात्यते ।

**सत्तम**-न.-१४३९-શ્રેષ્ઠ અતિશય, ઉત્તમ.

☐ श्रेयस्, श्रेष्ट, पुष्कल, 'अतिशोभन' ।

* अतिशयेन सदिति सत्तमम्, "प्रकृष्टे तमप्" ॥७।३।५॥

**सत्व**-न.-पुं-१३६६-સંસારીજીવ, પ્રાણી.

द्र० असुमत्शब्दः ।

* सीदतीति सत्वं पुंक्लीबलिङ्गः ।

**सत्वप्रधानता**-स्त्री-७१-સાહસવાળી વાણી, પ્રભુની વાણીના ૩૫ પૈકી ૩૨ મો ગુણ.

* सत्वप्रधानता साहसोपेतता ।

**सत्पथ**-पुं-९८४-સારો માર્ગ.

☐ सुपथिन्, अतिपथिन् ।

* संश्चासौ पन्थाश्च सत्पथः ।

**सत्य**-न.-२६४-સાચું.

द्र० ऋतशब्दः ।

* सति साधु सत्यम् ।

**सत्यंकार**-पुं-८७२-ખરીદવા માટે નક્કી કરેલ બહાનું આપવું તે.

☐ सत्यापन, सत्याकृति ।

* सत्यस्य करणं सत्यङ्कारः, "सत्यागदाऽस्तोः कारे" ॥३।२।११२॥ इति मोऽन्तः ।

**सत्यप्रवाद**-न.-२४७-१४ પૂર્વ પૈકી છઠ્ઠા પૂર્વનું નામ.

* सत्यं संयमः, सत्यवचनं वा, तत् सभेदं सप्रतिपक्षं च यत् प्रवदति तत् सत्यप्रवादम् ।

**सत्यवती**-स्त्री-८४७-વ્યાસ ઋષિની માતા.

द्र० गन्धमालिकाशब्दः ।

* सत्यमस्त्यस्याः इति सत्यवती । **शेषश्चात्र**-"सत्यवत्यां गन्धवती । मत्स्योदरी ॥" इति ।

**सत्यसङ्गर**-न.-पुं-१९०-(શે.४०)-કુબેરદેવ

द्र० इच्छावसुशब्दः ।

**सत्याकृति**-स्त्री-८७२-ખરીદવા માટે નક્કી કરેલ. બહાનું આપવું તે.

☐ सत्यापन, सत्यङ्कार ।

* सत्यस्य करणं "सत्यादशपथे" ॥७।२।१४३॥ इति डाचि कृतौ च सत्याकृतिः ।

**सत्याग्नि**-पुं-१२३-(શે.१८)-અગસ્ત્ય ઋષિ.

द्र० अगस्तिशब्दः ।

**सत्यानृत**-न.-८६७-વેપાર.

☐ वाणिज्य, वाणिज्या ।

* किञ्चित् सत्यं किञ्चिदसत्यं सत्यानृतम् ।

**सत्यापन**-न.-८७१-ખરીદવા માટે નક્કી કરીને બહાનું આપવું તે,



Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐ सत्यङ्कार, सत्याकृति ।

* अवश्यं मयैतद् विक्रेतव्यमिति सत्यस्य करणं सत्यापनम्, "सत्यार्थवेदस्याः-" ॥३।४।४४॥ इति णिचि आकारादेशो च "अर्तीरी-" ॥४।२।२१॥ इति पोऽन्तः ।

**(सत्येतरत्)**-न.-२६५-અસત્ય વચન.

द्र० अनृतशब्दः ।

**सत्र**-न.-८२०-યજ્ઞ.

द्र० अध्वरशब्दः ।

* सीदन्त्यत्र देवाः इति सत्रम्, "हुयामा-" (उणा-४५१) इति त्रः ।

**सत्र**-न.-१११०-જંગલ.

द्र० अटवीशब्दः ।

* सीदन्त्यत्रेति सत्रं "हुयामा-" (उणा-४५१) इति त्रः ।

**सत्र**-न.-६६७-(शे.१३७)-વસ્ત્ર.

द्र० अंशुकशब्दः ।

**सत्रशाला**-स्त्री-१०००-હંમેશની દાનશાળા.

☐ प्रतिश्रय, (सत्रशाल) ।

* सत्रं सदादानं तस्य शाला सत्रशाला ।

**सत्रा**-अ.-१५२७-સાથે.

☐ साकं, समं, सार्द्धं, अमा, सह ।

* सत् त्रायते सत्रा विच्, **यथा**- "सत्रा कलत्रैर्गार्हस्थ्यम्" ।

**सत्रिन्**-पुं-७२४-હંમેશા દાન આપનાર, ઘરધણી.

☐ गृहपति ।

* सीदन्त्यस्मिन् सत्रं गृहं सर्वदादानं च, तदस्यास्तीति सत्री ।

**सत्वर**-न.-१४७०-જલદી.

द्र० अविलम्बितशब्दः ।

* सह त्वरया वर्तते इति सत्वरम् ।

**सत्वर**-न.-१५३०-જલદી, ઉતાવળથી.

द्र० अजस्रशब्दः ।

**सथूत्कार**-न.-१६७-થૂંક ઊડે તેવું વચન.

☐ अम्बूकृत, (सनिष्ठेव) ।

* सथूत्कारं सनिष्ठेवम् ।

**सद्**-पुं-१०-(प.)-આશ્રય વાચક શબ્દથી જોડવા યોગ્ય શબ્દ દા.ત. દ્યુસદ્.

**सदन**-न.-९९०-ઘર.

द्र० अगारशब्दः ।

* सीदन्त्यस्मिन् इति सदनम् ।

**सदस्**-स्त्री-४८१-સભા.

द्र० आस्थाशब्दः ।

* सीदन्त्यस्मिन्निति सदः, स्त्रीक्लीबलिङ्गः, "अस्"-(उणा-९५२) इत्यस् ।

**सदस्य**-पुं-४८०-સભાજન, સભ્ય.

द्र० पार्षद्यशब्दः ।

* सदसि साधवः सदस्याः ।

**सदा**-अ.-१५३१-હંમેશા.

द्र० अनिशशब्दः ।

* सर्वस्मिन् काले सदा, "सदाऽधुनेदानीं" ॥७।२।९६॥ इति साधुः । **यथा**-"सदा पुरोडाशपवित्रिताधरे" सर्वदाऽपि ।

**सदागति**-पुं-९८-(शि. ८)-સૂર્ય.

द्र० अंशुशब्दः ।

**सदागति**-पुं-११०७-(शे.१००)-પવન, વાયુ.

द्र० अनिलशब्दः ।

**सदातन**-न.-१४५३-(शि.१२८)-શાશ્વત, નિત્ય.

द्र० अनश्वरशब्दः ।

**सदादान**-पुं-१२७७-(शे.१३५)-ઇન્દ્રનો હાથી.

द्र० अभ्रमातङ्गशब्दः ।

**सदानीरा**-स्त्री-१०८५-કરતોયા નદી.

☐ करतोया ।

* सदा नीरमस्यामिति सदानीरा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सदायोगिन्**-पुं-२१९-(शे.७६)-विष्णु, नारायण.

द्र० अच्युतशब्दः ।

**सदृक्ष**-पुं-१४६१-तुल्य, समान, सरखुं.

द्र० तुल्यशब्दः ।

* समान इव दृश्यते इति सदृक्षः, "त्यदाद्यन्यसमानादुपमानाद् व्याप्ये दृशस्टक्सकौ च" ॥५।१।१५२॥ इति सक्प्रत्ययः, "दृग्दृशदृक्षे" ॥३।२।१५२॥ इति समानस्य सादेशः ।

**सदृश**-पुं-१४६१-तुल्य, समान, सरखुं.

द्र० तुल्यशब्दः ।

* समान इव दृश्यते इति सदृक्, "त्यदाद्यन्यसमानादुपमानाद् व्याप्ये दृशस्टक्सकौ च" ॥५।१।१५२॥ इति क्विप् प्रत्ययः, "दृग्दृशदृक्षे" ॥३।२।१५१॥ इति समानस्य सादेशः ।

**(सदृशाकृया)**-स्त्री-२६१-बन्नाये करेला प्रकार.

☐ संकृति ।

**सदेश**-न.-१४५०-समीप, पासे.

द्र० अन्तिकशब्दः ।

* समानो देशोऽस्येति सदेशम् ।

**सद्भूत**-न.-२६५-सत्य, साचुं.

द्र० अनृतशब्दः ।

* सच्च तद् भूतं च सद्भूतम् ।

**सद्मन्**-वि.-१०-(प.)-आश्रय वाचक शब्द थी जोडवा योग्य शब्द. दा.त. कुसुमसद्मा.

**सद्म**-न.-९९०-घर.

द्र० अगारशब्दः ।

* सीदन्त्यस्मिन् "मन्"-(उणा-९११) इति मनि सद्म क्लीबलिङ्गः ।

**सद्यस्**-अ.-१५३२-एकदम, तत्काल.

☐ सहसा, एकपदे, अकस्मात्, सपदि ।

* समानेऽहनि सद्यः, "सद्योऽद्यपरेद्यवि" ॥७।२।९७॥ इति साधुः, **यथा**—

"सद्यः पतति मांसेन" ।

**सद्यस्**-अ.-१५४२-(शे.२०३)-तेज दिवसे.

**सद्यस्क**-न.-१४४८-नवुं.

द्र० अभिनवशब्दः ।

* सद्यो भवं सद्यस्कम्, पृषोदरादित्वात् साधुः ।

**सधर्मचारिणी**-स्त्री-५१३-(शि.४१)-पत्नी.

द्र० ऊढाशब्दः ।

**सधर्मन्**-पुं-१४६१-तुल्य, समान, सरखुं.

द्र० तुल्यशब्दः ।

* समानो धर्मोऽस्येति सधर्मा, "द्विपदाद्धर्मादन्" ॥७।३।१४१॥ इति समासान्तः ।

**सधर्मिणी**-स्त्री-५१२-पत्नी

द्र० ऊढाशब्दः ।

* सह धर्मोऽस्त्यस्याः सधर्मिणी, यज्ञादौ सहाधिकारात्, सहधर्मिणी, सधर्मचारिण्यपि ।

**सध्रीची**-स्त्री-५२९-सखी.

☐ वयस्या, आलि, सखि ।

* सहाञ्चतीति सध्रीची, "अञ्चः" ॥२।४।३॥ इति ङीः ।

**सध्र्यञ्च्**-अ.-४४४-साथे जनार.

* "सहसमः-" ॥३।२।१२३॥ इति सध्र्यादेशो सध्र्यङ् ।

**सनत्**-पुं-२१३ (शे. ६४)-ब्रह्मा.

द्र० अजशब्दः ।

**सनत्**-अ.-१५३१-(शि. १३७)-हंमेशा नित्य.

द्र० अनिशशब्दः ।

**सनत्कुमार**-पुं-६९३-चोथा चक्रवर्ती.

☐ अश्वसेननृपनन्दन ।

* सनत् नित्यं कुमार इव रूपवत्वात् सनत्कुमारः ।

**सनत्कुमारज**-पुं-९३-त्रीजा वैमानिक देव.

* सनत्कुमारकल्पेषु जाताः सनत्कुमारजाः ।

**सना**-अ.-१५३१-हंमेशा नित्य.

द्र० अनिशशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* सनोतीति सना "सनिक्षमि-" (उणा-६०४) इत्याप्रत्यः, यथा-सनातनः, सनत्, सनादित्यपि, यथा-सनत्कुमारः, सनात्कुमारः ।

**सनात्**-अ.-१५३१-(शि. १३७)-હંમેશા, નિત્ય.
द्र० अनिशशब्दः ।

**सनातन**-પું-२१६-વિષ્ણુ, નારાયણ, કૃષ્ણ.
द्र० अच्युतशब्दः ।
* सना भवः सनातनः, अव्ययत्वात् तनट् ।

**सनातन**-ન.-१४५२-શાશ્વત, નિત્ય.
द्र० अनश्वरशब्दः ।
* सना सर्वदा भवतीति सनातनम्, "सायंचिरं-" ॥६।३।८८॥ इति तनट्, सदातनमपि ।

**सनाभि**-પું-५६२-પિત્રાઈ, સાતપેઢી સુધીના કુટુમ્બી.
☐ सपिण्ड ।
* समा नाभिर्मूलं येषां ते सनाभयः, "समानस्य" ॥३।२।१४९॥ इति सत्वम् ।

**सनि**-સ્ત્રી-પું-३८८-યાચના કરવી.
द्र० अर्थनाशब्दः ।
* सन्यते इति सनिः, "पदिपठि" -(उणा-६०७) इति इः, स्त्रीलिङ्गोऽयम्, पुंस्यपि **वैजयन्ती** यदाह-
"भिक्षा च सनिरुक्ती स्यात्" इति । 'सनिस्त्वध्येषणा' इति गुर्वादिः क्वचिदर्थे प्रार्थनया नियोजनमित्यमरः पृथगाह ।

**(सनिष्ठेव)**-ન.-२६७-થૂંક ઉડે તેવું વચન.
☐ अम्बूकृत, सथूत्कार ।

**सनीड**-ન.-१४५०-સમીપ, નિકટ, પાસે.
द्र० अन्तिकशब्दः ।
* समानं नीडमस्येति सनीडम् ।

**सन्तत**-ન.-१४७२-નિરન્તર, કાયમ.
द्र० अजस्रशब्दः ।
* संतन्यते इति सन्ततम् ।

**सन्तति**-પું-५४३-(શે.११५)-છોકરું, ગોત્ર-પુત્ર.
द्र० अपत्यशब्दः ।

**'सन्तति'**-સ્ત્રી-५०३-(શિ.३९)-કુલ, વંશ.
द्र० अन्वयशब्दः ।

**'सन्तप्त'**-ન.-१४९३-સન્તાપેલું.
द्र० तप्तशब्दः ।

**सन्तमस**-ન.-१४६-અન્ધકાર.
द्र० अन्धकारशब्दः ।
* सततं तमः सन्तमसम्, "समवान्धात्तमसः" ॥७।३।८०॥ इत्यत् ।

**सन्तान**-પું-१७९-કલ્પવૃક્ષ.
☐ कल्प, पारिजात, मन्दार, हरिचन्दन ।
* संतन्यते पुष्पाण्यस्मिन् इति संतानः ।

**सन्तान**-પું-५०३-કુલ, વંશ.
द्र० अन्वयशब्दः ।
* संतन्यतेऽनेनेति सन्तानः, सन्ततिरपि ।

**सन्तान**-પું-५४३-(શે.११५)-સંતતિ, છોકરું.
द्र० अपत्यशब्दः ।

**सन्ताप**-પું-११०२-અગ્નિવડે દાઝવાથી થતી પીડા.
☐ संज्वर ।
* सन्तापयतीति सन्तापः ।

**सन्तापित**-પું-१४९३-સંતાપેલું.
द्र० तप्तशब्दः ।
* तप्यते इति तप्तः, 'बहुलमेतन्निदर्शनम्' इति चुरादित्वात् स्वार्थे णिचि सन्तापितः ।

**सन्तोष**-પું-८२-પાંચ નિયમ પૈકી બીજો નિયમ.
* सन्तोषः सन्निहितसाधनादधिकस्याऽनुपादित्सा ।

**सन्तोष**-પું-३०८-સંતોષ, સારી રીતે તુષ્ટિ.
☐ धृति, स्वास्थ्य ।
* संतोषणं सन्तोषः ।

**सन्दर्भ**-પું-६५३-રચના, ગૂંથણ.
द्र० गुम्फशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* सन्दर्भणं सन्दर्भः ।

**संदंश**-पुं-१०९-સાણસી, ચાપીઓ.

☐ कङ्कमुख ।

* संदश्यतेऽनेन तप्तहेमादि संदंशः ।

**सन्दान**-न.-१२७४-પશુઓને બાંધવાનું દોરડું.

☐ बन्धन, दामन् ।

* संदीयते रक्ष्यतेऽनेनेति सन्दानम् ।

**सन्दानित**-पुं-४२९-કેદી.

द्र० कीलितशब्दः ।

* संदान्यते स्मेति सन्दानितः ।

**सन्दानिनी**-स्त्री-९९९-ગોશાળા.

☐ गोशाला ।

* सन्दाननं गोबन्धनरज्जुरस्यामिति सन्दानिनी ।

**सन्दाव**-पुं-८०२-પલાયન, નાશીજવું.

द्र० अपक्रमशब्दः ।

* संदवनं संदावः, "युदुद्रोः" ।।५।३।२९।। इति घञ् ।

**सन्देशवाच्**-स्त्री-२७६-સંદેશો.

☐ वाचिक ।

* अन्येन अन्योऽन्यस्मै यदाह "त्वयैवंकर्तव्यमिति" स संदेशः, तद्रूपावाक् संदेशवाक् ।

**संदेशहारक**-पुं-७३४-દૂત.

☐ दूत ।

* संदेशं मुखाख्यानं हरतीति संदेशहारकः ।

**सन्देह**-पुं-१३७५-સંદેહ, સંશય.

☐ द्वापर, आरेका, विचिकित्सा, संशय ।

* संदेहनं संदेहः, उभयकोटिपरामर्शज्ञानम् ।

**सन्दोह**-पुं-१४११-સમૂહ, સમુદાય.

द्र० उत्करशब्दः ।

* संदुह्यते पूर्यते इति संदोहः ।

**सन्द्राव**-पुं-८०३-પલાયન, નાસીજવું.

द्र० अपक्रमशब्दः ।

* संद्रवणं संद्रावः "युदुद्रोः–" ।।५।३।५९।। इति घञ् ।

**सन्धा**-स्त्री-२७८-અંગીકાર, પ્રતિજ્ઞા.

द्र० अङ्गीकारशब्दः ।

* संधानं सन्धा ।

**सन्धानी**-स्त्री-९९६-ટંકશાળ.

☐ कुप्यशाला ।

* सन्धीयतेऽस्यामिति सन्धानी ।

**सन्धि**-पुं-७३५-સુલેહ, સમાધાન.

* सन्धानं सन्धिरेकत्वम् ।

**सन्धि**-पुं-९८५-(शि.८६)-સુરંગ.

☐ सुरुङ्गा, 'सुरङ्गा', सन्धिला ।

**सन्धिजीवक**-पुं-४७५-લાંચ લેનાર.

☐ पार्श्वक ।

* सन्धिना जीवतीति सन्धिजीवकः ।

**सन्धिनी**-स्त्री-१२६७-બળદના સંયોગથી ગર્ભવતી થયેલી ગાય.

☐ वृषाक्रान्ता ।

* सन्धानं सन्धा, गर्भग्रस्त्यस्याः इति सन्धिनी, शिखादित्वादिन् ।

'अदुग्धा दोहकाले तु सन्धिनी' इति **कात्यः** । 'सन्धिन्यकालदुग्धा गौर्वृषाक्रान्ता च सन्धिनी' इति तु **शाश्वतः** ।

**सन्धिबन्धन**-न.-६३१-(शे.१३०)-સન્ધિના બન્ધન રૂપ સ્નાયુ.

द्र० वस्नसाशब्दः ।

**सन्धिला**-स्त्री-९८५-સુરંગ.

☐ सुरुङ्गा, 'सुरङ्गा' [सन्धि शि. ८६] ।

* सन्धिं लातीति सन्धिला, सन्धिरपि ।

**सन्ध्या**-स्त्री-१४०-સન્ધ્યાકાળ, દિવસ અને રાતનો મધ્યવર્તી સમય.

☐ पितृसू, (पितृप्रसू) ।

* संध्यायन्त्यस्यामिति सन्ध्या, सज्यते सन्धीयते अहोरात्रावस्यामिति वा "सञ्जेर्ध च"-(उणा-३५९) इति यः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सन्ध्यानादिन्**–पुं–२००–(शे.४७)–શંકર.

द्र० अट्टहासिन्शब्दः ।

**सन्ध्याबल**–पुं–१८८–(शे.३५)–રાક્ષસ.

द्र० असृक्पशब्दः ।

**'सन्नकद्रु'**–पुं–११४२–ચારોલીનું ઝાડ.

द्र० पियालशब्दः ।

**सन्नद्ध**–पुं–७६५–બખ્તર પહેરેલો, તૈયાર.

द्र० दंशितशब्दः ।

* संनह्यते स्मेति संनद्धः ।

**सन्नह**–पुं–७६६–બખ્તર, કવચ.

द्र० उरश्छदशब्दः ।

* संनह्यते इति सन्नाहः ।

**सन्नाह्य**–पुं–१२२२–લડાઈને યોગ્ય હાથી.

☐ समरोचित ।

* संनह्यते इति सन्नह्यः, सन्नाहं साधुरिति वा ।

**सन्निकर्ष**–पुं–१४५०–સમીપ, નિકટ, પાસે.

द्र० अन्तिकशब्दः ।

* सन्निकृष्यते इति सन्निकर्षः ।

**सन्निकृष्ट**–न.–१४५१–સમીપ, નિકટ, પાસે.

द्र० अन्तिकशब्दः ।

* संनिकृष्यते इति सन्निकृष्टम् ।

**सन्निधान**–न.–१४५०–સમીપ, નિકટ, પાસે.

द्र० अन्तिकशब्दः ।

* संनिधीयतेऽत्रेति सन्निधानम् ।

**सन्निधि**–पुं–१४५१–સમીપ, નિકટ, પાસે.

द्र० अन्तिकशब्दः ।

* संनिधीयतेऽस्मिन् इति संनिधिः पुंसि ।

**सन्निवेश**–पुं–१५१६–આકાર, અવયવોની રચના.

⊡ संस्थान ।

* संनिवेशनं संनिवेशः ।

**सपत्न**–पुं–७२९–શત્રુ.

द्र० अभिमातिशब्दः ।

* सपत्न्यास्तुल्यः सपत्नः "अः सपत्न्याः" ॥७।१।११९॥ इति साधुः ।

**सपत्राकृति**–पुं–१३७२–અત્યન્ત પીડા.

☐ निष्पत्राकृति ।

* पत्रं शरः सह पत्रमनेन सपत्रः कायनिक्षिप्त–शरः, सपत्रस्य करणं सपत्राकृतिः । अयमुपचारादत्यन्त-पीडनामात्रे वर्तते "सपत्रनिष्पत्रादतिव्यथने" ॥७।२।८॥ इति डाच् ।

**सपदि**–अ.–१५३२–તત્કાળ, તરતજ.

⊡ सहसा, एकपदे, सद्यस्, अकस्मात् ।

* संपद्यते इति सपदि "पदिपठि–" (उणा–६०७) इति इः, स्वरादिगणपाठात् समो मलोपः, **यथा**—

"सपदि प्रदहत्युपेक्षितोऽग्निः" ।

**'सपदि'**–अ.–१५३०–જલદી.

द्र० अञ्जसाशब्दः ।

**सपर्या**–स्त्री–४४७–પૂજન, સત્કાર.

द्र० अर्चाशब्दः ।

* सपरेति धातुः कण्ड्वादौ तस्माद् यकि "शंसिप्रत्ययात्" ॥५।३।१०५॥ इत्यप्रत्यये च सपर्या ।

**सपिण्ड**–पुं–५६२–સાતપેઢી સુધીના કુટુમ્બી.

☐ सनाभि ।

* समानः पिण्डः एषां सपिण्डाः, **यत्स्मृतिः–**

"सपिण्डता तु पुरुषे सप्तमे विनिवर्तते, सप्तमा–दूर्ध्वं सगोत्राः ।"

**सपीति**–स्त्री–९०७–સાથે પીવું.

☐ सहपान ।

* सहपानं सपीतिः ।

**सप्तकी**–स्त्री–६६४–મેખલા, સ્ત્રીની કેડનો કન્દોરો.

द्र० कटिसूत्रशब्दः ।

* सपति समवैति सप्तकी "कीचक–" (उणा–३३) इत्यके निपात्यते, उतरत्र "पुंस्कटिस्था" इति वचनादत्र स्त्रीकट्यामिति लभ्यते ।

**सप्तच्छद**–पुं·१६ (प.)-સપ્તપર્ણ, સાતપુડાનું ઝાડ.

**सप्तजिह्व**–पुं–१०९९–અગ્નિ.
द्र० अग्निशब्दः ।
* सप्त जिह्वाऽस्येति सप्तजिह्वः ।

**सप्ततन्तु**–पुं–८२०–યજ્ઞ.
द्र० अध्वरशब्दः ।
* पशुबन्धार्थे सप्त तन्तवोऽत्रेति सप्ततन्तुः पुंलिङ्गः, यद्वा सप्तसङ्ख्यास्तन्तवो भेदा अस्य, यदाह—
'अग्निष्टोमादयः संस्था भेदाः सप्ताऽस्य तन्तवः" इति ।

**सप्तपलाश**–पुं–१६ (प.) સપ્તપર્ણ.

**सप्तपर्ण**–पुं–११३३–સાતપડાનું ઝાડ.
द्र० अयुक्छदशब्दः ।
* सप्त पर्णानि अस्येति सप्तपर्णः ।

**सप्तर्षि**–पुं–१२४–મરિચિ આદિ સાત ઋષિ.
☐ चित्रशिखण्डिन् ।
* सप्त चते ऋषयश्च सप्तर्षयः "संख्या समाहारे च–" ॥३।१।९९॥ इति संज्ञायां कर्मधारयः ।

**सप्तर्षिज**–पुं–११९ (शे. १०) ગુરુ, (બૃહસ્પતિ)
द्र० आङ्गिरसशब्दः ।

**सप्तर्षिपूता**–स्त्री–१५ (प.) ઉત્તર દિશા.

**सप्तला**–स्त्री–११४८–બટ મોગરો.
☐ नवमालिका, 'नवमल्लिका' ।
* सप्त मनो बुद्धिमिन्द्रियाणि च लातीति सप्तला, सपति समवैति वा "मुरल"–(उणा–४७४) इत्यले निपात्यते ।

**सप्तसप्ति**–पुं–९६–સૂર્ય.
द्र० अंशुशब्दः ।
* सप्तसंख्याः सप्तयो यस्य सप्तसप्तिः यौगिकत्वाद्विषमाश्व इत्यादयः, सप्तभिर्नामभिरुपलक्षितोऽश्वो यस्येति वा सप्तसप्तिः, यद्वेदे—
"सप्त युञ्जन्ति रथमेकचक्रमेकोऽश्वो वहति सप्तनामा" ।

**सप्तार्चिष**–पुं–१२०–શનિગ્રહ.
द्र० असितशब्दः ।
* सप्तार्चिषोऽस्येति सप्तार्चिः ।

**सप्तार्चिस्**–पुं–११००–અગ્નિ.
द्र० अग्निशब्दः ।
* सप्त अर्चिषोऽस्येति सप्तार्चिः ।

**सप्ति**–पुं–१२३३–ઘોડો.
द्र० अर्वन्शब्दः ।
* सपति समवैति सप्तिः "क्तुशायजि–"(उणा–६४६) इति तिः ।

**सबलि**–पुं–१४०–સાયંકાળ.
☐ दिनावसान, उत्सूर, विकाल, सायम् ।
* सह बलिभिरुपहारैर्वर्तते इति सबलिः, पुंलिङ्गः ।

**सब्रह्मचारिन्**–पुं–८०–સમાન આગમ વ્રત અને આચારવાળા.
* समाने ब्रह्मण्यागमे गुरुकुले वा व्रतं चरन्तीत्येवंशीलाः सब्रह्मचारिणः, समाना ब्रह्मचारिण इति वा "सब्रह्मचारी" ॥३।२।१५०॥ इति निपात्यते ।

**सभा**–स्त्री–४८१–સભા.
द्र० आस्थाशब्दः ।
* सन्यते भज्यते इति सभा, "सनेर्डित्"–(उणा–३३०) इत्यभः, सह भान्त्यस्यामिति वा ।

**सभा**–स्त्री–९९८–ઘર.
द्र० अगारशब्दः ।
* सह भान्त्यस्यामिति सभा ।

**सभाजन**–न.–७३१–મિત્ર વગેરેને આલિંગનાદિથી સુખ ઉપજાવવું તે.
☐ आनन्दन, आप्रच्छन, 'स्वभाजन' ।
* सभाज्यते इति सभाजनम् ।

**सभासद्**–पुं–४८०–સભ્ય, સભાજન.
द्र० पार्षद्यशब्दः ।
* सभायां सीदन्तीति सभासदः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सभास्तार**-पुं-४८०-સભ્ય, સભાજન.
द्र० पार्षद्यशब्दः ।
* सभामास्तृणन्तीति सभास्ताराः ।

**सभिक**-पुं-४८५-જુગારી.
☐ द्यूतकारक ।
* सभा द्यूतशालास्त्यस्येति सभिकः, "नावादेरिकः" ।।७।२।३।।

**सभ्य**-पुं-३७९-સારો માણસ.
☐ साधु, आर्य, सज्जन ।
* सभायां साधुः सभ्यः ।

**सभ्य**-पुं-४८०-સભાજન.
द्र० पार्षद्यशब्दः ।
* सभायां साधवः सभ्याः ।

**सम**-न.-१४३३-સમસ્ત, બધું.
द्र० अखण्डशब्दः ।
* समतीति समम्, **यथा**-
"सूर्यः सर्वेषां समः" ।

**सम**-पुं-१४६१-તુલ્ય, સમાન, સરખું.
द्र० तुल्यशब्दः ।
* समतीति समः ।

**समग्र**-न.-१४३३-સમસ્ત, બધું.
द्र० अखण्डशब्दः ।
* तिष्ठति इति स्थपुटम्, "नकुट"–(उणा–१५५) इत्युटे निपात्यते ।

**स्थल**–न.–९४०–અકૃત્રિમ ભૂમિ સ્થાન.

☐ स्थली ।

* स्थलति इति स्थलम्, तिष्ठन्त्यस्मिन्निति वा "स्थो वा" (उणा–४७३) इति किद्लः ।

**स्थलशृङ्गाट**–पुं–११५६–ગોખરૂં.

द्र० गोक्षुरशब्दः ।

* स्थलस्य शृङ्गाटः इति स्थलशृङ्गमटतीति वा स्थलशृङ्गाटः ।

**(स्थला)**–स्त्री–९४०–કૃત્રિમ ભૂમિ.

**स्थली**–स्त्री–९४०–પાણી વિનાની અકૃત્રિમ ભૂમિ.

☐ स्थली ।

* स्थली अकृत्रिमा चेत् "भाजगोण"–॥२।४।३०॥ इति ङीः, कृत्रिमा तु स्थला ।

**स्थविर**–पुं–२११–બ્રહ્મા.

द्र० अजशब्दः ।

* स्थविरः पुराणपुरुषत्वात् ।

**स्थविर**–पु–३३९–ઘરડો, વૃદ્ધ.

द्र० जरत्शब्दः ।

* यौवनमतिक्रम्य तिष्ठति इति स्थविरः, "स्थविरपिठिर"–(उणा–४१७) इतीरान्तो निपात्यते ।

**स्थाणु**–पुं–१९५–શંકર.

द्र० अट्टहासिन्शब्दः ।

* तिष्ठति शाश्वतं इति स्थाणुः "अजिस्था"–(उणा–७६८) इति णुः ।

**स्थाणु**–पुं–न.–११२२–વૃક્ષનું ઠુંઠું.

☐ ध्रुवक, (ध्रुव), शङ्कु ।

* तिष्ठतीति स्थाणुः पुंक्लीबलिङ्गः "अजिस्था"–(उणा–७६८) इति णुः ।

**स्थाण्डिल**–पुं–८१०–ભૂમિ ઉપર સૂઈ રહેનાર.

☐ स्थण्डिलशायिन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* स्थण्डिल एव शेते इति स्थाण्डिलः "स्थण्डिलाच्छेते व्रती"-॥६।२।१३९॥ इत्यण् ।

**स्थान**-(બ.વ.)-ન.-७७७-ધનુર્ધારીના પાંચ આસનો.

* तिष्ठन्त्येभिरिति स्थानानि ।

**स्थान**-ન.-९८८-સ્થાન.

☐ पद, आस्पद ।

* तिष्ठन्त्यस्मिन् इति स्थानम् ।

**स्थान**-ન.-९९१-ઘર.

द्र० अगारशब्दः ।

* तिष्ठन्त्यत्र इति स्थानम् ।

**स्थानक**-ન.-१०९५-ક્યારો.

द्र० आलवालशब्दः ।

* वृक्षसेकाऽर्थं द्रवतोऽम्भसः स्थानं इति स्थानकं यदाहुः "आलवालं विदुर्धारा धारणं द्रवतोऽम्भसः" ।

**स्थानाङ्ग**-ન.-२४३-ત્રીજું અંગ સૂત્ર.

* तिष्ठन्त्यस्मिन् प्रतिपाद्यतया जीवदया इति स्थानं, एकादिदशान्तसंख्याभेदो वा स्थानं तत् प्रतिपादको ग्रन्थोऽपि स्थानं, तच्च तदङ्गं च इति स्थानाङ्गम् ।

**स्थानाध्यक्ष**-પું-७२४-થાણદાર.

☐ स्थानिक ।

* स्थानस्य पञ्चानां दशानां वा ग्रामाणां रक्षानियुक्तोऽध्यक्षः इति स्थानाध्यक्षः ।

**स्थानिक**-પું-७२४-થાણદાર.

☐ स्थानाध्यक्ष ।

* स्थाने नियुक्तः इति स्थानिकः ।

**स्थानीय**-ન.-९७२-નગર.

द्र० अधिष्ठानशब्दः ।

* तिष्ठन्त्यस्मिन् इति स्थानीयम् "बहुलम्" ॥५।१।२॥ इत्यधिकरणेऽप्यनीयः ।

**(स्थानीय)**-ન.-९७२-રાજધાનીનું નગર.

**(स्थापक)**-પું-३३०-સૂચન કરનાર.

द्र० सूचकशब्दः ।

**स्थापत्य**-પું-७२७-અંતઃપુરનો રક્ષક.

द्र० कञ्चुकिन्शब्दः ।

* कुलस्त्रीर्व्यवस्थया स्थापयन्ति इति स्थपतयः, स्थपतय एव स्थापत्याः, भेषजादित्वाट् टयण्, यद्वा तिष्ठन्त्यस्मिन्निति स्थादित्वात्के स्थो वासः स्थश्चासौ पतिश्च स्थपतिस्तत्र भवः "अनिदम्य"-॥६।१।१५॥ इति ञ्यः स्थापयन्तीति वा "शिक्यास्याढय"-(उणा-३६४) इति ये निपात्यते ।

**स्थामन्**-ન.-७९६-પરાક્રમ, બળ.

द्र० ऊर्ज्जशब्दः ।

* तिष्ठन्त्यनेन इति स्थाम "मन्"-(उणा-९११) इति मन् ।

**स्थायिन्**-પું-२९५-સ્થાયીભાવ.

**स्थायुक**-પું-७२६-ગામનો અધિકારી.

* तिष्ठत्येवं शीलः इति स्थायुकः, "शकमि"-॥५।२।४०॥ इत्युकण् ।

**स्थाल**-સ્ત્રી ન.-१०२६-મોટું વાસણ.

* स्थलति इति स्थालं स्त्रीक्लीबलिङ्गः, ज्वलादित्वात् णः तिष्ठति अत्रेतिवा ।

**स्थाली**-સ્ત્રી-१०१९-થાળી, તપેલી.

द्र० उखाशब्दः ।

* तिष्ठत्यस्यां इति स्थाली "स्थो वा" (उणा-४७३) इत्यलः, स्थलति इतिवा ज्वलादित्वाद् णः ।

**स्थावर**-ન.-१४५४ સ્થાવર પૃથ્વી વગેરે.

☐ जङ्गमान्यत् ।

* तिष्ठतीत्येवं शीलं इति स्थावरं पृथिव्यादि "स्थेशभास"-॥५।२।८१॥ इति वरः ।

**स्थाविर**-ન.-३४०-ઘડપણ, વૃદ્ધત્વ.

☐ वार्धक ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* स्थविरस्य भावः कर्म वा इति स्थाविरं युवादित्वादण् ।

**स्थासक**-पुं-६४९-હાથનો થાપો.

☐ हस्तबिम्ब ।

* तिष्ठत्यङ्गे इति स्थासकः ''कीचकपेचक''-(उणा-३३) इत्यके निपात्यते ।

**स्थासक**-पुं-१०७७-પાણીનો પરપોટો.

☐ बुद्बुद, (जलस्फोट) ।

* तिष्ठति इति स्थासकः ''कीचक''-(उणा-३३) इत्यके निपात्यते ।

**स्थास्नु**-न.-१४५३-અચલ, સ્થિર.

द्र० अतिस्थिरशब्दः ।

* तिष्ठतीति त्येवंशीलं स्थास्नु ''स्थाग्लाम्ला''-॥५।२।३१॥ इति स्नुः ।

**स्थित**-पुं-४९२-ઉભેલો.

☐ ऊर्ध्व, ऊर्ध्वन्दम ।

* तिष्ठति स्म कार्याय इति स्थितः ।

**स्थिति**-स्त्री-७४४-મર્યાદા.

द्र० धारणाशब्दः ।

* स्थीयतेऽनया इति स्थितिः ।

**स्थिति**-स्त्री-१३७७-અવસ્થા, દશા.

☐ अवस्था, दशा ।

* तिष्ठत्यनया इति स्थितिः ।

**स्थिति**-स्त्री-१४९८-સ્થાન, સ્થિતિ.

☐ आसना, आस्या, आस्था ।

* स्थानं इति स्थितिः ।

**स्थिति**-स्त्री-१४९९-રચના.

☐ निवेश, रचना ।

* तिष्ठन्त्यस्यां इति स्थितिः ।

**स्थिर**-पुं-२१९-(शे.७४)-વિષ્ણુ.

द्र० अच्युतशब्दः ।

**स्थिरजिह्व**-पुं-१३४४-માછલું.

द्र० अण्डजशब्दः ।

* स्थिरा जिह्वाऽस्य इति स्थिरजिह्वः कण्टकजिह्वत्वात् ।

**(स्थिरप्रेमन्)**-पुं-४७६-ગાઢ સ્નેહી.

☐ नीलीराग, स्थिरसौहृद ।

**स्थिरमद**-पुं-१३२०-(शे.१८८)-મોર.

द्र० केकिन्शब्दः ।

**स्थिरसौहृद**-पुं-४७६-ગાઢ, સ્નેહી.

☐ नीलीराग (स्थिरप्रेमन्) ।

* स्थिरं सौहृदमस्य इति स्थिरसौहृदः स्थिरप्रेमा ।

**स्थिरा** स्त्री-९३७-પૃથ્વી.

द्र० अचलाशब्दः ।

* स्थिरा अचलत्वात् ।

**स्थूल**-न.-६८१-તંબુ, વસ્ત્રનું ઘર.

☐ दूष्य ।

* स्थुडति संवृणोति इति स्थुलं वस्त्रवेश्म, तिष्ठत्यत्रेति वा ''स्थाचङ्कि''-(उणा-४८६) इति किदुलः ।

**स्थूणा**-स्त्री-१०१४-થાંભલો.

☐ स्तम्भ ।

* तिष्ठति अस्यामाधेयं इति स्थूणा, ''स्थाक्षुतोरूच्च'' (उणा-१८५) इति णः ।

**स्थूणा**-स्त्री-१४६४-લોઢાની પ્રતિમા.

☐ सूर्मी, (सूर्मि), अयःप्रतिमा ।

* तिष्ठति इति स्थूणा ''स्थाक्षुतोरूच्च'' (उणा-१८५) इति णः ।

**स्थूरिन्**-पुं-१२६३-(शि.११२)-પીઠ ઉપર ભાર ઉપાડનાર બળદ.

☐ स्थौरिन्, पृष्ठ्य, पृष्ठवाह्य ।

**स्थूल**-पुं-४४८-સ્થૂલ, જાડું.

□ पीवन्, पीन, पीवर ।

* तिष्ठत्युपचयेन "स्थाविडेः कित्" (उणा-४२९) इत्यूरे स्थूरः, लत्वे स्थूलः "स्थूलणि परिबृंहणे" इत्यस्य वाऽच् ।

**(स्थूल)**-पुं-१७-(प.)-જાડું.

**स्थूलनास**-पुं-१२८८-ભૂંડ.

द्र० आखनिकशब्दः ।

* स्थूला नासास्य इति स्थूलनासः ।

**स्थूलभद्र**-पुं-३४-છઠ્ઠા શ્રુત કેવલી.

* स्थूलं उपचितं भद्रं कल्याणमस्य इति स्थूलभद्रः ।

**स्थूललक्ष**-पुं-३८५-ઘણું આપનાર.

□ दानशौण्ड, बहुप्रद ।

* स्थूलं लक्षयति आलोचयति ददाति इति यावत् स्थूललक्षः ।

**स्थूलशाट**-पुं-६७२-જાડું વસ્ત્ર.

□ वराशि ।

* स्थूलश्चासौ शाटश्च इति स्थूलशाटः ।

**स्थूलशीर्षिका** स्त्री-१२०७-મોટા માથા વાળી નાનીકીડી.

□ ब्राह्मणी ।

* स्थूलं शीर्षमस्याः इति स्थूलशीर्षिका ।

**स्थेय**-पुं-८८२-સાક્ષી.

□ साक्षिन्, [मध्यस्थ, प्राश्निक शे.१५४]

* तिष्ठन्त्यस्मिन् इति स्थेयः, विवादपदे निर्णेता प्रमाणभूतः पुरुषः ।

**स्थेय**-पुं-७२०-(शे.१४१)-ન્યાયાધીશ.

द्र० अक्षदर्शकशब्दः ।

**स्थेयस्**-न.-१४५३-અચલ, સ્થિર.

□ अतिस्थिर, स्थास्नु, स्थेष्ठ ।

* अतिशयेन स्थिरं स्थेयः, "प्रियस्थिर-" ॥७।४।३८॥ इति स्थादेशः ।

**स्थेष्ठ**-न.-१४५३-અતિસ્થિર.

□ स्थेयस्, अतिस्थिर, स्थास्नु ।

* अतिशयेन स्थिरं स्थेष्ठम्, 'प्रियस्थिर-" ॥७।४।३॥ इति स्थादेशः ।

**स्थौरिन्**-पुं-१२६३-પીઠઉપર ભાર ઉપાડનાર બળદ.

□ पृष्ठ्य पृष्ठवाह्य, [स्थूरिन् शि.११२] ।

* स्थूराणां पश्चाज्जङ्घाभागानामिदं स्थौरं बलं तदस्यास्ति स्थौरी 'स्थूरी' इत्यन्ये ।

**स्नसा**-स्त्री-६३१-નસ.

□ वस्नसा, स्नायु [तंत्री, नखारु, स्नावन्, सन्धिबन्धन शे.१३०] ।

* स्नयति निरस्यति इति शेषश्चात्र "अथ स्नसा । तन्त्री नस्वारु स्नावानः सन्धिबन्धनमित्यपि" ॥ स्नसा स्त्रीलिङ्गः ।

**स्नातक**-पुं-८०८-ગૃહસ્થાશ્રમ.

द्र० गृहमेधिन्शब्दः ।

* वेदं समाप्य स्नातः स्नातकः "स्नाताद्वेदसमाप्तौ" ।७।३।२२॥ इति कः ।

**स्नान**-न.-६३८-સ્નાન.

□ सवन, आप्लव [आप्लाव शि.५०] ।

* स्नायते इति स्नानम् ।

**स्नायु**-स्त्री-६१९-નસ.

**(स्नायु)**-स्त्री-६३१-સ્નાયુ, નસ.

द्र० वस्नसाशब्दः ।

* स्नायति वेष्टयत्यस्थीनीति स्नायुः "कृवापा"-(उणा-१) इत्युण्, स्त्रीलिङ्गोऽयम्, क्लीबेऽपि **वाचस्पति**र्यदाह "अथस्नायुर्नसातन्त्रीः" इति ।

**स्नावन्**-पुं-६३१-(शे.१३०)નસ.

द्र० वस्नसाशब्दः ।

**स्निग्ध**-पुं-४१३-ચીકણું.

□ मसृण, चिक्कण ।

* स्निह्यति स्म इति स्निग्धः ।

**(स्निग्ध)**-पुं-४७८-સ્નેહવાળો.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

□ वत्सल ।

**स्निग्ध**-पुं-७३०-મિત્ર.

द्र० मित्रशब्दः ।

* स्निह्यति स्म स्निग्धः ।

**स्नु**-पुं-१०३५-શિખર.

□ सानु, प्रस्थ ।

* स्नौत्यम्भः स्नुः पुंलिङ्गः, पृषोदरादित्वात् ।

**'स्नुक्'**-स्त्री-११४०-વિલાયતી થોર.

□ 'स्नुही, गुडा' ।

**स्नुत**-न.-१४९६-ટપકેલું.

□ स्रुत, रीण, स्यन्न ।

* स्नौति स्म इति स्नुतम् ।

**स्नुषा**-स्त्री-५१४-પુત્રવધૂ.

द्र० जनीशब्दः ।

* मनोर्जाया, स्नौति अपत्यवात्सल्यात् इति स्नुषा "स्नुपृसृ-" (उणा-५४२) इति किद् षः ।

**स्नुहा**-स्त्री-११४०-(शि.१०२)-થોર.

द्र० महातरुशब्दः ।

**स्नुहि**-स्त्री-११४०-થોર.

द्र० महातरुशब्दः ।

* स्नुह्यति क्षीरं इति स्नुहिः स्त्रीलिङ्गः "नाम्युपान्त्य-" (उणा-६०९) इति किः, स्नुहेति वैद्याः ।

**'स्नुही'**-११४०-વિલાયતી થોર.

□ 'स्नुक्, गुडा' ।

**स्नेह**-पुं-न.-४१७-તેલ.

द्र० अभ्यञ्जनशब्दः ।

* स्निह्यत्यऽनेन इति स्नेहः पुंक्लीबलिङ्गः ।

**स्नेह**-पुं-न.-१३७७-પ્રેમ, સ્નેહ.

द्र० प्रीतिशब्दः ।

* स्नेहनं इति स्नेहः पुंक्लीबलिङ्गः ।

**स्नेहप्रिय**-पुं-६८७-દીવો.

द्र० कज्जलशब्दः ।

* स्नेहस्तैलं प्रियमस्य इति स्नेहप्रियः ।

**स्नेहभू**-पुं-४६२-કફ.

द्र० कफशब्दः ।

* स्नेहाद् भवति इति स्नेहभूः ।

**स्नेहु**-पुं-१०५--(शि.१४)-ચંદ્ર.

द्र० अत्रिदृग्जशब्दः ।

**स्पर्धा**-स्त्री-१५१५-હરીફાઈ.

□ संहर्ष, [संघर्ष शि.१३६] ।

* स्पर्द्धनं इति स्पर्द्धा ।

**स्पर्शन**-न.-३८६-દાન, ત્યાગ.

द्र० अंहतिशब्दः ।

* स्पृश्यते इतिस्पर्शनं दानमुपचारात्, पुच्छादौ गवादिकं स्पृष्ट्वा हि दीयते ।

**स्पर्शन**-पुं-११०७-વાયુ, પવન.

द्र० अनिलशब्दः ।

* स्पृशति इतिस्पर्शनः ।

**स्पश**-पुं-७३४-ચરપુરુષ.

द्र० अवसर्पशब्दः ।

* "स्पशिः सौत्रस्तालव्यान्तः" स्पशति बाधते परान् स्पशः ।

**स्पष्ट**-न.-१४६७-પ્રગટ, ચોક્ખું.

द्र० उल्बणशब्दः ।

* स्पश्यते स्म इति स्पष्टम्, "णौदान्तशान्तपूर्णदस्तस्पष्ट-" ॥४।४।७४॥ इति साधुः ।

**'स्पृशी'**-स्त्री-११५७-મોટી ભોંયરીંગણી.

द्र० कण्टकारिकाशब्दः ।

**स्पृहा**-स्त्री-४३०-ઈચ્છા.

द्र० अभिलाषशब्दः ।

* स्पृहणं इति स्पृहा "भीषिभूषि-" ॥५।३।१०९॥ इत्यङ् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**स्फट**-पुं-१३१५-सर्पनी फेण.

द्र० दर्वीशब्दः ।

* स्फटति विशीर्यतेऽनेन इति स्फटः, स्थादित्वात् कः ।

**स्फटिकाचल**-पुं-१०२८-अष्टापद पर्वत.

द्र० अष्टापदशब्दः ।

* स्फटिकमयोऽचलः इति स्फटिकाचलः ।

**स्फरण**-न.-१५२३-फरकवुं.

☐ स्फुरण, 'स्फुरणा, स्फोरण, स्फारण, स्फुलन' ।

* स्फरत् स्फुरणे, स्फर्यते इति स्फरणम् ।

**स्फाति**-पुं-१५०२-वृद्धि.

☐ वृद्धि ।

* स्फायनं इति स्फातिः ।

**स्फार**-न.-१४३०-मोटुं, विशाळ.

द्र० उरुशब्दः ।

* स्फायते इति स्फारं "भीवृद्धि-" (उणा-३८७) इति रः ।

**'स्फार'**-न.-१४२६-घणु, घाणुं.

द्र० अदभ्रशब्दः ।

**'स्फारण'**-न.-१५२३-फरकवुं.

द्र० स्फरणशब्दः ।

**'स्फिच'**-(द्वि.व.)-स्त्री-६०९-कुला, थगडा.

द्र० कटिप्रोथशब्दः ।

**स्फिज**-(द्वि व) पुं-६०९-कुला, थगडा.

द्र० कटिप्रोथशब्दः ।

* स्फायते इति स्फिजौ स्त्रीलिङ्गः "ककुप्त्रिष्टुब्" (उणा-९३२) इति बहुवचनात् क्विपि निपात्यते ।

**स्फिर**-न.-१४२६-घणु, घाणुं.

द्र० अदभ्रशब्दः ।

* स्फायते इति स्फिरं "स्थविर-" (उणा-४१७) इतीरे निपात्यते ।

**स्फुट**-न.-११२८-खीलेलुं पुष्प.

द्र० उच्छ्वसितशब्दः ।

* स्फुटति इति स्फुटम् ।

**स्फुट**-न.-१४६७-स्पष्ट.

द्र० उल्बणशब्दः ।

* स्फुटति बहिः प्रकाशते इति स्फुटम् ।

**स्फुटन**-न.-१४८८-चीरवुं-फोडवुं.

☐ विदर, भिदा, [ भिद् शि.१३४] ।

* स्फुटयनं इति स्फुटनं कुटादित्वाद् गुणाभावः ।

**स्फुटित**-न.-११२८-खीलेलुं पुष्प.

द्र० उच्छ्वसितशब्दः ।

* स्फुटितस्म इति स्फुटितम् ।

**स्फुर**-पुं-७८३-ढाल.

द्र० अङ्कुशब्दः ।

* स्फुरति चलति इति स्फुरः स्फुरकोऽपि ।

**स्फुरक**-पुं-७८३-(शि.६८)-ढाल.

द्र० अङ्कुशब्दः ।

**स्फुरण**-स्त्री-न.-१५२३-फरकवुं.

द्र० स्फरणशब्दः ।

* स्फूर्त्तिः इति स्फुरणम् ।

**'स्फुरणा'**-स्त्री-१५२३-फरकवुं.

द्र० स्फरणशब्दः ।

**'स्फुलन'**-न.-१५२३-फरकवुं.

द्र० स्फरणशब्दः ।

**स्फुलिङ्ग**-त्रि.-११०३-तणखो.

☐ अग्निकण ।

* स्फुलति संचिनोति इति स्फुलिङ्गः त्रिलिङ्गः "स्फुलिकलि-" (उणा-१०२) इतीङ्गक्, जातावपि स्त्रियां न ङीः कन्दरावत् ।

**स्फूर्जथु**-पुं-१८१-वज्रनो अवाज.

* स्फूर्जनं इति स्फूर्जथुः पुंसि "द्वितोऽथुः" ॥५।३।८३॥ इत्यथुः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**स्फोटक**-पुं-४६६-फोल्लो.

☐ पिटक, गण्ड, [विस्फोट शि.३३]।

* स्फोटति इति स्फोटः के स्फोटकः विस्फोटोऽपि ।

**(स्फोटन)**-पुं-८५३-स्फोटायन ऋषि, व्याकरणकार.

☐ कक्षीवत्, स्फोटायन । [स्फौटायन शि.७५]

**स्फोटायन**-पुं-८५३-स्फोटायनऋषि, व्याकरणकार.

☐ कक्षीवत्, [स्फौटायन शि.७५], (स्फोटन) ।

* स्फोटं शब्दः स्फोटमयते स्फोटयादित्वात् स्फोटायनः; स्फुरन्नायत्यमित्यत्रायासनति स्फोटनोऽपि ।

**'स्फोरण'**-न.-१५२३-फरकवुं.

द्र० स्फारणशब्दः ।

**स्फौटायन**-पुं-८५३-(शि.७५)-स्फोटायन ऋषि.

द्र० कक्षीवत्शब्दः ।

**स्म**-अ.-१५४२-(शे.२००)-पाद पूरणमां वपराता शब्द.

[द्र० चशब्दः शे.२००] ।

**स्मय**-पुं-३१७-अभिमान.

द्र० अभिमानशब्दः ।

* स्मयनं इति स्मयः ।

**स्मर**-पुं-२२७-कामदेव.

द्र० अङ्गजशब्दः ।

* स्मरन्त्यनेन इति स्मरः "पुंनाम्नि घः-" ॥५।३।१३०॥ ।

**स्मर**-पुं-५०७-काम-(स्त्रीनु मन).

**स्मरकूपिका**-स्त्री-६०९-योनि.

द्र० अपत्यपथशब्दः ।

**स्मरण**-न.-३०८-याद करवुं.

☐ आध्यान, स्मृति ।

**स्मरध्वज**-पुं-२८६-वाजिंत्र.

द्र० आतोद्यशब्दः ।

* स्मरस्य ध्वज इव इति स्मरध्वजः ।

**स्मरमन्दिर**-न.-६०९-योनि.

द्र० अपत्यपथशब्दः ।

**(स्मरवती)**-स्त्री-५०७-स्त्री.

**स्मित**-न.-२९६-दांत न देखाय तेवुं हास्य.

☐ वक्रोष्टिका ।

* हासेऽदृष्टदन्ते ईषद्धसितं इति स्मितम् ।

**स्मित**-न.-११२७-खीलेलुं पुष्प.

द्र० उन्मिषितशब्दः ।

* स्मयते इति स्मितम् ।

**स्मृति**-स्त्री-२५१-धर्मशास्त्र, स्मृति.

☐ धर्मशास्त्र, धर्मसंहिता ।

* उच्छन्नविप्रकीर्णशाखानां मन्वादिभिः स्मरणात् स्मृतिः ।

**स्मृति**-स्त्री-३०८-याद करवुं ते.

☐ स्मरण, आध्यान ।

**(स्मृतिभू)**-पुं-२२९-कामदेव.

द्र० अङ्गजशब्दः ।

**स्मेर**-न.-११२९-खीलेलुं पुष्प.

द्र० उन्मिषितशब्दः ।

* स्मयनशीलं इति स्मेरं "स्म्यजस-" ॥५।२।७९॥ इति रः ।

**स्यद**-पुं-४९४-वेग.

द्र० जवशब्दः ।

* स्यन्दनं इति स्यदः, "स्यदो जवे-" ॥४।२।५३॥ इति घञि निपात्यते ।

**स्यन्द**-पुं-९०५-(शे.१३) चंद्र.

द्र० अत्रिदृग्जशब्दः ।

**स्यन्दन**-पुं-५३-गई उत्सर्पिणीना २३ मा भगवान.

* स्यन्दते देशनामृतं इति स्यन्दनम् ।

**स्यन्दन**-पुं-७५१-रथ.

☐ शताङ्ग, रथ ।

* स्यन्दते याति इति स्यन्दनः ।

**'स्यन्दन'**-पुं-११४२-तणछ.

द्र० तिनिशशब्दः ।

**स्यन्दिनी**-स्त्री-६३३-લાળ.

द्र० आस्यासवशब्दः ।

* स्यन्दतेऽवश्यं इति स्यन्दिनी ।

**स्यन्न**-न.-१४९६-टपકેલું.

☐ रीण, स्नुत स्रुत, ।

* स्यन्दतेस्म इति स्यन्नम् ।

**स्यमन्तक**-पुं-२२३-વિષ્ણુના હાથનોમણિ.

* सीमन्तयति द्यां दीप्तिभिः इति स्यमन्तकः पृषोदरादित्वात् ।

**स्याद्वादवादिन्**-पुं-८६१ શ્રાવક, જૈન, આર્હત.

☐ आर्हत, [जैन, अनेकान्तवादिन् शे.७१] ।

* स्याद्वादोऽनेकान्तवादस्तं वदति इति स्याद्वादवादी, अनेकान्तवाद्यपि ।

**स्याद्वादिन्**-पुं-२५-ભગવાન-તીર્થંકર.

द्र० अधीश्वरशब्दः ।

* स्यादित्यव्ययं अनेकान्तवाचकं ततः स्यादित्यनेकान्तं वदति इत्येवंशीलः स्याद्वादी स्याद्वादोऽस्यास्ति वा स्याद्वादो यौगिकत्वादनेकान्तवादीत्यपि ।

**स्यूत**-पुं-९९२-થેલી, કોથળી.

☐ प्रसेव ।

* सीव्यतेस्म इति स्यूतः ।

**स्यूत**-न.-१४८७-સીવેલું.

द्र० उतशब्दः ।

* सीव्यते स्म इति स्यूतं "अनुनासिके च च्छ्वः शूट्" ॥४।१।१०८॥ इत्यूत्वम् ।

**स्यूति**-स्त्री-९१२-સીવવું.

☐ सेवन, सीवन ।

* सेव्यते इति स्यूतिः स्त्रियां क्तौ " "अनुनासिके च"-॥४।१।१०८॥ इत्यूटिच स्यूतिः ।

**'स्रंसिन्'**-पुं-११४२-પીલુનું ઝાડ.

द्र० गुडफलशब्दः ।

**स्रज्**-स्त्री-६५१-માળા [મસ્તક ઉપર ધારણ કરવાની પુષ્પમાળા].

☐ पुष्पदामन्, माल्य, माला ।

* सृज्यते पुष्पैः इति स्रक् 'ऋत्विक्पदादि"-॥५।३।११४॥ इति क्विपि "ऋत्विज्दिश्"-॥२।१।६९॥ इति गत्वं सूत्रपाठाद् ऋतो रत्वं च सर्तेरौणादिकः कज् वा ।

**स्रव**-पुं-६३३-મૂત્ર, પેશાબ.

द्र० मूत्रजलशब्दः ।

* स्रवणं इति स्रवः ।

**स्रव**-पुं-१०९६-ઝરણું.

द्र० उत्सशब्दः ।

* स्रवति इति स्रवः ।

**स्रवद्गर्भा**-स्त्री-१२६७-ગર્ભપાત થયેલીગાય.

☐ अवतोका, 'वतोका ।'

**स्रवन्ती**-स्त्री-१०८०-નદી.

द्र० आपगाशब्दः ।

* स्रवति इति स्रवन्ती ।

**स्रष्टृ**-पुं-३-બ્રહ્મા.

**स्रष्टृ**-पुं-५ (प.)-બ્રહ્મા.

**स्रष्टृ**-पुं-२१३-બ્રહ્મા.

द्र० अजशब्दः ।

* सृजति इति स्रष्टा ।

**स्रस्त**-न.-१४९१-પડીગયેલું.

द्र० च्युतशब्दः ।

* स्रंसते स्म इति स्रस्तम् ।

**स्रस्तर**–पुं–६८२–पांदडा वगेरेनी शय्या.

☐ संस्तर [प्रस्तर शि०५६] ।

* स्रंसतेऽत्रेति स्रस्तरः "जटर"–(उणा–४०३) इत्यरे निपात्यते ।

**स्राक्** अ.–१५३०–जल्दी.

द्र० अञ्जसाशब्दः ।

**स्रुग्घ्नी**–स्त्री–९४५–साजी.

द्र० योगवाहिन्शब्दः ।

* स्रिचो हन्ति स्रुघ्नी "अचित्तटक्" ॥५।१।८३॥ ।

**स्रुच**–स्त्री–८२८–यज्ञपात्र, सरवो.

☐ स्रुव ।

* स्रवति हविरस्याः इति स्रुक् स्त्रीलिंगः, "स्रोश्चिक्"–(उणा–८७१) इति चिक् ।

**स्रुत**–न.–१४९६–टपकेलुं.

☐ स्यन्न, रीण, स्नुत ।

* स्रवति स्म इति स्रुतम् ।

**स्रुव**–पुं–८२८–यज्ञपात्र सरवो.

☐ स्रुच ।

* स्रवत्यस्मात् इति स्रुवः "निस्रुपी"–(उणा–५११) इति किद् वः ।

**स्रोतईश**–पुं–१०७३– समुद्र.

द्र० अकूपारशब्दः ।

* स्रोतसां ईशः इति स्रोतईशः ।

**स्रोतस्**–न.–१०८०–नदी.

द्र० आपगाशब्दः ।

* स्रवति इति स्रोतः क्लीबलिङ्गः "स्रुरीभ्याम्" (उणा–८८७) इति तस् ।

**स्रोतस्**–न.–१०८६–स्वाभाविक जळनो प्रवाह.

* स्रवति इति स्रोतः क्लीबलिङ्गः ।

**स्रोतस्**–न.–१३८३–इन्द्रिय.

द्र० अक्षशब्दः ।

* स्रवत्यस्मान्मलः इति स्रोतः क्लीबलिङ्गः ।

**'स्रोतस्वती'**–स्त्री–१०८०–नदी.

द्र० आपगाशब्दः ।

**स्रोतस्विनी**–स्त्री–१०८०–नदी.

द्र० आपगाशब्दः ।

* स्रोतांसि सन्त्यस्याः इति स्रोतस्विनी ।

**स्रोतोऽञ्जन**–न.–१०५१–सुरमो.

द्र० कापोतशब्दः ।

* यमुनास्रोतसोऽञ्जनं इति स्रोतोऽञ्जनम् ।

**स्व**–पुं–न.–१९२–धन.

द्र० अर्थशब्दः ।

* अस्यते क्षिप्यते इति स्वं पुंक्लीबलिङ्गः "प्रह्वाह्वा"–(उणा–५१४) इति वान्तो निपात्यते स्वननीति वा ।

**स्व**–पुं–५६२–सात पेढी सुधीनो संबंधी.

द्र० आत्मीयशब्दः ।

* अस्यति परं इति स्वः ।

**स्व**–पुं–५६१–स्वजन, बंधु.

द्र० ज्ञातिशब्दः ।

* अस्यत्यन्यजातिं इति स्वः, "प्रह्वाह्वा"–(उणा–५१४) इति निपात्यते ।

**स्वकीय**–पुं–५६२–पोतानुं.

द्र० आत्मीयशब्दः ।

* स्वस्यायं इति स्वकीयः गेहादित्वादीयः ।

**स्वकुलक्षय**–पुं–१३४४–माछलुं.

द्र० अण्डजशब्दः ।

* स्वकुलस्य क्षयोऽस्मात् इति स्वकुलक्षयः ।

**स्वङ्ग**–पुं–३५५– सिंह जेवा संघयणवाळो, सार रूप वाळो.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐ सिंहसंहनन ।

* सुरूपमङ्गमस्य इति स्वङ्गः ।

**स्वच्छन्द**-पुं-३५५-સ્વતન્ત્ર, સ્વચ્છંદી.

द्र० अपावृत्तशब्दः ।

* स्व आत्मीयश्छन्दोऽभिप्रायोऽस्य इति स्वच्छन्दः ।

**स्वच्छन्दपत्र**-पुं-१०५१-આકાશ.

द्र० अभ्रकशब्दः ।

* स्वच्छानि पत्राण्यस्य इति स्वच्छपत्रम् ।

**स्वजन**-पुं-५६१-સ્વજન.

द्र० ज्ञातिशब्दः ।

* स्व आत्मीयश्चासौ जनश्च इति स्वजनः ।

**स्वजातिद्विष्**-पुं-१२८० (शे. १८२)-કૂતરો.

द्र० अस्थिभुज् शब्दः ।

**स्वतन्त्र**-पुं-३५५-સ્વતન્ત્ર, સ્વચ્છંદી.

द्र० अपावृत्तशब्दः ।

* स्व आत्मा तन्त्रं प्रधानमस्य इति स्वतन्त्रः ।

**स्वदन**-न.-४२३-આહાર, ભોજન.

द्र० अदनशब्दः ।

* स्वद्यते इति स्वदनम् ।

**स्वधा**-स्त्री-१५३८-પિતૃયજ્ઞમાં વપરાતો શબ્દ.

☐ श्रौषट्, वौषट्, वषट् स्वाहा ।

* स्वदते इति स्वधा "सुधिस्वदेर्धं च" (उणा-६०२) इत्याप्रत्ययः यथा स्वधा पितृभ्यः ।

**स्वधाभुज्**-पुं-८८-દેવ.

द्र० अनिमिषशब्दः ।

**(स्वधाशन)**-पुं-८८-દેવ.

द्र० अनिमिषशब्दः ।

**स्वधिति**-पुं-७८६-કુહાડો.

द्र० कुठारशब्दः ।

* स्वं धियति धारयति इति स्वधितिः "तिक्कृतौ"-॥५।१।७१॥ इति तिक् पुंलिङ्गः ।

**स्वन**-पुं-१३९९-શબ્દ.

द्र० आरवशब्दः ।

* स्वननं इति स्वनः "नवा क्वणयमहसस्वनः" ॥५।३।४८॥ इत्यल् ।

**स्वनि**-पुं-१४००-શબ્દ.

द्र० आरवशब्दः ।

* स्वननं स्वनिः, "पदिपठि"-(उणा-६०७) इति इः ।

**स्वनि**-स्त्री-११०० (शे० १७१)-અગ્નિ.

द्र० अग्निशब्दः ।

**स्वनित**-न.-१४०६-મેઘગર્જના.

द्र० गर्जिशब्दः ।

* स्वननं इति स्वनितम् ।

**स्वप्नज्**-पुं-४४२-ઉંઘણસી.

☐ शयालु, निद्रालु ।

* स्वापशीलः इति स्वप्नक् "तृषिधृषि" ॥५।२।८०॥ इति नजिङ् ।

**'स्वभाजन'**-न.-७३१-મિત્રાદિને આલિંગનાદિથી આનંદ ઉપજાવવો.

☐ आनन्दन, आप्रच्छन, सभाजन ।

**स्वभाव**-पुं-१३७६-સ્વભાવ, સ્વરૂપ.

द्र० आत्मनशब्दः ।

**स्वभू**-पुं-२१६-વિષ્ણુ.

द्र० अच्युतशब्दः ।

* स्वतो भवति स्वभूः ।

**स्वमुखभू**-पुं-२३९ (शे० ८०)-ગરુડપક્ષી.

द्र० अरुणावरजशब्दः ।

**स्वयम्**-अ.-१५४२ (शे० २०२)-પોતે.

**स्वयंवरा**-स्त्री-५११-પોતેજ પતિને પસંદ કરનારી સ્ત્રી.

☐ पतिंवरा, वर्या ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* स्वयं वृणीते इति स्वयंवरा ।

**स्वयम्प्रभ**–पुं–५४–આવતી ચોવીશીના ચોથા તીર્થંકર.

* स्वयं प्रकर्षेण भाति इति स्वयंप्रभः ।

**स्वयंभू**–पुं–२४–અરિહંત.

द्र० अधीश्वरशब्दः ।

* स्वयमात्मना तथा भव्यत्वादिसामग्री परिपाकात् न तु परोपदेशात् भवति इति स्वयम्भूः ।

**स्वयंभू**-पुं–२११–બ્રહ્મા.

द्र० अजशब्दः ।

* स्वयं भवति इति स्वयंभूः ।

**स्वयंभू**-पुं–६९५–ત્રીજા વાસુદેવ.

☐ रुद्रतनय ।

* स्वयं भवति इति स्वयम्भूः ।

**स्वर्**–अ.–१५२५–સ્વર્ગ.

**स्वर**–पुं–१३९९–શબ્દ, અવાજ.

द्र० आरवशब्दः ।

* स्वरति इति स्वरः ।

**स्वरभेद**–पुं–३०६–અવ્યક્ત સ્વર.

☐ कल्लत्व ।

* स्वरस्य भेदः इति स्वरभेदः ।

**स्वरापगा**–स्त्री–१०८२–ગંગાનદી.

द्र० ऋषिकुल्याशब्दः ।

* स्वर्गस्य आपगा इति स्वरापगा ।

**स्वरु**–पुं–१८०–ઇન્દ્રનું વજ્ર.

द्र० अशनिशब्दः ।

* स्वरतिइतिस्वरुः पुंसि, "भृमृतृत्सरि" (उणा–७१६) इत्युः ।

**स्वरुचि**–पुं–३५५–સ્વતન્ત્ર, સ્વચ્છંદી.

द्र० निरवग्रहशब्दः ।

* स्वा आत्मीया रुचिरस्य इति स्वरुचिः ।

**स्वरूप**–न.–१३७६–સ્વભાવ, સ્વરૂપ.

द्र० आत्मन्शब्दः ।

* स्वस्य रूपं इति स्वरूपम् ।

**स्वर्ग**–पुं–८७–દેવલોક, સ્વર્ગ.

द्र० ऊर्ध्वलोकशब्दः ।

* स्वर्यते सुखहेतुतया कथ्यते इति स्वर्गः "गम्यमि"–(उणा–९२) इति गः, सुष्ठु अर्ज्यते वा, भावाकर्त्रोर्घञ् ।

**स्वर्गपति**–पुं–१७३–ઇન્દ્ર.

द्र० अच्युताग्रजशब्दः ।

* स्वर्गस्यपतिः इति स्वर्गपतिः यौगिकत्वात् नाकेशः ।

**स्वर्गसद्**–पुं–८७–દેવ.

द्र० अनिमिषशब्दः ।

* स्वर्गे सीदन्तीति स्वर्गसदः, "क्विप्" ।५॥१।१४८॥ इति क्विप् यौगिकत्वात् द्युसद्मानः इत्यादयः ।

**(स्वर्गस्त्री)**–स्त्री–१८३–અપ્સરા.

द्र० अप्सरस्शब्दः ।

**स्वर्गिरि**–पुं–१०३२–મેરુપર્વત.

द्र० कर्णिकाचलशब्दः ।

* स्वः गिरिः इति स्वर्गिरिः ।

**(स्वर्गिन्)**–पुं–८८–દેવ.

द्र० अनिमिषशब्दः ।

**स्वर्गिगिरि**–पुं–१०३२–મેરુપર્વત.

द्र० कर्णिकाचलशब्दः ।

* स्वर्गिणां गिरिः इति स्वर्गिगिरिः ।

**स्वर्गिवधू**–स्त्री–१८३–અપ્સરા.

द्र० अप्सरस्शब्दः ।

* स्वर्गिणां वध्वः इति स्वर्गिवध्वः यौगिकत्वात् सुरस्त्रियः ।

**स्वर्ग्यापगा**–स्त्री–१०८२–ગંગાનદી.

द्र० ऋषिकुल्याशब्दः ।

* स्वर्गिणां आपगा इति स्वर्ग्यापगा ।

**स्वर्जि**–स्त्री–९४५–સાજી.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० योगवाहिन्शब्दः ।

* सुष्ठु अर्ज्यते इति स्वर्जिः स्त्रीलिङ्गः ।

**स्वर्जिका**-स्त्री-९४५-સાજી.

द्र० योगवाहिन्शब्दः ।

* सुष्ठु अर्ज्यते इति स्वर्जिका "स्वरेभ्य इः" (उणा-६०६) के स्वर्जिका ।

**स्वर्जिकाक्षार**-पुं-९४५-સાજીખાર.

द्र० कापोतशब्दः ।

* स्वर्जिकां दग्ध्वा क्षार्यते इति स्वर्जिकाक्षारः ।

**स्वर्ण**-पुं-ન.-१०४३-સોનું.

द्र० अर्जुनशब्दः ।

* शोभनो वर्णोऽस्य इति स्वर्णं, पुंक्लीबलिङ्गः पृषोदरादित्वाद् उलोपे स्वर्णं इति निपात्यते ।

**(स्वर्ण)**-ન.-१०६३- રત્નનીજાતિ.

**स्वर्णकाय**-पुं-२३१-ગરુડપક્ષી.

द्र० अरुणावरजशब्दः ।

* स्वर्णरूपः कायोऽस्य इति स्वर्णकायः ।

**स्वर्णकार**-पुं-९०८-સોની.

द्र० कलादशब्दः ।

* स्वर्णं करोति अलङ्कारादिरूपतया इति स्वर्णकारः ।

**स्वर्णज**-ન.-१०४२-કલઈ, સીસું.

द्र० आलीनशब्दः ।

* स्वर्णाज्जायते इति स्वर्णजम् ।

**स्वर्णारि**-पुं-१०४१-સીસું.

द्र० गण्डूपदभवशब्दः ।

* स्वर्णस्य अरिः इति स्वर्णारिः ।

**स्वर्भाणु**-पुं-१२१-રાહુ.

द्र० तमशब्दः ।

* स्वर्भाति इति स्वर्भाणुः "पूर्वपद"-॥२।३।६४॥ इति णत्वम् ।

**स्वर्वधू**-(બ.વ.)-१८३-અપ્સરા.

द्र० अप्सरस्शब्दः ।

* स्वर्गस्य वध्वः इति स्वर्वध्वः यौगिकत्वात् स्वर्गस्त्रियः ।

**स्वर्वापी**-स्त्री-१०८२-ગંગાનદી.

द्र० ऋषिकुल्याशब्दः ।

* स्वर्गे वापी इति स्वर्गवापी ।

**स्वर्वेश्या**-स्त्री-१८३-અપ્સરા.

द्र० अप्सरस्शब्दः ।

* स्वर्गस्य वेश्याः इति स्वर्वेश्याः स्वरिति स्वर्गिणोऽप्युपलक्षणं तेन देवगणिका इत्यपि ।

**स्वर्वैद्य**-(દ્વિ.વ.)-पुं-१८१-અશ્વિની કુમાર.

द्र० अश्विजशब्दः ।

* स्वर्गस्य वैद्यौ इति स्वर्वैद्यौ ।

**स्वलक्षण**-ન.-१३७६-સ્વરૂપ, સ્વભાવ

द्र० आत्मन्शब्दः ।

* स्वस्य लक्षणं इति स्वलक्षणम् ।

**स्ववासिनी**-स्त्री ५१२-(शि.४०)-પરણેલી યુવાન સ્ત્રી.

द्र० चिरिण्टीशब्दः ।

**स्वसृ**-स्त्री-९-(प.)-કુટું'ની વાચક શબ્દ બનાવનાર શબ્દ, ઉદા. યમસ્વસા. જમના નદી.

**स्वसृ**-स्त्री-५५३-બહેન.

द्र० जामिशब्दः ।

* सुष्ठु आस्यते इति स्वसा "सोरसेः" (उणा-८५३) इति ऋः ।

**स्वस्तिक**-पुं-४७-श्री સુપાર્શ્વનાથ ભ.નું લાંછન.

**स्वस्तिक**-पुं-१३२५-(शे.१९३)-કુકડો.

द्र० कुक्कुटशब्दः ।

**(स्वस्तिक)**-पुं-१०१५-**શ્રીમન્તોના ઘરોની વિશેષ પ્રકારની રચના.**

**नन्द्यावर्त, (सर्वतोभद्र) ।**

**स्वस्त्ययन-ન.-५१८-(शे.११०)**-વિવાહની માંગલિક ક્રિયા.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐ [पूर्णकलश, मङ्गलाह्निक शे.११०] ।

**स्वस्रीय**-पुं-५४३-ભાણેજ.

द्र० कुतपशब्दः ।

* स्वसुरपत्यं इति स्वस्रीयः "ढंय स्वसुश्च" ॥६।१।८९॥ ।

**स्वाति**-पुं-स्त्री-११२-स्वाति नक्षत्र.

☐ आनिली ।

* सुष्ठु अतति इति स्वातिः, पुंस्त्रीलिङ्गः "पादाच्चात्य"-(उणा-६२०) इति इर्णित् ।

**स्वादु**-पुं-१३८८-મધુર રસ.

द्र० गुल्यशब्दः ।

* स्वदते इति स्वादुः "कृवापाजि"-(उणा-१) इत्युण् ।

**'स्वादुकण्टक'**-पुं-११५६-ગોખરૂ.

द्र० गोक्षुरशब्दः ।

**स्वादुरसा**-स्त्री-९०२-મદિરા, દારૂ.

द्र० अब्धिजाशब्दः ।

* स्वादू रसोऽस्याः इति स्वादुरसा ।

**स्वादुवारि**-पुं-१०७५-સ્વાદુવારિ નામનો સાતમો સમુદ્ર.

☐ (स्वादूद) ।

* स्वादु वारि यस्य स इति स्वादुवारिः ।

(**स्वादूद**)-पुं-१०७५-સ્વાદુવારિ નામનો સાતમો સમુદ્ર.

☐ स्वादुवारि ।

**'स्वाद्वी'**-स्त्री-११५६-દરાખ.

द्र० मृद्वीकाशब्दः ।

**स्वाध्याय**-पुं-८२-પાંચ નિયમ પૈકી ત્રીજો નિયમ.

* स्वकीयमध्ययनं इति स्वाध्यायो मोक्षशास्त्राध्ययनं प्रणवजपो वा ।

**स्वाध्याय**-पुं-२४९-વેદ.

द्र० आम्नायशब्दः ।

* सुष्ठु आ समन्तात् अधीयते इति स्वाध्यायः "इङोऽपादाने"-॥५।३।१९॥ इति घञ् ।

**स्वाध्याय**-पुं-८४२-વેદનું અધ્યયન.

☐ जप ।

* स्वस्य वेदस्याध्ययनं इति स्वाध्यायः ।

**स्वान**-पुं-१३९९-શબ્દ.

द्र० आरवशब्दः ।

* स्वननं इति स्वानः ।

**स्वान्त**-न.-१३६९-મન, ચિત્ત.

द्र० अन्तःकरणशब्दः ।

* स्वनति इति स्वान्तं "क्षुब्धविरिब्ध"-॥४।४।७०॥ इति क्ते साधुः विषयेष्वनाकुलं मनः स्वान्तमित्यन्ये ।

**स्वाप**-पुं-३१३-નિદ્રા.

द्र० नन्दीमुखीशब्दः ।

* स्वपनं इति स्वापः ।

**स्वापतेय**-न.-१११-ધન.

द्र० अर्थशब्दः ।

* स्वपतौ साधु इति स्वापतेयं "पथ्यतिथि"-॥७।१।१६॥ इत्येयण् ।

**स्वामिन्**-पुं-५१-ગઈ ચોવીશીના ૧૧ મા ભગવાન.

* जगतां स्वाम्यात् स्वामी ।

**स्वामिन्**-पुं-२०८-કાર્તિકેય.

द्र० अग्निभूशब्दः ।

* स्वमस्याऽस्तीति स्वामी "स्वाद् मिन्नीशे"-॥७।२।४९॥ इति मिन् दीर्घश्च ।

**स्वामिन्**-पुं-३५९-સ્વામી, નાયક.

द्र० अधिपशब्दः ।

* स्वमस्यास्तीति स्वामी "स्वाद् मिन्नीशे"-॥७।२।४९॥ इति मिन् दीर्घश्च ।

**स्वामिन्**-पुं-७१४-રાજા, રાજ્યના ૭ અંગો (પ્રકૃતિ) પૈકી પહેલું અંગ.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

* स्वामी राजा ।

**स्वास्थ्य**-न.-३०८-संतोष.

☐ संतोष, धृति ।

* स्वस्थस्य भावः इति स्वास्थ्यम् ।

**स्वास्थ्य**-न.-४७४-आरोग्य.

द्र० अनामयशब्दः ।

* स्वस्थस्य भावः इति स्वास्थ्यम् ।

**स्वाहा**-स्त्री-११००-अग्निनी स्त्री.

☐ अग्नायी ।

* सुष्ठु आहूयन्ते देवा अनया इति स्वाहा, पृषोदरादित्वात् सुष्ठु आह ब्रूते देवान् ऋत्विगनयेति वा स्वाहा इत्यव्ययमपि ।

**स्वाहा**-स्त्री-१५३८-देवो ने बलि आपवा वपरातो शब्द.

द्र० वषट्शब्दः ।

**स्वाहाभुज्**-पुं-८८-देव.

द्र० अनिमिषशब्दः ।

**(स्वाहाशन)**-पुं-८८-देव.

द्र० अनिमिषशब्दः ।

**स्वीकृत**-न.-१४८९-(शि.१३४) स्वीकारेलुं.

द्र० अङ्गीकृतशब्दः ।

**स्वेच्छा**-स्त्री-३५६-स्वेच्छा, इच्छा प्रमाणे.

☐ यदृच्छा, स्वैरिता ।

* स्वस्येच्छा इति स्वेच्छा ।

**स्वेद्**-पुं-३०५-धाम, गरमी.

☐ निदाघ, घर्म ।

* स्वेदनं इति स्वेदः ।

**स्वेदज**-(ब.व.)-पुं-१३५६-जू, मांकड वगेरे.

* स्वेदाद् घर्माज्जायन्ते इति स्वेदजाः ।

**स्वेदनिका**-स्त्री-९२१-तवी, कढाई.

☐ कन्दु ।

* स्वेद्यतेऽनया इति स्वेदनी के स्वेदनिका ।

**स्वैरिणी**-स्त्री-५२९-असती, कुलटास्त्री.

द्र० अविनीताशब्दः ।

* स्वयमीरितुं शीलमस्याः इति स्वैरिणी "स्वै रस्वैर्य"-॥१।२।१५॥ इत्यैत्वम् ।

**स्वैरिता**-स्त्री-३५६-स्वेच्छा.

☐ यदृच्छा, स्वेच्छा ।

* स्वैरिणो भावः इति स्वैरिता ।

**स्वैरिन्**-पुं-३५५-स्वतंत्र, स्वच्छंदी.

द्र० निरवग्रहशब्दः ।

* स्वयमीरितुं शीलमस्य इति स्वैरी, स्वैरोऽस्यास्तीति वा "स्वैरस्वैर्ये"-॥१।२।१५॥ इति ऐत्वम् ।

**स्वोदरपूरक**-पुं-४२७-खाउधरो, पेटभरो.

☐ आत्मंभरि, कुक्षिम्भरि, उदरम्भरि ।

* स्वमेवोदरं पूरयति इति स्वोदरपूरकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ह

ह–अ.–१५४२–(शे.२००)–પાદપૂરનાર અવ્યય.

द्र० चशब्दः ।

हंस–पुं–९६–સૂર્ય.

द्र० अंशुशब्दः ।

* हन्ति तमो इति हंसः ''मावावद्यमि''–(उणा–५६४) इत्यादिना सः ।

हंस–पुं–१०४३–રૂપું.

द्र० कलधौतशब्दः ।

हंस–(भ.व.)–पुं–१३२५–હંસપક્ષી.

द्र० चक्राङ्गशब्दः ।

* घ्नन्ति गच्छन्ति इति हंसाः ''मावावदि''–(उणा–५६४) इति सः ।

हंस–पुं–१२३३–(शि.१७९)–ઘોડો.

द्र० अर्वनशब्दः ।

हंसक–पुं.न.–६६६–ઝાંઝર, કલ્લું.

द्र० कटकाङ्गशब्दः ।

* हंसवत् कायति इति हंसकम् ।

हंसकालीतनय–पुं–१२८३–પાડો.

द्र० कासरशब्दः ।

* हंसकाल्यास्तनयो हंसकालीतनयः ।

हंसग–पुं–२१२–બ્રહ્મા.

द्र० अजशब्दः ।

* हंसेन गच्छति इति हंसगः यौगिकत्वात् श्वेतपत्ररथः ।

हंसपाद–पुं–१०६१–હિંગળો.

द्र० कुरुविन्दशब्दः ।

* हंसपाद इव रक्तः इति हंसपादः ।

हंसाह्वय–न.–१०४३–રૂપું.

द्र० कलधौतशब्दः ।

* हंसस्य अभिख्या यस्य तत्तथा हंसाह्वयम् ।

हंसी–स्त्री–१३२७–હંસલી.

द्र० वरलाशब्दः ।

* हंसी हंसकान्ता ।

हंहो–अ.–१५३७–સંબોધન માટેનો શબ્દ.

द्र० अङ्गशब्दः ।

* हं जुहोतीति हंहो ! यथा–''हंहो तिष्ट सखे ! विवेकबहुभिः प्राप्तोऽसि पुण्यैर्मया ।''

हक्कारक–पुं–२६१–(शे.८३)–બોલાવવું.

द्र० अभिमन्त्रणशब्दः ।

हञ्जे–अ.–३३४–દાસીને બોલાવવાનો શબ્દ. (નાટક માં વપરાતો શબ્દ.)

* चेट्या आह्वाने हञ्जे ।

हट्ट–पुं–१००२–દુકાન, હાટ.

द्र० अट्टशब्दः ।

* हटति दीप्यते हट्टः, ''घटाघाटा–'' (उणा–१४१) इति टे निपात्यते ।

हट्टाध्यक्ष–पुं–७२५–વેપારી પાસેથી કરલેવાના કામમાં નિમાયેલ અધિકારી.

☐ अधिकर्मिक ।

* हट्टेष्वध्यक्षः इति हट्टाध्यक्षः ।

हठ–पुं–८०४–બલાત્કાર.

☐ बलात्कार, प्रसभ ।

* हठति इति हठः ।

हड्ड–न.–६२६–(शि.४८)–હાડકું.

द्र० अस्थिशब्दः ।

हण्डे–अ.–३३४–નીચ સખીને બોલાવવાનો શબ્દ. (નાટકમાં વપરાતો શબ્દ.)

* नीचाया आह्वाने हण्डे ।

हत–पुं–४३९–નિરાશ થયેલ.

द्र० प्रतिबद्धशब्दः ।

* हन्यतेस्म इति हतः ।

हनु–पुं–स्त्री–५८३–હડપચી.

* हनति आहारं इति हनुः पुंस्त्रीलिङ्गः ''कुहने–''(उणा–७९१) इति नुकि बाहुलकाद् नलापः ।

हनुमत्–पुं–७०५–હનુમાન.

द्र० अर्जुनध्वजशब्दः ।

* हनुरस्त्यस्य इति हनुमान् ''स्त्युपसर्ग–'' ॥३।२।८६॥ इति दीर्घत्वे हनूमानपि ।

हन्न–न.–१४९५–મળ, હગેલું.

☐ गून ।

* हन्यते स्म इति हन्नम् ।

**हम्भा**–स्त्री–१४०६–ગાયનો શબ્દ.

☐ रंभा ।

* अहमित्यंभते शब्दायते इति हंभा हंभेत्यनुकरणम् ।

**हय**–पुं–१२३३–ઘોડો.

द्र० अर्वन्शब्दः ।

* हयति हिनोति वा हयः ।

**हयग्रीव**–पुं–२२०–વિષ્ણુનો વધ્ય, અશ્વગ્રીવ.

* हयस्येव ग्रीवास्य इति हयग्रीवः ।

**(हयग्रीवरिपु)**–पुं–२२२–વિષ્ણુ.

**हयङ्कष**–पुं–१७६–(શે.૩૫) ઈન્દ્રનો સારથી.

द्र० मातलिशब्दः ।

**हयप्रिय**–पुं–११७०–જવ.

☐ यव, तीक्ष्णशुक ।

* हयानां प्रियः इति हयप्रियः ।

**हयमार**–पुं–११३७–કરેણ.

द्र० करवीरशब्दः ।

* हयानुपभुक्तो मारयति इति हयमारः ।

**हयवाहन**–पुं–१०३–સૂર્યનો પુત્ર.

द्र० अर्करेतोजशब्दः ।

* हयो वाहनमस्य इति हयवाहनः ।

**हर**–पुं–१९८–શંકર.

द्र० अट्टहासिन्शब्दः ।

* हरति अघं इति हरः ।

**हरण**–न.–५२०–લગ્નવગેરે પ્રસંગે કરાતે ચાંલ્લો. [ભેટણુ.]

☐ सुदाय, यौतक, [दाय शि.४२] ।

* ह्रियतेऽनेनेति हरणम् ।

**हरबीज**–न.–१०५०–પારો.

द्र० चलशब्दः ।

* हरस्य बीजं इति हरबीजम् ।

**हरशेखरा**–स्त्री–१०८२–ગંગાનદી.

द्र० ऋषिकुल्याशब्दः ।

* हरस्य शेखरोऽनया इति हरशेखरा ।

**हराद्रि**–पुं–१०२८–(શે.૧૫૯)–કૈલાસ પર્વત.

द्र० अष्टापदशब्दः ।

**हरि**–पुं–९७–સૂર્ય.

द्र० अंशुशब्दः ।

* हरति तमांसीति हरिः "स्वरेभ्य इः" (उणा–६०६) इति इः ।

**हरि**–पुं–१७१–ઈન્દ્ર.

द्र० अच्युताग्रजशब्दः ।

* हरति दैत्यप्राणान् इति हरिः ।

**हरि**–पुं–१८४–યમરાજ.

द्र० अर्कसूनुशब्दः ।

* हरति प्राणान् इति हरिः ।

**हरि**–पुं–२१४–વિષ્ણુ.

द्र० अच्युतशब्दः ।

* हरति पापं इति हरिः ।

**हरि**–पुं–११७२–મગ.

द्र० प्रथनशब्दः ।

* हरिः हरिवर्णत्वात् पुंलिङ्गः ।

**हरि**–पुं–१२३३–ઘોડો.

द्र० अर्वन्शब्दः ।

* हरति देशान्तरं प्रापयति इति हरिः ।

**हरि**–पुं–१२८३–સિંહ.

द्र० इभारिशब्दः ।

* हरति प्राणान् इति हरिः ।

**हरि**–पुं–१२९२–વાનર.

द्र० कपिशब्दः ।

* हरति इति हरिः ।

**हरि**–पुं–१३५४–દેડકો.

द्र० अजिह्वशब्दः ।

* ह्रियते सर्पेण इति हरिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**हरि**–पुं–१३९६–લાલમિશ્રિત પીળોવર્ણ.

द्र० कद्रुशब्दः ।

* हरति इति हरिः ।

**हरि**–पुं–१३०४–સર્પ, નાગ.

द्र० अहिशब्दः ।

**हरिक**–पुं–१२४२–પીળી અને લીલી કાંતિવાળો ઘોડો.

☐ हालक ।

* हरिरेव हरिकः ।

**हरिकेलीय**–(બ.વ.)–પું–૯૫૭–બંગાલાદેશ.

☐ वङ्ग ।

* हरिकेलौ भवाः इति हरिकेलीयाः "दोरीयः" ॥६।२।३२॥ ।

**हरिचंदन**–पुं न.–१७९–કલ્પવૃક્ષ.

द्र० कल्पशब्दः ।

* हरेरिन्द्रस्य चन्दनो इति हरिचन्दनः पुंक्लीबलिङ्गः, हरिः कपे पिङ्गश्चन्दन इति वा ।

**हरिचन्दन**–पुं न.–६४१–ગોશીર્ષ ચંદન.

द्र० गोशीर्षशब्दः ।

* हरेरिन्द्रस्य चन्दनं हरिचन्दनं, पुंक्लीबलिङ्गः, हरिकपिलं वा तच्चातिशीतं पीतं चाहुः ।

**हरिण**–पुं–१२९३–હરણ.

द्र० कुरङ्गशब्दः ।

* ह्रियते गीतेन इति हरिणः, "हृद्रुबहि"–(उणा–१९४) इतीणः ।

**हरिण**–पुं–१२९३–સફેદવર્ણ.

द्र० अर्जुनशब्दः ।

* हरते चेतो हरिणः "द्रुहृब्रुहि"–(उणा–१९४) इतीणः ।

**हरिणी**–स्त्री–१४६४–સુવર્ણની પ્રતિમા.

☐ हिरण्मयी ।

* हरति मनः इति हरिणी "द्रुहृब्रुहि"–(उणा–१९४) इतीणः ।

**हरित्**–स्त्री–१६६–દિશા.

द्र० आशाशब्दः ।

* हरति अनया इति हरित् "हृसृरुहियु"–(उणा–८८७) इति इत् ।

**हरित्**–न.–१३९४–લીલોરંગ.

द्र० तालकाभशब्दः ।

* हरति चित्तं इति हरित् "हृसृरुहि"–(उणा–८८७) इति इत् ।

**हरित**–पुं–११७२–મગ.

द्र० प्रथनशब्दः ।

* हरितो नीलः ।

**हरितच्छद**–पुं–१११४–(शे.१७३)–વૃક્ષ.

द्र० अगशब्दः ।

**हरिताल**–न.–१०५८–હરતાલ.

द्र० आलशब्दः ।

* हरेः पीतवर्णस्य तालः प्रतिष्ठाऽस्य हरितालम्, हरितामलति भूषयति वा ।

**हरिताली**–स्त्री–११९३–ધરો.

द्र० अनन्ताशब्दः ।

* हरितां नीलत्वमलति इति हरिताली ।

**हरिदश्व**–पुं–९८–સૂર્ય.

द्र० अंशुशब्दः ।

* हरितो नीला अश्वा अस्य इति हरिदश्वः ।

**हरिदेव**–पुं–११४–શ્રવણ નક્ષત્ર.

☐ श्रवण ।

*हरिः विष्णुर्देवोऽस्य इति हरिदेवः ।

**हरिद्रा**–स्त्री–४१८–હળદર.

द्र० काञ्चनीशब्दः ।

* हरिं पीतं वर्णं द्राति गच्छति इति हरिद्रा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**हरिद्राराग**–पुं–४७६–ક્ષણિક રાગવાળો.

* हरिद्राया इव क्षणिको रागोऽस्य इति हरिद्रारागः ।

**हरिद्रु**–पुं–११२४–વૃક્ષ.

द्र० अगशब्दः ।

* हरिं वर्णं द्रवति इति हरिद्रुः "हरिपीत"–(उणा–७४५) इति डिद्रुः ।

**हरिन्मणि**–पुं–१०६४–મરકત મણિ.

द्र० अश्मगर्भशब्दः ।

* हरिद् नीलवर्णो मणिः इति हरिन्मणिः ।

**हरिपर्ण**–न.–११९०–મૂળો.

द्र० मूलकशब्दः ।

* हरि: नीलं पर्णमस्य इति हरिपर्णम् ।

'**हरिप्रिय**'–पुं–११३८–કદંબ.

द्र० कदम्बशब्दः ।

**हरिप्रिया**–स्त्री–२२६–લક્ષ્મી.

द्र० आशब्दः ।

* हरेः कृष्णस्य प्रिया इति हरिप्रिया ।

**हरिमत्**–पुं–१७४–(शे० ३२)–ઇન્દ્ર.

द्र० अच्युताग्रजशब्दः ।

**हरिमन्थक**–पुं–११७१–ચણો.

☐ चणक ।

* हरिभिः मथ्यते इति हरिमन्थकः ।

**हरिमन्थज**–पुं–११७३–કાળા ચણા.

द्र० प्रवरशब्दः ।

* हरिमन्थाज्जायते इति हरिमन्थजः ।

**हरिय**–पुं–१२३८–પીળો ઘોડો.

* हरिं वर्णं याति इति हरियः ।

**(हरिवर्ष)**–(અ. વ.)–ન.–९४६–પાંચ હરિવર્ષ; ૩૦ અકર્મભૂમિ પૈકી પાંચભૂમિ

**हरिश्चन्द्र**–पुं–७०१–હરિશ્ચન્દ્ર રાજા.

☐ त्रिशङ्कुज ।

* हरिश्चन्द्र इव आह्लादकोऽस्य इति हरिश्चन्द्रः, वर्चस्कादित्वात् साधुः ।

**हरिषेण**–पुं–६९४–દશમા ચક્રવતી.

☐ हरिसुत ।

* हरेरिन्द्रस्येव सेनाऽस्य इति हरिषेणः "एत्यकः" ॥२।३।२६॥ इति षत्वम् ।

**हरिसुत**–पुं–६९४–દશમા ચક્રવતી.

☐ हरिषेण ।

* हरेः क्ष्मापालस्य सुतः इति हरिसुतः ।

**हरीतकी**–स्त्री–११४६–હરડે.

द्र० अभयाशब्दः ।

* हरति रोगान् इति हरीतकी, स्त्रीलिङ्गः "हृसहि"–(उणा–७९) इतीतकः ।

**हरेणु**–पुं–११७१–વટાણા.

द्र० कलायशब्दः ।

* ह्रियते इति हरेणुः पुंलिङ्गः, "कृहृभू"–(उणा–७७२) इत्येणुः ।

**हर्म्य**–न.–९९३–હવેલી.

* हरति मनः इति हर्म्यम्, "शिक्यास्याढ्य"–(उणा–३६४) इति ये निपात्यते ।

**हर्यक्ष**–पुं–१२८४–સિંહ.

द्र० इभारिशब्दः ।

* पिङ्गले अक्षिणी अस्य इति हर्यक्षः ।

**हर्यक्ष**–पुं–१९०(शि. १४)–કુબેરદેવ.

द्र० इच्छावसुशब्दः ।

**हर्यश्व**–पुं–१७२–ઇન્દ્ર.

द्र० अच्युताग्रजशब्दः ।

* हरयः पिङ्गा अश्वा अस्य इति हर्यश्वः ।

**हर्ष**–पुं–३१५–મનની પ્રસન્નતા, હર્ષ.

द्र० आनन्दशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* हर्षणं इति हर्षः ।

**हर्षमाण**–पुं–४३५–આનંદી.

☐ प्रमनस्, हृष्टमानस, विकुर्वाण ।

* हर्षति इत्येवंशीलो हर्षमाणः, "वयःशक्ति"– ॥५।२।२४॥ इति शानः ।

**हल**–पुं-न.–८९१–હળ.

द्र० गोदारणशब्दः ।

* हलति इति हलं पुंक्लीबलिङ्गः ।

**(हलवोढ)**–पुं–१२६०–નવો બળદ.

द्र० प्रष्ठवाहशब्दः ।

**हला**–स्त्री–३३४–સખીને બોલાવવાનો શબ્દ. (નાટકની ભાષામાં)

* सख्या आह्वानं हला ।

**हलाह**–पुं–१२४३–કાબર ચિતરો ઘોડો.

* चित्रितो कर्बुरवर्णो हलवदाहन्ति इति हलाहः ।

**हलाहल**–पुं–११९५–વિષ, ઝેર.

द्र० अहिच्छत्रशब्दः ।

* हलति विलिखति जठरं न हलति चेति हलाहलः, यथा "कस्य स हयो हलाहलः" हालेव हलतीति लक्ष्ये हलः, **यथा**–स्निग्धं भवत्यमृतकल्पमहो कलत्रं, हालाहलं विषमिवाप्रगुणं तदेव ।

**हलाहल**–पुं–१२९८–ગરોળીની જાત, આંજણી.

☐ अञ्जनाधिका, हालिनी, अञ्जनिका ।

* हलति न हलति च इति हलाहलः ।

**हलि**–पुं-स्त्री–८९०–મોટું હળ.

☐ जित्या ।

* हलन्त्यनया इति हलिः महद् हलम् "पदिपठि–" (उणा–६०७) इति इः पुंस्त्रीलिङ्गः ।

**हलिन्**–पुं–२२४–બલદેવ.

द्र० अच्युताग्रजशब्दः ।

* हलं प्रहरणमस्त्यस्य इति हली ।

**हलिन्**–पुं–८९०–ખેડૂત.

द्र० कर्षकशब्दः ।

* हलमस्त्यस्य इति हली ।

**हलिप्रिय**–पुं–११३८–કદમ્બ વૃક્ષ.

द्र० कदम्बशब्दः ।

* हलिनः प्रियो इति हलिप्रियः, सुराधिवासनात् ।

**हलिप्रिया**–स्त्री–९०२–મદિરા.

द्र० अब्धिजाशब्दः ।

* हलिनो बलस्य प्रिया इति हलिप्रिया ।

**हल्य**–न.–९६८–હળથી ખેડાયતેવું ખેતર.

☐ सीत्य ।

* हलस्य कर्षः क्षेत्रं कृष्यत इति कृत्वा हल्यम्, "हलस्य कर्षे" ॥७।१।२६॥ इति यः ।

**हल्लक**–न.–११६४–સંધ્યા વિકાસી રાતું કમળ.

☐ रक्तसन्ध्यक, (रक्तोत्पल) ।

* हल्लति घूर्णते इति हल्लकम् ।

**हल्लीसक**–न.–२८१–સ્ત્રીઓનું મંડળ ભેગું થઈ કરાયેલું નૃત્ય.

* हेलया लस्यतेऽस्मिन् इति हल्लीसकं "कीचक–पेचक–"(उणा–३३) इत्यादिना निपात्यते, क्लीबोऽयं **वाचस्पतिस्तु**– "हल्लीसकोऽस्त्रियाम्" इत्याह ।

**हव**–पुं–२६१–બોલાવવું તે.

द्र० अभिमन्त्रणशब्दः ।

* ह्वानं इति हवः "भावेऽनुपसर्गात्" ॥५।३।४५॥ इत्यल् वश्चोत्वम् ।

**हवन**–पुं–११००–(शे.१७०) અગ્નિ.

द्र० अग्निशब्दः ।

**हवित्री**–स्त्री–८३३–હોમ કરવાનો કુંડ.

☐ होमकुण्ड ।

* हूयतेऽस्यां इति हवित्री "अग्निवहि–" (उणा–४५९) इतीत्रः ।

**हविरशन**–पुं–१०९७–અગ્નિ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० अग्निशब्दः ।

* हविः अश्नाति इति हविरशनः।यौगिकत्वात् हविर्भुग् ।

**हविर्गेह**–न.–९१६–બલિનું ઘર.

☐ होत्रीय ।

* हविषो होतव्यस्य गेहं इति हविर्गेहम् ।

**हविष**–न.–४०७–ઘી.

द्र० आज्यशब्दः ।

* हूयते इति हविः क्लीबलिङ्गः ।

**हविष्**–न.–८३१–હવિ, બલિદાન.

☐ साम्नाय्य ।

* हूयते इति हविः क्लीबलिङ्गः ।

**हविष्**–न.–११००–(शे.१७०) અગ્નિ.

द्र० अग्निशब्दः ।

**हविष्य**–न.–४०७–ઘી.

द्र० आज्यशब्दः ।

* हविषे हितं इति हविष्यं "उवर्णयुगादेः" ।।७।१।३०।। इति यः ।

**हव्य**–न.–८३२–અગ્નિદ્વારા દેવતાઓને આપવા–યોગ્ય ઓદન.

* हूयते इति हव्यम् अग्निमुखेन सुरेभ्यो दातव्यमोदनम् ।

**हव्यपाक**–पुं–८३३–હવ્યાન્ન.

☐ चरु ।

* हव्यस्य पाकः इति हव्यपाकः ।

(**हव्यभुज्**)–पुं–१०९७–અગ્નિ.

द्र० अग्निशब्दः ।

**हव्यवाह**–पुं–१०९९–અગ્નિ.

द्र० अग्निशब्दः ।

* हव्यं वहति इति हव्यवाहः ।

**हव्याशन**–पुं–१०९१–અગ્નિ.

द्र० अग्निशब्दः ।

* हव्यं अश्नाति इति हव्याशनः ।

**हास**–पुं–२९६–હાસ્ય.

द्र० घर्घरशब्दः ।

* हसनं इति हासः ।

**हसन**–न.–२९६–હાસ્ય.

द्र० घर्घरशब्दः ।

* हस्यते इति हसनम् ।

**हसन**–न.–२९८–હોઠ ફરકવા રૂપ હાસ્ય.

**हसनी**–स्त्री–१०२०–સગડી.

द्र० अङ्गारपात्रीशब्दः ।

* हसत्यङ्गारैः इति हसनी ।

**हसन्तिका**–स्त्री–१०२०–સગડી.

द्र० अङ्गारपात्रीशब्दः ।

* अङ्गारैर्हसतीव हसन्ती के हसन्तिका ।

**हसित**–न.–२९७–હાસ્ય.

द्र० घर्घरशब्दः ।

**हसित**–न.–११२९–ખીલેલું પુષ્પ.

द्र० उच्छ्वसितशब्दः ।

* हसति स्म इति हसितम् ।

**हस्त**–पुं–न.–११२–હસ્ત નક્ષત્ર.

☐ सवितृदैवत ।

* हसति इति हस्तः पुंक्लीबलिङ्गः, "दम्यमि–" (उणा–२००) इत्यदिना तः ।

**हस्त**–पुं–न.–५९१–હાથનો પંજો.

द्र० करशब्दः ।

* प्रहसत्यनेन इति हस्तः पुंक्लीबलिङ्गः "दम्यमि–" (उणा–२००) इति तः हसद्भिर्मुखे दीयते वा ।

**हस्त**–पुं–५९९–વચલી આંગળી અને કોણીનું પ્રમાણ.

* मध्यमाङ्गलिकूर्परान्तरे प्रामाणिकश्रुतिर्विंशत्यङ्गुलप्रमाणवान् हस्तः यदाह–"हस्तोऽङ्गुलविंशत्या चतुरन्वितया" इति ।

**हस्त**-पुं-८८७-ચોવીશ આંગલ પ્રમાણ.

* हस्यतेऽनेन इति हस्तः।

**हस्त**-पुं-१२२४-હાથીની સૂંઢ.

☐ शुण्डा, कर, हस्तिनाशा।

* हस्तः हस्तक्रियाकारित्वात्।

**हस्तधारण**-न.-१५०२-રક્ષણીયને બચાવવું.

☐ परित्राण, पर्याप्ति, (हस्तस्थापन)।

* प्रहर्तुमुद्यतस्य धारणं रोधो हस्तधारणम्, रक्ष्यस्य पृष्ठे हस्तस्थापनं वा।

**हस्तबन्ध**-पुं-१८-(शि.११७) લગ્ન, પાણિગ્રહણ.

द्र० उपयमशब्दः।

**हस्तबिम्ब**-न.-६४०-હાથનો થાપો.

☐ स्थासक।

* हस्तस्य बिम्बं इति हस्तबिम्बं, कुङ्कुमादि-रचितम्।

**हस्तलेप**-पुं-५१८-(शे.१११) લગ્ન સમયે હાથમાં લેપકરવો તે.

☐ [करण शे १११]।

**हस्तसूत्र**-पुं-न.-६६३-હાથેબાંધવાનું મંગલ સૂત્ર.

द्र० आवापशब्दः।

* हस्ते सूत्र्यते इति हस्तसूत्रं पुंक्लीबलिङ्गः।

**(हस्तस्थापन)**-न.-१५०२-રક્ષણીયને બચાવવું તે.

☐ परित्राण, पर्याप्ति, हस्तधारण।

**हस्तिदन्तक**-न.-११९०-મૂળી.

द्र० मूलकशब्दः।

* हस्तिदन्तप्रतिकृति इति हस्तिदन्तकम्।

**हस्तिन्**-पुं-१२१७-હાથી.

द्र० अनेकपशब्दः।

* हस्तः शुण्डाऽस्त्यस्य इति हस्ती, "हस्तदन्ते" ॥७।२।६८॥ इतीन्।



**हस्तिनख**-पुं-९८२-નગરના દરવાજા પાસે ચઢવા ઉતરવાનો ઢાળ.

☐ नगरद्वारकूटक, परिकूट, (नगरद्वारकूट)।

* हस्तिनख इव इति हस्तिनखः, दुर्गद्वारावतरणार्थः क्रमनिम्नो मृत्कूटोऽपसोपानाख्यः बहिरतटमन्तःसोपानयुक्तं युद्धार्थमित्येके।

**हस्तिनापुर**-न.-९७८-દિલ્હી, હસ્તિનાપુર.

द्र० गजाह्वयशब्दः।

* हस्तिन्याः पुरं इति हस्तिनापुरं पृषोदरादित्वात् आत्वम्।

**हस्तिनासा**-स्त्री-१२२४-હાથીની સૂંઢ.

द्र० करशब्दः।

* हस्तिनः नासा इति हस्तिनासा।

**(हस्तिनी)**-स्त्री-१२१८-હાથણી.

द्र० धेनुकाशब्दः।

**हस्तिनीपुर**-न.-९७८-દિલ્હી હસ્તિનાપુર.

द्र० गजाह्वयशब्दः।

* हस्तिन्याः पुरं इति हस्तिनीपुरम्।

**हस्तिपक**-(બ.વ.)-पुं-७६२-મહાવત.

द्र० आधोरणशब्दः।

* हस्तिनं पान्ति इति हस्तिपाः के हस्तिपकाः।

**हस्तिमल्ल**-पुं-१७७-ઈન્દ્રનો હાથી.

द्र० अभ्रमातङ्गशब्दः।

* हस्तिनां मल्लः इति हस्तिमल्लः।

**हस्तिमल्ल**-पुं-२०७-(शे.६३)-ગણેશ, વિનાયક.

द्र० आखुगशब्दः।

**हस्तिशाला**-स्त्री-९९८-હાથીઓને રહેવાનું સ્થાન

☐ चतुर, (हस्तिशाल)।

* हस्तिनां शाला इति हस्तिशाला।

**(हस्तिपङ्गव)**-पुं-१४२४-૭ હાથી.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**हस्त्यारोह**-पुं-७६२-હાથી ઉપર બેસનાર.

द्र० महामात्रशब्दः ।

* हस्तिनमारोहति इति हस्त्यारोहः, हस्तिनोऽधिकृतः प्रधानभूतः ।

**हाटक**-न.-१०४३-સોનું.

द्र० अर्जुनशब्दः ।

* हरति दीप्यते इति हाटकम्, हाटकाकरभवत्वाद् वा अर्धर्चादित्वात् क्लीबलिङ्गोऽयम्, पुंस्यपि **वाचस्पतिः** यदाह-"हाटकमस्त्रियां हाटकाकरसंभूत पलाश कुसुमच्छविः" ।

**(हानि)**-पुं-१५२४-હાનિ, અપહરણ.

☐ अपहार, अपचय ।

**हायन**-पुं-१५९-વર્ષ.

द्र० अब्दशब्दः ।

* जहाति जिहीते वा भावान् इति हायनः "हः कालव्रीह्योः" ।।५।१।६८।। इति टनण् ।

**हार**-पुं-६५९-એક સો આઠ સેરનો હાર.

**हारफल**-न.-६६०-પાંચ સેરનો હાર.

* हारस्य फलमत्र इति हारफलम् ।

**हारहूर**-न.-९०३-મદિરા.

द्र० अब्धिजाशब्दः ।

* हरति इन्द्रियाणि इति हारहूरम्, "सिन्दूरकर्चूर"-(उणा-४३०) इत्यूरे निपात्यते. हारहूरा द्राक्षा तद् विकारो वा ।

**हारहूरा**-स्त्री-११५६-દ્રાક્ષ.

द्र० गोस्तनीशब्दः ।

* हरति पित्तं इति हारहूरा "सिन्दूर"-(उणा-४३०) इत्यूरे निपात्यते ।

**हारान्तर्मणि**-पुं-६५०-હારની મધ્યમાં રહેલ મણિ.

☐ नायक, तरल ।

* हारस्याऽन्तर्मध्ये स्थितः मणिः इति हारान्तर्मणिः ।

**हारि**-स्त्री-४९३-મુસાફરોનો સમુદાય.

* हार्यन्ते प्राप्यन्ते अनया इति हारिः, "स्वरेभ्यः इ"-(उणा-६०६) ।

**हारिन्**-पुं-१४४४-સુન્દર.

द्र० अभिरामशब्दः ।

* हरति मनो हारि ग्रहादित्वाण्णिन् ।

**'हारित'**-पुं-१३९४-હારીત પક્ષી.

☐ हारित, मृदङ्कुर ।

**हारिद्र**-पुं-१३९४-પીળો રંગ

द्र० गौरशब्दः ।

* हरिद्राया अयं इति हारिद्रः ।

**हार्द**-न.-१३७७-પ્રેમ, સ્નેહ.

द्र० प्रीतिशब्दः ।

* हृदयस्य भावः इति हार्दम् ।

**हाल**-पुं-७१२-સાલિવાહન રાજા.

☐ सातवाहन, [सालवाहन शि.६१] ।

* हलत्यराति हृदयं इति हालः, ज्वलादित्वाणः ।

**हालक**-१२४२-पुं-પીળી અને લીલી કાંતિવાળો ઘોડો.

☐ हरिक ।

* हलति क्ष्मां इति हालकः ।

**हालहाल**-न.-११९९-(शि० १०८)-વિષ, ઝેર.

द्र० अङ्कोल्लसारशब्दः ।

**हाला**-स्त्री-९०३-મદિરા, દારૂ.

द्र० अब्धिजाशब्दः ।

* हलति विलिखत्यङ्गं इति हाला, ज्वलादित्वात् णः ।

**हालाहल**-न.-११९९-(शि०१०८)-વિષ, ઝેર.

द्र० अङ्कोल्लसारशब्दः ।

**हालिनी**-स्त्री-१२९८-ગરોળીની એક જાત.

☐ अञ्जनाधिका, अञ्जनी, हलाहल ।

* हलत्यवद्यं इति हालिनी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**हाली**–स्त्री–५५५–પત્નીની નાની બહેન.
द्र० कनिष्ठाशब्दः ।
* हलति इति हाली, ज्वलादित्वात् णे ङीः ।

**हाव**–पुं–५०९–હાવભાવ, અંગથી ઉત્પન્ન થતા અલંકાર.
* स्वचित्तवृत्तिं परत्र जुह्वतीं ददतीं हावयतीति हावो भूतारकादीनां बहुर्विकारः ।

**हास**–पुं–७२–તીર્થંકરમાં ન હોય તે १८ દોષ પૈકી છઠ્ઠો દોષ.
* हासो हास्यमिति ।

**हास**–पुं–२९६–હાસ્ય.
द्र० घर्घरशब्दः ।
* हसनं इति हासः ।

**हासा**–स्त्री–२०५–(शे०५३)–પાર્વતી.
द्र० अद्रिजाशब्दः ।

**हासिका**–स्त्री–२९६–હાસ્ય.
द्र० घर्घरशब्दः ।
* हसनं इति हासिका "भावे" ।५।३।१२२।। इति णकः ।

**हास्तिक**–न.–१४१८–હાથીઓનો સમૂહ.
* हस्तिनाम् लिङ्गविशिष्टस्यापि ग्रहणात् हस्तिनीनां वा समूहो हास्तिकम् ।

**हास्तिनपुर**–न.–९७८–દિલ્હી.
द्र० गजाह्वयशब्दः ।
* हस्तिन्या इदं इति हास्तिनं तच्च तत्पुरं च इति हास्तिनपुरम् ।

**हास्य**–पुं–२९४–નવરસ પૈકી બીજો રસ.
* हासे साधुः हास्यः हास एव वा, सामाजिकानां चर्वणागोचरं गतो हास्यः **यदाह**–स्थाय्येव तु रसीभवेत् इति ।

**हास्य**–न.–२९६–હાસ્ય રસનો સ્થાયિભાવ.
द्र० घर्घरशब्दः ।
*हसनीयं इति हास्यम् ।

**हाहा**–पुं–१८३–ગન્ધર્વો–દેવો ના ગવૈયા.
द्र० गन्धर्वशब्दः ।
* गानप्रारम्भे हाहाकरणात् हाहाः पुंसि :

**(हाहाहूहू)**–पुं–१८३–ગન્ધર્વો.
द्र० गन्धर्वशब्दः ।

**हि**–अ.–१५४२–(शे० २००)–પાદપૂરવામાં વપરાતો શબ્દ.
द्र० चशब्दः ।

**हिंसा**–स्त्री–३७१–હિંસા.
द्र० अपासनशब्दः ।
* हिंसनं इति हिंसा ।

**हिंस्र**–पुं–३६९–હિંસક.
□ शरारु, घातुक ।
* हिंसनशीलो हिंस्रः, "स्म्यजसहिंस"–।।५।२।७९।। इति रः ।

**हिक्का**–स्त्री–४६८–હેડકી.
□ हेक्का, हृल्लास ।
* हिक्कत्यनया इति हिक्का ।

**हिंगु**–पुं न.–४२२–હીંગ.
द्र० जतुकशब्दः ।
* हिनोति नासां इति हिङ्गुः पुंक्लीबलिङ्गः "हहिन च"–(उणा–७३०) इति गुः ।

**'हिंगुनिर्यास'**–पुं–११३९–લીંબડો.
द्र० अरिष्टशब्दः ।

**हिंगुल**–पुं–१०६१–હિંગળો.
द्र० कुरुविन्दशब्दः ।
* हिनोति इति हिङ्गुलः "कुमुल"–(उणा–४८७) इति उले निपात्यते, पुंस्ययम् **वाचस्पतिस्तु** "हिंगुलस्त्वस्त्रियाम्" इति क्लीबेऽप्याह, हिङ्गुलुरपि ।

**हिङ्गुलु**–पुं–१०६१–(शि–९३)–હિંગળો.
द्र० कुरुविन्दशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**हिज्जल**-पुं-११४५- પાણીમાં થતું નેતર.

☐ निचुल, इज्जल, 'अम्बुज' ।

* हिनोति इति हिज्जलः ।

**हिञ्जीर**-पुं-१२२९- હાથીના પગે બાંધવાની સાંકળ.

द्र० अन्दुकशब्दः ।

* हिनस्ति इति हिञ्जीरः, "जम्बीरः"-(उणा-४२२) इतीरे निपात्यते ।

**हिडिम्बनिषूदन**-पुं-७०८-ભીમસેન.

द्र० किर्मीरनिषूदनशब्दः ।

* हिण्डते वनमध्ये इति हिडिम्बः "हिडिविलेः"-(उणा-३२४) इति साधुः, तस्य निषूदनः हिडिम्बनिषूदनः ।

**'हिण्डिर'**-पुं-१०७७- સમુદ્રફેણ.

द्र० अब्धिकफशब्दः ।

**'हिण्डीर'**-पुं-१०७७-સમુદ્રફેણ.

द्र० अब्धिकफशब्दः ।

**(हिण्डोलक)**-पुं-७५८-હીંચકો.

द्र० दोलाशब्दः ।

**हिम**-न.-१०७२-હિમ, ઝાકળ.

द्र० अवश्यायशब्दः ।

* हिनोति वर्धते जलमनेन इति हिमम्, "क्षुहिम्यां वा"-(उणा-३४१) इति किद् मः ।

**हिम**-पुं-१३८५-શીતળ, ઠંડુ.

द्र० जडशब्दः ।

* हिनोति इति हिमः "क्षुहिम्यां वा" (उणा-३४१) इति किद् मः ।

**हिमद्युति**-पुं-१०५-ચંદ્ર.

द्र० अत्रिदृग्जशब्दः ।

* हिमा द्युतयो यस्य स तथा हिमद्युतिः यौगिकत्वात् शीतांशुः ।

**हिमप्रस्थ**-पुं-१०२७-હિમાલય પર્વત.

द्र० अद्रिराजशब्दः ।

* हिमं प्रतिष्ठतेऽस्मात्, हिमं प्रस्थे अस्य वा हिमप्रस्थः ।

**हिमवत्**-पुं-१०२७-હિમાલય પર્વત.

द्र० अद्रिराजशब्दः ।

* हिममस्त्यस्मिन् इति हिमवान् ।

**हिमवद्दुहितृ**-स्त्री-९-(प.)-ગૌરી.

**हिमवद्वस**-पुं-१०२८-(શે.-१५९)-અષ્ટાપદ પર્વત.

द्र० अष्टापदशब्दः ।

**हिमवातापहांशुक**-न.-६७५-રજાઈ આદિ, ટાઢ, પવન વગેરે રોકવાનું વસ્ત્ર.

द्र० नीशारशब्दः ।

**हिमवालुका**-स्त्री-६४३-કપૂર.

द्र० कर्पूरशब्दः ।

